विषयः। अष्टश्लोकीव्याख्यानम्।

No. 24. अहल्याकामधेनुः। Substance, country made paper, 10 × 5 inches. Folia, 900. Lines, 14 on a page Extent, 36,000 çlokas. Character, Nāgara. Date, Saṃvat 1831. Place of deposit, Dumraon Rāj Library. Appearance, tolerable. Prose and verse. Correct.

Beginning. श्रीगणपत्यम्बिकागुरुभ्यो नमः। मङ्गलमूर्त्तिर्जयति केशवदेवाय नमः

यो यातीव जगद्देवं प्रविश्यान्तश्चिदात्मना।
तं वन्दे केशवं देवं गृहस्थानां सुखास्पदम्॥
यदनुग्रहतो नित्यं गृहेषु गृहमेधिनः।
लभन्ते मङ्गलं सम्यक् नौमि तं मङ्गलेश्वरम्॥

लोके ख्यातावुभावास्तां दम्पती कीर्त्तिभूषणौ ।
श्रीमान् मल्लारिरावश्च तत्पत्नी गौतमाभिधा ॥
खण्डेरावाङ्गतो जातस्तत्सुतो वीरसत्तमः ।
यस्य भार्य्या विदिता साचात् भत्यल्लीवंशभूषणा ॥
रेवातीरोपकण्ठे प्रबलगुणगणैः कार्त्तवीर्य्याधिपस्य ।
विख्याता या पुरासीत् तदनुसुजनता सत्कथालापनाम्ना (?) ।
जाता माहिष्मती या भुवि पुनरधुना कालयोगाभिगुप्ता ।
सेयं ख्यातापुरल्याधिकमतिविलसत्कर्म्मभिर्दृश्यते च ॥
श्रीमच्छ्रीकार्त्तवीर्य्यार्जुनविपुलभुजक्रीड़या यत्र जात
तीर्थधारासहस्रे विलसति विमले सर्व्वदाध्यानरम्यम् ।
कृत्वा तत्राश्रयं वै वितरति सततं दानधारामसङ्ख्यां
खण्डेरावप्रियैषा चितिसुरशरणा श्रीमती श्रीअहल्या ॥
अहल्या कामधेनुर्वै तन्नाम्नेयमुदाहृता ।
नानाभिरामवत्सेती निर्णयौघपयोऽस्रवा ॥
यस्यां श्राद्धाद्युसद्वृत्तं निरूप्य गृहमेधिनाम् ।
गृहा वास्तुविधानाख्यं वत्सं वक्ष्येऽथ श्रेयसे ॥
गृहस्थस्य क्रियाः सर्व्वा न सिध्यन्ति गृहं विना ।
यतस्तस्माद्गृहारम्भप्रवेशसमयौ ब्रुवे ॥
गृहं सुसम्भारमित्यर्थः । इति भविष्यपुराणोक्तत्वाद्गृहं स्वस्यावश्यकत्वेन गृह-
कल्पना । तत्रादौ मत्स्यपुराणोक्तवास्तुस्वरूपमाह तदुक्तं विधानरहस्ये ।
ऋषय ऊचुः ।
प्रासादभवनादीनां निवेशं विस्तराद्वद ।
कुर्य्यात् केन विधानेन कश्च वास्तुरुदाहृतः ॥ इत्यादि ।

End. तथाच स्मृत्यर्थसारे ।
एवं सगोत्रप्रवरं विवाहविषयेषिते ।
यदि कश्च जनस्तान्तु कृत्वा समुपगच्छति ॥
गुरुतल्पव्रतान्कुर्ड्वरुद्र(?)स्तज्जोजातो (?) भवेत् ।
भोगतस्तां परित्यज्य पालयेज्जननीमिव ॥
× × × × × × × ।

विवाहकल्पनासिद्ध्यैर्यागप्रव्रजतः ।
ज्ञात्वा लोके प्रकर्त्तव्यो गोत्रप्रवरनिर्णयः ॥
चरल्याकामधेन्वाख्यग्रन्थस्यास्य सुलक्षणः ।
गोत्रप्रवरसद्भावी वत्सो यो समुदीरितः ॥

Colophon. इति श्रीचरल्याकामधेन्वाख्ये गोत्रप्रवरनिर्णयो नाम वत्सः ॥ श्रीकेशवाय नमः । सम्वत् १८३१ ॥

(ग्रन्थोऽयं मध्यखण्डितः)

विषयः । १ वत्से गृहवास्तुविधानादिकथनम् । २ व. सर्व्वयागादौ दक्षिणाप्रकारार्थं मूल्यादिवर्णनम् । ३ व. सकलश्राद्धादिकथनम् । ४ व. सकलसंस्कारकर्म्मादिकथनम् । ५ व. धनधान्यादिदानकथनम् । ६ व. जलाशयारामोत्सर्गादिकथनम् । ७ व. चतुर्दशतिथिव्रतादिनिरूपणम् । पौर्णमासीव्रतादिकथनम् ८ व. गोत्रप्रवरनिर्णयः ॥

ग्रन्थेऽस्मिन् सर्व्वे वत्साः क्रमग्रन्थाः ॥

No. 25. अङ्गहीनकारिका । Substance, country-made paper, 14 × 6 inches. Folia, 7. Lines, 20 on a page. Extent, 168 çlokas. Character, Nāgara Date ? Place of deposit, Benares, Bāmanāchārya. Appearance old. Prose. Correct.

Beginning. गुरुं रत्नेश्वरं नत्वा गणराजं तथा पुनः ।
हीनेऽहीने कृते किञ्चिन्मिश्रपादप्रमादतः ॥
द्वैधलं विद्यते मिश्र इत्यादि ॥

End. न मनुष्येण शक्याऽहं दातुं नारद पार्थिवैः ।
परमात्मा मम स्वामी येनाहं स्थापिता भृशम् ॥

Colophon. इत्यष्टविंशदङ्गहीनकारिका ।

विषयः । अङ्गहीनयागप्रयोगविचारः ॥

No. 26. आख्यातवादविवरणम् । By अनन्तदेव । Substance, country-made paper, 11½×5 inches. Folia, 18. Lines, 17 on a page. Extent, 1,000 çlokas. Character, Nágara Date ? Place of deposit, Puri, S'añkara Maṭha. Appearance, old. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः । श्रीपितृभ्यो नमः । श्रीमदनन्तदेवेभ्यो नमः ।
नत्वोपनिषदाख्यातख्यातिरूपधरं महः ।
व्याख्यातॄणां मुदे व्याख्याख्यातवाद × × × ॥
व्याख्यातस्येति यत्त्वं वाच्यतावच्छेदकमित्यर्थः । × × × × × ×
रमूलभूता विप्रतिपत्ति × × बोध्या आख्यातस्य वाच्यतावच्छेदकं
यत्त्वं व्यापारत्वं वेति ॥ इत्यादि ।

End. एकक्रियाहेतुका परक्रिया प्रतीत्युदाहरणेऽसंसर्गतयैव हेतुत्वप्रतीत्युपपत्तेः
तस्मात् प्रयातीति यत् पश्येति परैरेकवाक्यतोपपादनीया शक्यते च न्याय-
मतेऽपि प्रयाति यस्तं पश्येत्येवं तदुपपादितामित्यलम् ॥
व्याख्यातं श्रुतिशिरोभिर्यद् व्याख्यातञ्च मुनीश्वरैः ।
श्रीकृष्णेति समाख्यातं तुष्येद्व्याख्यातचिन्तया ॥

Colophon. इति श्रीमद्विद्याविनोदाबदातितदिङ्मण्डलश्रीमदापदेवात्मजानन्तदेवकृत-
माख्यातवादविवरणम् ॥ शुभमस्तु ।

विषयः । आख्यातवादस्यविवेचनम् ।

No. 27. आचारसारः । By गदाधरराजगुरु । Substance, palm leaf, 15×1½ inches. Folia, 242. Lines, 4 on a page. Extent, 480 çlokas. Character, Uriyā. Date ? Place of deposit, Balasore, Srirāmacandra Tol, Paṇḍit Rudranārāyana Kāvyatirtha. Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।
अशेषवर्णाश्रमधर्महृदयं
शरीरिमात्रस्य च शीघ्रमुक्तये ।
निजालये श्रीपुरुषोत्तमाह्वये
दधद् वपुर्दारुमयं महःश्रये ॥

रचितजननिकायाभीष्टदानैक दक्षः
जपयतु विमलायाः सानुकम्पः कटाक्षः ।
स्मृतिनिकरगभीराम्भोधिमध्यार्थरत्ना
नयनकृतविधाने नूलयत्नेऽन्तरायम् ।
कृष्णात् कौशिकवाजपेयि तुलसीवंश्याद् बृहत्पण्डितात्
नीतिग्रन्थकृतः स रायगुरुरित्यत्राधिकारी सुधीः ।
पुत्रः शारदवाजपेयमखकृद् जातो हरेकृष्णभू-
नाथश्रीषड्विंशीगुरुर्हलधराभिख्योऽग्रजोग्रामकृत् ।
वेदान्तादिसमस्तशास्त्रनिलयो नीलाम्बराख्योऽनुज
स्तस्य स्मार्त्तवरोऽकृदैवविद्भृत् साहित्यविद्यार्णवः ।
सद्वैयाकरणश्च नीतिनिपुणः श्रीनीलशैलेशितु
संस्थानमुख्योत्सवानवथवक्तोवत्र योऽवर्णयत् ।
धीरेशान् सवितीर्णदापितमहासम्भापनेपूत्तमान्
संस्थाप्य ध्वारिणो विधाय धनदप्रख्यान् द्विजांस्तान् व्यधात् ।
प्राध्यं प्राप चतुर्मुखादिकमहायज्ञेषु सन्तोषयन्
विप्रादीनपि राजसूयजनितं यौधिष्ठिरं यो यशः ।

... ...

... ...

यज्वा यज्ञरमो यमेश्वर इति ख्याता बृहत् पण्डित-
स्तं नीलाम्बरनामकञ्च पितरं श्रीजानकीं मातरम् ।
नत्वा राय गुरुर्गदाधर सुधीराचारसाराभिध
ग्रन्थं प्रारभते विलोक्य यमिमं निःसंशयाः सज्जनाः ।

ब्रह्मपुराणे । वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत् तोषकारकः ॥ इत्यादि ।

End. वक्ष्यमाणाश्नभोजनाशक्तौ तु
गर्भाधानेषु सर्वेषु ब्राह्मणान् भोजयेद्दश ।

Colophon. इति यज्ञपार्श्वोक्तः कर्म्मादिदशब्राह्मणभोजनसामर्थ्यकम् । इति प्रथमर्त्तु
नियमः ।

श्रीनीलाम्बरनामरायगुरुणाख्यातो हरेकृष्णभू-
र्नाथप्राप्तमातपत्र उदभूद् यो याजकः सन् सुधीः ।
श्रीमान् रायगुरुर्गदाधरसुधीस्तस्यात्मजः कौशिको
ग्रन्थं संशयनाशनं रचितवानाचारसाराभिधम् ॥

विषयः । प्रातरारभ्य यावदाह्निककृत्यनिरूपणम् ॥

No. 28. आचार्य्यचरित्रविश्रामः । Substance, country-made paper. 9 × 12 inches. Folia, 23. Lines, 23 on a page. Extent, 750 çlokas. Character, Nāgara. Date ? Place of deposit, Kailadevā Matha, Hatwa. Appearance, new. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः । श्रीनिम्बार्काय नमः ॥

भक्तार्त्तिघ्नमहौषधं भवभयध्वंसैकदिव्यौषधम् ।
तापानर्थकरौषधं निजजने संजीवनैकौषधम् ;
श्यामोहद्दलनौषधं पिव मनो निम्बार्कनामौषधम् ॥
माथुरे मथुरायाञ्च पुण्यद्रुमलताश्रये ।
नानापक्षिगणाकीर्णे पुण्यसत्वनिषेविते ॥
× गाधीशं त्रिकालज्ञं सम्प्रदायप्रवर्त्तकम् ।
दीक्षिता चण्डिका येन ज्ञानभक्तिप्रभावतः ॥
व्यासदेवद्दति प्राङ्खंदेवा हरिशब्दतः ।
सर्व्वे परशुरामाद्याः स्वभूदेवादयोऽपरे ॥
सर्व्वे सर्व्वविदो धीराः पप्रच्छुरिदमादरात् ।
भगवन् सर्व्वधर्म्मज्ञ सर्व्वधर्म्मप्रवर्त्तक ॥
ब्रूहि नः श्रद्दधानानामाचार्य्यचरितं शुभम् ।
श्रीमन्निम्बार्कमाचार्य्यं अस्माकं कुलदैवतम् ॥
सुदर्शनावतारं हि प्राङ्गार्ग्याः प्रमाणतः ।
वयं तत् विस्तरात् सर्व्वं श्रोतुमिच्छामहे प्रभो ॥

End. आचार्य्यचरितं रम्यं श्रुलेदं कोविदैर्जनैः ।
गुरुभक्तिः विधातव्या संसाराब्धितितीर्षुभिः ॥

आचार्य्यदेवचरितेऽत्र पुरातनार्य्य-
संनिर्म्मिते निजधिया सकलं विशोध्य ।
श्रीकेशवाख्यकविना च मया प्रसङ्ग-
पुष्टिः कृता हृदि सतां वितनोतु सौख्यम् ॥
श्रीमद्गोपालदासस्य ब्राह्मणस्य महात्मनः ।
नियोगात् केशवाख्येन विदुषा विस्तरः कृतः ॥ * ॥

Colophon. इत्याचार्य्यचरित्रस्य विश्रामेऽस्मिन् त्रयोदशे ।
श्रीहरिव्यासदेवस्य महिमा परिकीर्त्तितः ।
श्रीमते मङ्गलमूर्त्तये नियमानन्दाय नमः ॥ * ॥

विषयः । १ विश्रामे आचार्य्यत्रयाणां अवतारत्वकथनम् । २ वि. निम्बार्कप्रकाण्ड-स्वामिप्रादुर्भावकथनम् । ३ वि. अवतारत्वे प्रमाणादिकथनञ्च । ४ वि. निम्बार्कस्यावतारकथनम् । ५ वि. निम्बार्कमहिमादिकथनम् । ६ वि. संक्षेपेण भाष्यकारस्यावतारकथनम् । ७ वि. गुरुभक्त्युत्सवादिकथनम् । ८ वि. आचार्य्यावतारतिथि-मासादिकथनम् । ९ वि. केशवभट्ट-स्यावतारकथनम् । १० वि. केशवभट्टस्य दिग्विजयकथनम् । ११ । १२ वि. केशव-काश्मीरिभट्टस्य चरित वर्णनम् । १३ वि. श्रीहरिव्यासदेवस्य महिमकथनम् ॥

No. 29. आत्मज्ञानोपदेशटीका । By आनन्दगिरि । Substance, country-made paper, 12 × 4 inches. Folia, 9. Lines, 16 on a page. Extent, 500 çlokas. Character, Bengali. Date ? Place of deposit, Puri Śañkara Maṭha. Appearance, old. Prose. Generally correct.

Beginning. अथात्मज्ञानोपदेशविधिं व्याख्यास्यामः ।
विधूतविविधालम्बकल्पनं कल्पना × × ।
× × मानन्दमन्दोहं तं वन्दे पुरुषोत्तमम ॥
यस्य प्रसादमासाद्य स × ति बहवो गताः ।
तमहं प्रत्यहं वन्दे शुद्धानन्दपरं गुरुम् ॥
आत्मज्ञानाख्यं प्रकरणं अशेषोपनिषदर्थसारप्रकाशकं प्रारभमाणो भगवान् भाष्यकारश्चिकीर्षितप्रकरणाप्रत्यूहपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरि-पालनाय च मङ्गलाचरणं वृद्धाचारप्रमाणकं प्रकुर्व्व × ।

ॐ कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥
इति स्मृतिमनुस्मृत्याथशब्दोच्चारणरूपं मङ्गलाचरणमादौ सम्पादयन्नि
चष्टेति । इत्यादि ॥

End. पदाभ्यासस्य प्रकरणपरिसमाप्तिफलत्वादितिशब्देन शास्त्रार्थस्य सर्व्वस्यैवात्र संक्षिप्योक्तत्वात् वक्तव्यावशेषाभावादशेष × × मतिविशदमिति सूचयति ॥
संसारगरलध्वंसि सुधाधाराभिवर्षिणी ।
आत्मज्ञानानुगा टीका टीकतां पुरुषोत्तमम् ॥

Colophon. इति श्रीमत् परमहंसपरिव्राजकाचार्य्यशुद्धानन्दपूज्यपादशिष्यश्रीमत् परमहंसपरिव्राजकाचार्य्य-भगवदानन्दगिरिकृतावात्मज्ञानोपदेशटीका समाप्ता ।

विषयः । आत्मज्ञानोपदेशप्रकरणस्य शङ्कराचार्य्यकृतस्य व्याख्यानम् ।

No. 30. The same work at the Rājaguru Maṭha, Benares City, Substance, palm leaf, 18×3. Folia, 55. Lines, 10. Extent in çlokas, 1,400. Character, Bengali. Old. Correct.

No. 31. आत्मबोधटीका । Substance, country-made paper, 20×6 inches. Folia, 7. Lines, 20 on a page. Extent, 336 çlokas. Character, Bengali. Date ? Place of deposit, Raja Guru's Maṭha, Ganeśamahallā, Benares City. Appearance, old. Prose. Correct.

Beginning. श्रीदुर्गायै नमः ।
शतमखपूजितपादं शतपथमनसोऽप्यगोचराकारम् ।
विकशितजलरुहनेत्रं सीतावामाङ्कमाश्रये रामम् ॥
तत्र भगवान् शङ्कराचार्य्य उत्तमाधिकारिणो वेदान्तप्रस्थानत्रयं निर्माय तदवलोकनासमर्थानां मन्दबुद्धीनां अनुग्रहार्थं सर्व्ववेदान्तसिद्धान्तसंग्रहमात्मबोधाख्यं प्रकरणं दिदर्शयिषुः प्रतिजानीते तपोभिरिति ॥

End. तस्मादात्मतीर्थस्नातस्य न किञ्चिदवशिष्यत इति भावः ।
प्रसादं कुरु नो ब्रह्मन् परिव्राजशिरोमणे ।
नमस्ते यतिशार्दूल जितेन्द्रिय जनार्दन ॥

Colophon.

विषयः। शङ्करकृतात्मबोधनामक-वेदान्तग्रन्थस्य व्याख्यानम्।

No 32. आत्मस्वरूपानुसन्धानम्। By गोपिनाथ वाजपेयी। Substance, palm leaf, 13 × 2 inches. Folia, 41. Lines, 8 on a page. Extent, 1,700 çlokas. Character, Uriya. Date ? Place of deposit, District Puri, Pratāpapuruṣottamapura, Paṇḍit Viśvanātha Mahāpātra, Kāvyatīrtha. Appearance, old. Prose. Generally correct.

Beginning. ॐ उपास्महे धाम नृसिंहनाम।

यस्य संकल्पमात्रेण सर्गः सर्व्वः प्रवर्त्तते।
तमन्तर्यामिनं पूर्णं नारायणमुपास्महे॥

अथाधीतस्वाध्यायो भगवत्समर्पणपूर्व्वकानुष्ठितनित्यनैमित्तिकवैतानिककर्म्म जातदूरीकृतदुरितजाततया निर्म्मलीकृतमानसः साधनचतुष्टयसम्पन्न आपाततो ज्ञातधर्म्मज्ञानोऽसम्भावनाविपरीतभावनाक्रान्तमानसो विचारं विना अवधारणात्मकज्ञानासम्भवात् विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्-पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति तादृग्गुरूपासनाविधानाद् ब्रह्मज्ञानाय विचारं कुर्य्यादिति प्रथमसूत्रार्थः। तत्र साधनचतुष्टयं च नित्यानित्यवस्तु-विवेकः इहामुत्र च फलभोगाद् वैराग्यं शमदमादिसाधनसम्पत् मुमुक्षा चेत् तत्र नित्यानित्यवस्तुविवेक इति आत्मा नित्यः अन्यत् सर्व्वमनित्यमिति।
इत्यादि।

End. अनुसन्धानन्तु शरीरभेदात् सूत्रेण ब्रह्मवेदो ब्रह्मैव भवतीत्यादि श्रुत्यो गौरवेहेति कृतं पल्लवितेन। तस्मात् प्रकरणसिद्धान्तमुपसंहरति ब्रह्मैवेति बृहत्वात् ब्रह्मैवात्मा विधीयत इति आत्मैव सत्यं दिग्देशाद्यनवच्छिन्नं अबाध्यं अतो अन्यदात्म इति।

श्रीनारायणभक्तिमान् कृतमरत् सद्वाजपेयाध्वरः
श्रीमद्दीक्षितपण्डितापिमजगन्नाथात्मजः सुप्रभोः।
गोपीनाथकृती विभाव्य तदिदं शास्त्रार्थतत्त्वं हृदा
शास्त्रं तत्त्वमसीति नामपठितं मुक्त्यै मुदा वर्णयेत्।

Colophon. इति श्रीमहामहोपाध्यायगोपीनाथवाजपेयिविरचितं आत्मस्वरूपानुसन्धान नाम प्रकरणं समाप्तम् ॥

विषयः। तत्त्वमसीति वाक्यस्य स्वरूपोद्घाटनम्।

No. 33. आनन्दलहरीभाष्यलोचनम्। By रामकविडिण्डिम। Substance, country-made paper, 11×5 inches. Folia, 107. Lines, 11 on a page. Extent, 2,400 çlokas. Character, Nāgari. Date, 1832 Saṃvat. Place of deposit, Harapur, Post Gopālgunga, District Chapra, Paṇḍit Jagadeva. Appearance, tolerable. Prose. Generally correct.

Beginning. (आद्य० खण्डितम्)

End. प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः। तेजोराशेः सूर्य्यस्य नीराजनविधिः। आरात्रिकविधानं सूर्य्यः किं दीपाराधनेन तुष्यति तथाच स्तुतिरेषा। .... अपि च स्वकीयैरम्भोभिः स्वकीयैर्जलैः सलिलनिधेः समुद्रदेवतायाः सौहित्यजननं तर्पणद्वारा तृप्तिसम्पादनम्। सौहित्यं तर्पणं तृप्तिरित्यमरः। तत् समानैव ममैषास्तुतिः।

वाचां कृत्स्नां चरणकमले तावके पुष्पमाला-
मङ्गीकृत्य प्रकटय ममानन्दसाम्राज्यलक्ष्मीम् ॥

Colophon. इति श्रीपदवाक्यप्रमाणज्ञातिरात्नयाजिमहाभट्टारकविन्दलोचनाचार्य्यपुत्र-श्रीरामकविडिण्डिममुकुटरायमहापात्रकृतौ आनन्दलहरीभाष्यलोचने द्वितीयसुन्मीलनं सम्पूर्णम् ॥ * ॥

काञ्चीदेशसमुद्भवः कविवरः श्रीरामसड्डिण्डिमः
कृत्वा दिग्विजयं कविलहरीकोलाहलपराक्रमैः।
प्राप्य श्रीपुरुषोत्तमं पुरवरं तद्विप्रगोष्ठीसुखं
तेषां हर्षकृते चकार महतीं टीकां मृडानीस्तुतेः ॥
रेखामण्डलमध्यमानवतिचक्र (?) प्रहाख्यामतो
भानूभानुतनूद्भवेऽथ शशिनं केतौ कुजं मण्डले।
सौम्ये चैव विधुन्तुदे सुरगुरुं भौमे भृगुश्चोदरे
सौरिमण्डलके गते तमिने केतुबुधस्तमयन ॥ (?) सम्वत् १८३२ ॥

विषयः। आनन्दलहर्य्याव्याख्यानम्।

No. 34. आयुर्वेदपरिभाषा। Substance, country-made paper, 16 x 6 inches. Folia, 19. Lines, 5 on a page. Extent, 350 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Mayamansimha, Parganā Āṭiyā, Post Jāmurki, Gram Háláliá, Paṇḍit Yadunāth Bhaṭṭācaryya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः शिवाय।

जयति गगनैकदीपः प्राची वदनैकदर्पणस्तपनः।

उदयाचलैकतिलकस्त्रिभुवनमुकुटैकमाणिक्यः।

आयुश्शास्त्रानुसारेणोत्पन्नसन्दिग्धार्थप्रकाशिकाः।

परिभाषाः प्रवक्ष्यन्ते दीपभूताः सुनिश्चिताः।

तत्राद्यं यथा विदारीगन्धादिसाधितेन तैलानुवासयेदित्यत्र क्वाथकल्कौ नोक्तौ अत्र यथाधिकरणेनोक्तिरित्यादिपरिभाषा। इत्यादि।

End. कराङ्गुलीपर्व्वणाग्रं द्रवमध्ये निमज्जयेत्।

तदग्रं यावदुत्तिष्ठेत् द्रवं तद् विन्दुसंज्ञकम्॥

Colophon. इत्यायुर्व्वेदपरिभाषा समाप्ता। शकाब्दाः १७५०।

स्वाक्षरं श्रीसदानन्दशर्म्मणः पुस्तकम्।

विषयः। सुविस्तृतवैद्यकग्रन्थेषु यानि नोक्तानि तेषामेव सङ्कलनम्।

No. 35. आर्य्यास्तवः। Substance, palm leaf, 14 x 1 inches. Folia, 3. Lines, 4 on a page. Extent, 48 çlokas. Character, Bengali. Date ? Place of deposit, Purī S'aṃkara Maṭha. Appearance, old. Verse. Generally correct.

Beginning. वैशम्पायन उवाच।

आर्य्यास्तवं प्रवक्ष्यामि यथोक्तमृषिभिः पुरा।

नारायणीं नमस्यामि देवीं त्रिभुवनेश्वरीम्।

त्वं सिद्धिः धृतिः कीर्त्तिर्श्रीर्विद्या सन्नति x x।

सन्ध्या रात्रिः प्रभा निद्रा कालरात्रिस्तथैव च॥

आर्य्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी॥ इत्यादि।

End. ग्राधिंमस्तुभयश्चैव पूजिता नाशयिष्यसि ।

× × × × ×

एवं तान्तु समादिश्य गतोऽन्तर्धानमीश्वरः ॥

× × ×

Colophon. इति खिलहरिवंशे स्तव × × विधाने ग्रार्य्यास्तवः समाप्तः

विषयः । श्रीदुर्गायाः स्तुतिः ।

No. 36. ग्रार्हत्तिपादः । By ग्रानन्दतीर्थः । Substance, country-made paper, 16×6 inches. Folia, 12. Lines, 22 on a page. Extent, 300 çlokas. Character, Nāgara. Date ? Place of deposit, late Hariścandra Babu, Benares City. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

वठतरमूलनिषन्नं पठुतरमसलात्मबोधने विमलम् ।
नाटितविनेयहृदयाविद्यं विश्वेश्वरं वन्दे ॥
नवनीरदनिर्मलप्रभो
नवनीतादपि कोमले हृदि
तपोनीरधिशीतदीधिति-
र्जयतात् सत्यवतीसुतः कृती ॥

End. शंकरभगवत्पादाद्दतरीत्या ग्राहृत्तिसूत्रमिदम् ।
ग्रानन्दतीर्थदेशिकशिखामणीन्द्रैर्विवेचितं विशदम् ॥
ग्रसकृदिति कथितविषये भगुवल्लीसुपद्धतिः पुनर्भणिता ।
येऽयं साध्याहृत्तौ लिङ्गं भवतीति योजितं योग्यम् ॥
ज्ञानहृत्तौ ज्ञानोपदेशसमहेतुसन्निवेशेन ।
ग्रानन्दतीर्थवर्यैरुपदेशसहकृन्निरूपितो हेतुः ॥

Colophon. ... ...

विषयः । उत्तरमीमांसाव्याख्या ।

No. 37. आसुरीतन्त्रम्। Substance, country-made paper, 10 × 4 inches. Folia, 6. Lines, 9 on a page. Extent, 100 çlokas. Character, Nāgara. Date ? Place of deposit, Harapura, Jagadeva Paṇḍit, P.O. Gopālganj, Chapra. Appearance, tolerable. Prose and Verse. Correct.

Beginning. श्रीगणेशाय नमः। कार्त्तिकेय उवाच।

विधिं कथय मे तात आसुरीकल्पमिच्छया।

ऋतुकालतिथिनक्षत्रं को मासः कोऽपि वासरः॥

किं हि वर्णस्य का वेला किं ध्यानं तस्य कारयेत्॥ इत्यादि।

End. ब्रह्मविष्णुशिवादीनां वाहि मांस सुरार्चिते। ?

ॐ मूलमन्त्रेण आसुरि देवि इहागच्छागच्छ श्रीआसुरीदेवी सत्यम्।

Colophon. इति आसुरीतन्त्रं समाप्तम्॥

विषयः। मारणविध्यादिकथनम्।

No. 38. आह्निकचन्द्रोदयः। By विष्णुशर्म्मा। Substance, country-made paper, 10 × 4 inches. Folia, 274. Lines, 8 on a page. Extent, 4,200 çlokas. Character, Nāgari. Date, Saṃvat 1928. Place of deposit, Patna City, Sanskrit Sanjīvanī, Paṇḍit Jayanārāyaṇa Bājapeyī. Prose and Verse. Appearance, new. Incorrect.

Beginning. श्रीगणेशाय नमः।

जयन्ति हरिपादाब्जपरागाः संस्कृता ध्रुवाम्।

अन्तर्बहिः शरीराणि पुनानाः सत्सकर्मसु॥

श्रुतयः स्मृतयो भिन्नाः सूत्राणि मुनयस्तथा।

मेनिरे कर्मण (?) ज्ञातं दर्शनाल्लसचेतसा॥

+ + + + + +

तन्मुखपङ्कजं नमयितुं चन्द्रोदयः सेव्यताम्।

× × × × × ×

अथ यजुर्वेदमाध्यन्दिनशाखिनामाह्निकं कर्माभिधीयते.

यत आह विष्णुपुराणे।

वर्णाश्रमाचारवता पुरुषेण परः पुमान्।

विष्णुराराध्यते पन्था नान्यत् तत्तोषकारणम् ।

इति परमपुरुषार्थभूतहरिसन्तोषसाधनतया विधानम् ॥

End. एकोनविंशतेरर्व्वागिकाहस्य ततो द्वयम् ।

विंशत्यूर्द्धमुत्तरेषु त्रिरात्रमशुचिर्भवेत् ॥

इति षष्ठादशदिनमवधिः प्राक्पदोपादानात् क्वचित् चतुर्दशदिनादर्व्वा-
गिति पाठः ॥ तत्र स्नानमारभ्य गणनया तु अविरोध एव ।

× × × × × ×

इति रजःस्वलाधर्म्मः ।

× × × × × ×

ज्ञात्वा स मूलवाक्येषु कर्म्मणः ।

प्रयोगोऽबुधबोधाय क्रियते विष्णुना पुनः ॥

Colophon. इति श्रीमन्मिश्राग्निहोत्रदीक्षितयज्ञदत्तात्मजस्वधामाङ्ग्निचित्सपतिमहा-
याज्ञिकश्रीविष्णुशर्म्मविरचिते चन्द्रोदयाह्निके प्रथमः प्रयोगनिर्णयः ॥
शुभं भूयात् संवत् १९१८ ॥

विषयः । द्विजानां आह्निकश्राद्धादिप्रयोगकथनम् । रजःस्वलाधर्म्मकथनञ्च ॥

No. 39. ईशावास्यभाष्यटिप्पनम् । "प्रकटार्थकारीयम्" Substance, country-made paper, 18×6 inches. Folia, 12. Lines, 20 on a page. Extent, 378 çlokas. Character, Bengali. Date ? Place of deposit. Rājaguru Maṭha, Ganeśamahallā, Benares City. Appearance, old, Prose. Incorrect.

Beginning. ॐ नमो गणेशाय ।

येनात्मनापरेणेशाव्याप्तं विश्वमशेषतः ।

सोऽहं देहद्वयीसाक्षी वर्जितो देहतद्गुणैः ॥

ईशावास्यमित्यादिमन्त्रान् व्याचिख्यासु भगवान् भाष्यकारः तेषां कर्म्मशेष-
त्वाशङ्कान्तरे (?) दस्यति ।

End. मुख्यार्थग्रहणे हिरण्मयादिमन्त्रे (...) मार्गयाचनमनुपपन्नं स्यात्, न तस्य
प्राणा उत्क्रामन्त्यत्र (...) समश्नुते इत्यादिश्रुतेः, अतो मुख्यार्थे बाधा-
द्गौणार्थग्रहणं इत्यर्थः । यस्मादर्थान्तरं न संगच्छते तस्मादित्युपसंहारः ॥

ईशाप्रभृतिभाष्यस्य शाङ्करस्य प्रवीयसः ।
मन्दोपकृतिसिद्ध्यर्थं प्रणीतं टिप्पनं स्फुटम् ।

Colophon. इति ईशावास्यस्य श्रीशङ्करकृतभाष्यस्य ठिप्पनं प्रकटार्थकारीयं समाप्तम् ।

विषयः । ईशावास्यभाष्यव्याख्या ।

No. 40. उखासम्भरणकाण्डभाष्यम् । Substance, country-made paper, 12×6 inches. Folia, 154. Lines, 22 on a page. Extent, 3,100 çlokas. Character. Nāgara. Date ? Place of deposit. Paṇḍit Govinda Bhaṭṭa, Benares City. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । इत्यादि ।
हिरण्यगर्भकर्तृकैव सृष्टिराम्नाता, अग्रे प्रपञ्चसृष्टेः पुरा इदं जगत् इत्यादि ।

End. मन्त्रगतदशसंख्याद्वारेणाग्निरपि विराट् चीयमानस्याग्नेर्विराडात्मकत्वात् वा ऊर्ध्वाधोदिगपेक्षयादिशोदशान्यभिर्दशमीति श्रुतेस्तदपेक्षया प्राणा अपि दशगतमन्यत् ।

Colophon. इति सायनाचार्य्यविरचिते माधवीयेवेदार्थप्रकाशे-शतपथब्राह्मणषष्ठकाण्डे-ऽष्टमोऽध्यायः ।

विषयः । शतपथब्राह्मणषष्ठकाण्डस्य व्याख्या । प्रकृतिविकृतिभूतसोमयागाङ्गभूतमन्त्र-व्याख्या ।

No. 41. उपाकर्म्मप्रयोगः । By चन्द्रचूडभट्ट । Substance, country-made paper, 12×5 inches. Folia, 8. Lines, 16 on a page. Extent, 128 çlokas. Character, Nāgara. Date, Saṃvat 1845. Place of deposit, Govinda Bhaṭṭa, Benares. Appearance, new. Prose. Incorrect.

Beginning. श्रीवेङ्कटेशाय नमः ।
ॐ यथाग्निः ख्याप्यते तथ प्राचीवदक्संख्या उदीचीः प्राक्संख्याखिषखिस्रो रेखा लिखित्वाङ्गिरवेश्च शेषमुत्सृज्य भूर्भुवस्वरोमित्यग्निं प्रतिष्ठाप्योत्तरेण पूर्व्वेण वाम्बतोयमुपदध्यात् । इत्यादि ।

End. अतात् सत्यमुपागां अधीता वै वेदाः, अयादिप्रतिपद्य मेऽपराधात् प्रभृत्य अभ्यपोदासनान्तं कृत्वा यथाशक्ति प्राभ्यपोद्दासनान्तं कृत्वा स्वाध्यायमधीयीत इति ।

Colophon. इति चन्द्रचूड़कृते संस्कारनिर्णये उपाकर्म समाप्तं ।

विषयः । श्रावण्यां पौर्णमास्यामुपवीतधारणविधिः ।

No. 42. उभयग्रहणव्यवस्थाधिकारः । Substance, country-made paper, 15×3 inches. Folia, 3. Lines, 10 on a page. Extent, 162 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garveta, Grām Khunverá, Babu Vaikuṇṭhanātha Cakravarti. Appearance, old. Prose. Generally Correct.

Beginning. अथ चन्द्रग्रहणाधिकारो लिख्यते ।

द्विघ्न इत्यादि । रवेरौदयिकास्फुटं द्वाभ्यां पूरयित्वा पर्य्यदर्शाच्चतुर्भिर्हृत्वा यल्लब्धं तेन युक्तं कुर्य्यात् ततो द्विरविर्भवति तमपि पृथक् लिखेत् ततः पुनरपि दिनदण्डमानीय पलस्थाने पर्य्यदण्डं दत्वा अष्टाभिः पूरयेत् ततो दशभिर्हरेत् लब्धं पूर्व्वधाभितराशभुवे मिश्रयेत् ॥ इत्यादि ।

End. रविग्रहणस्य यदि परिमितद्वादशभागन्यूनं तदा लोके ज्योतिर्विदा न निगद्यं चन्द्रग्रहणस्य यदि षोड़शभागन्यूनं तर्हि न कथनीयमिति ।

Colophon. इत्युभयग्रहणव्यवस्थाधिकारः समाप्तः । श्रीरामचन्द्रे मम मतिरस्तु सुदृढ़ा ॥

विषयः । चन्द्रसूर्य्ययोर्ग्रहणविषयिणी व्यवस्था ।

No. 43. छन्दोगव्याकरणसूत्राणि । By शाकटायनाचार्य्य।। Substance, country-made paper, 10×5 inches. Folia, 5. Lines, 20 on a page. Extent, 105 çlokas. Character, Nágara. Date ? Place of deposit, Pātāleśvara, Benares City, Paṇḍit Bahuballabha Chatterji. Appearance, new. Prose. Correct.

Beginning. ॐ नमः सामवेदाय ।

अथ वाचो वृत्तिं व्याख्यास्यामो वायुं प्रकृतिमाचार्य्या वायुर्मूर्द्धन् वाचो भवति वाचो नाद इति शाकटायनो वायुरयमस्मिन् काये मूर्द्धन्यवतीत्येषोऽर्थः । इत्यादि ।

End. अन्नाचरात् । उपसर्गात् रा × स्यं ? । उद् स्थाये । चाक्षीगते ? । संध्या इन्त्ये स्वर्य्यः । षाइन्त्यः । स्वरोमन्त्यं इति चतुर्थः ।

Colophon. इति छन्दोगव्याकरणसूत्राणि समाप्तानि ।

विषयः । सामवेदीयव्याकरणम् ।

No. 44. एकाग्निकाण्डमन्त्रव्याख्या (सन्देहविषौषधी)। By मुरहरदत्तसूरि । Substance, country-made paper, 9×5 inches. Folia, 47. Lines, 38 (?) on a page. Extent, 1,880 slokas. Character, Nágara. Date ? Place of deposit, Benares City, late Babu Hariscandra. Appearance, old. Prose. Correct.

Beginning. (अस्य प्रथमतो द्वे पत्रे न स्तः। तेन तृतीयपत्रप्रारम्भवाक्यं लिखितं) अन्या अस्या वध्वाः परिष्वज्ञे परिष्वङ्गाय पर्य्याप्तं एवं भूतं विवाहकर्मप्रवर्त्तितवन्तः ।

End. एतमर्थं मृत्युलक्षणं नानुगात्, ततश्च शतं शरदः पुर (+ +) न् बहून् दिवसान् जीवन्तु, मृत्युं त्वनेन पर्व्वतेनाश्मना तिरोदधतां तिरोहितिं कुर्व्वन्तु । इति द्वाविंशः खण्डः ।

Colophon. इति श्रीपदवाक्यप्रमाणज्ञमहामहोपाध्यायमिश्रहरदत्तसूरिविरचितायामेकाग्निकाण्डमन्त्रव्याख्यायां सन्देहविषौषध्यां द्वितीयः प्रश्नः ।

विषयः । शतपथब्राह्मणस्य एकाग्निकाण्डीयमन्त्रव्याख्या ।

No. 45. एकार्थाख्यातपद्धतिः । By भट्टमल्लसूरि । Substance, palm-leaf, 12×1½ inches. Folia, 39. Lines, 4 on a page. Extent, 1,200 slokas. Character, Uria. Date ? Place of deposit, Purī, Rajgopal Maṭha, Mohanta S'rí Raghunandan Rámánuj Dās. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीहृदेवाय नमः ।
भूवार्य्यादिप्रकृतये पुरुषत्रयमूर्त्तये ।
सदाख्यातपदार्थाय परमात्मात्मने नमः ॥
संस्कृत्य गुरुपादाब्जे भट्टमल्लेन रच्यते ।

व्युत्पित्सूनां प्रमोदार्थमेकार्थाख्यातपद्धतिः ॥
सत्तायामस्ति भवति विद्यते चाथ जन्मनि ।
उत्पद्यते जायते च प्ररोहत्युद्भवत्यपि ॥ इत्यादि ।

End. इति चेट् पिबतिश्चस्य कथन्तासु विभाषया ।
युतादेर्लुङि विद्भ्यःस्यसनोर्लुटि च कल्प्यते ॥
परस्मैपदमन्यस्मात् तथा शिष्टप्रयोगतः ।
श्रीमतो भट्टमल्लाख्यात्रिःस्तैषा कलानिधेः ॥
विद्वच्चकोरैराचम्या भवत्याख्यातचन्द्रिका ।
त्रयीमूर्त्तिर्भगवतः सम्प्रहृत्यप्रसादतः ॥
त्रैलोक्यचक्षुर्भूतस्य तस्य प्रीत्यै प्रकल्प्यताम् ।
अनुष्टुभां भट्टमल्लश्चक्रे सप्तशतानि तु ॥

Colophon. इति श्रीभट्टमल्लविरचितः क्रियानिघण्टः समाप्तः । श्रीमज्जगन्नाथाय नमः

विषयः । धातुगणकथनम् ।

No. 46. ऐतिह्यतत्वराद्धान्तः । By निम्बादित्य । Substance, country-made paper, 5 × 4 inches. Folia, 112. Lines, 7 on a page. Extent, 1,400 slokas. Character, Nágara. Date ? Place of deposit, Kailadeva Maṭha, District Chapra. Appearance, old. Verse. Generally correct.

Beginning. श्रीमते निम्बादित्याय नमः ।
ॐ नमः कृष्णाय हंसाय निम्बार्कायानिरुद्धतः ।
आचार्याय चतुर्व्यूहपरम्पराप्रवर्त्तिने ॥
सम्प्रदायविहीना ये मन्त्रास्ते विफला मताः ।
अतः परम्परा सेव्या प्रयत्नेन मनीषिभिः ॥
पारम्पर्य्यान् गुरून् नत्वा विगीतभ्रान्तिनुत्तये ।
ऐतिह्यतत्वराद्धान्तः सन्धीयतेऽनुसन्धये ॥
कृष्णोहंसोऽनिरुद्धोऽत्र निम्बार्क इति विश्रुतः ।
आद्याचार्य्यश्चतुर्व्यूह ऐतिह्यमूलरूपकः ॥
सनत्कुमारसनकसनन्दनसनातनाः ।
अयं तस्य चतुर्व्यूहः शिष्यो नैष्ठिकशेखरः ॥

End. साक्षं स्वकैर्विजयवेऽत्र विराजमानाः ।
भक्तैश्च पञ्चरसपैः परिशीत्यमानाः ॥
भक्तिःश्रिया समरमित्यनुभावयन्ति ।
ये वैष्णवाः परमभागवताः प्रतीताः ॥
ते भक्तिदुर्गमजरं शरणं भजन्तः ।
पादारविन्दविभवानुभवाय कल्पाः ॥
तिष्ठन्ति कृष्णचरणाम्बुजदुर्गनिष्ठाः ।
रक्षेति भक्तिसुतपुत्रवदेव नित्यं ॥

Colophon. ऐतिह्य तत्त्वराद्धान्ते निम्बादित्यविनिर्मिते ।
श्रीभक्तिशरणसंवित्तौ द्वादशः सन्धिराजितः ॥ ?
श्रीमते निम्बादित्याय नमः ।

विषयः । १ सन्धौ चाद्याचार्य्याद्यानुसन्धिकथनम् । २ सन्धौ कृताचार्य्यानुसन्धिकथनम् । ३ सन्धौ त्रेताचार्य्यानुसन्धिकथनम् । ४ सन्धौ द्वापराचार्य्यानुसन्धिकथनम् । ५ सन्धौ कल्याचार्य्यानुसन्धिकथनम् । ६ सन्धौ सम्प्रदायानुसन्धिकथनम् । ७ सन्धौ गुप्तचर्य्यानुसन्धिकथनम् । ८ सन्धौ मताचार्य्यानुसन्धिकथनम् । ९ सन्धौ अन्वयाश्रमानुसन्धिकथनम् । १० । ११ सन्धौ रसभावानुसन्धिकथनम् । १२ सन्धौ श्रीभक्त्यनुसन्धिकथनम् ।

No. 47. ऐतिह्यराद्धसंवेद्यं । Substance, country-made paper, 13×6 inches. Folia, 40. Lines, 12 on a page. Extent, slokas. Character, Nágara. Date, Samvat 1949. Place of deposit, Kailadevā Maṭha, Hatwa. Appearance, new. Prose. Incorrect.

Beginning. श्रीमते भगवन्निम्बार्काय नमः ॥
पारम्पर्य्यात् गुरून् नत्वा कृष्णकुमारनारदान् ।
ऐतिह्यराद्धसंवेद्यं वक्ष्ये निम्बार्कसंविदे ।
× × × ×
विगीतं श्रूयते यत्तु यस्मान्नो चाप्तसंविदा ।
निगमादिप्रमाणैः सा सवत्सया विविच्यते ।
विगीतभ्रमसंनुत्यै सवत्सा लिख्यतेऽधुना ।
एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ॥

इत्यथायं विवेकस्तु करणीयो विवेकिभिः ।
हरेस्तुर्य्यविभागोऽंशः कलाः षोड़शभागशः ॥

End. ऐतिह्यतत्त्वसंवेद्य इति राद्धान्तनुद्धृतः ।
तत् सम्प्रदायसम्बध्यान् निम्बार्कसम्प्रदायिनः ॥
यन्नामतः प्रसिद्धास्ते तस्मै भगवते नमः ।
निम्बार्काख्यानिबद्धाय कुमाराय नमो नमः ॥
नारदाय नमस्तस्मै निम्बादित्याय वै नमः ।
श्रीनिवासाय गुरवे भगवते नमोनमः ॥
चतुर्युगविमोचकान् नैष्ठिकब्रह्मचारिणः ।
प्रथमाश्रमः सदाचार्य्यानसंख्यकल्पजीविनः ॥
निम्बादित्यैः सदा चिन्त्यं न देयं त्रिगुणात्मनां ।
ऐतिह्यतत्त्वसंवेद्यं हंसैरेव विविच्यताम् ॥

Colophon. इति ऐतिह्यतत्त्वसंवेद्ये कलौ युगे श्रीमत्-श्रीनिवासाचार्य्याधिकारे श्रीमन्निम्बादित्याश्रुसिक्तप्रकाशितः पञ्चमोऽध्यायः । लिखितं राधामोहन-ब्रजवासिना वृन्दावने समाप्तः ग्रन्थः संवत् १९४९ ॥

विषयः । १ अध्याये ऐतिह्यमुखेन निम्बार्काख्यानिबद्धाधिकारकथनम् । २ अ॰ सत्य-युगे चतुःसनाधिकारकथनम् । ३ अ॰ त्रेतायुगे नारदाधिकारकथनम् । ४ अ॰ द्वापरयुगे निम्बादित्याधिकारकथनम् । ५ अध्याये निम्बादित्यपद्धतिप्रमाणकथनम् । चतुर्युगाचार्य्याश्रम-स्तवकाष्टककथनं तथा कलियुगे श्रीनिवासाचार्य्याधिकारकथनम् ॥

No. 48. ऐतरेयभाष्यविषमपदव्याख्यानं । Substance, country-made paper, 11×4 inches. Folia, 64. Lines, 26 on a page. Extent, 1,920 slokas. Character, Nágara. Date, Samvat 1775. Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. कस्यचिन्महर्षेरितराख्यायाः पत्न्याः पुत्रो महीदास ऐतरेयो भूम्या लब्धवरः तस्य मन × × × अग्निर्वै देवानां इत्यादि ब्राह्मणं, अथ महाव्रत-मित्यादि आरण्यचतुष्टयं च प्रादुरभूत् । तत्र विषमपदानि स्पष्टीक्रियन्ते अग्निर्वै देवानामिति । इत्यादि ।

End. यदि पापाचसदृशमिरस्को भवति, प्रबल इत्यर्थः. तथापि अयं कर्म्मविशेषः शीघ्रमेव एनं सूघुवे छिनत्ति इति ।

Colophon. इति अष्टमपञ्चिकायां पञ्चमोध्यायः समाप्तः । पञ्चिकापि समाप्ता । सायनाचार्य्यविरचितमाधवीयवेदार्थप्रकाशान्तर्गतविषमपदव्याख्यानं समाप्तं ॥ ॥

विषयः । ऐतरेयब्राह्मणस्य सायनभाष्यस्य विषमपदव्याख्या ।

No. 49. कपर्द्दिकारिका । Substance, country-made paper, 10×5 inches. Folia, 57. Lines, 12 on a page. Extent, 1,416 slokas. Character, Nágara. Date ? Place of deposit, Benares City, Vāmanācārya. Appearance, old. Verse. Correct.

Beginning. चयाणामेव वर्णानां सर्व्वयज्ञेष्वधिक्रिया ।
स्थानन्तरेकाक्षराभिः पत्नीभिः स्यान्न शूद्रया ॥
१० । अनेक यजमानत्वे कर्मणा ब्राह्मणेन तु ।
सह प्रयोगो यज्ञः स्यात् ताभ्यः × × स्य न कचित् ॥ ?

End. उक्तं शास्त्रं विकल्पस्तु विहतिरवगम्यते ।
छलेवोदवसानीयामुतृष्टानामुपायनम् ॥

Colophon. अष्टमः पटलः ।

विषयः । आपस्तम्बप्रयोगविधानकारिका विंशतिप्रश्नपर्य्यन्ता ।

No. 50. कप्फिणाभ्युदयः । By काश्मीरभट्टशिवस्वामी । Substance, palm-leaves, 16×1 inches. Folia, 79. Lines, 4 on a page. Akṣaras, 90 on a line. Extent, slokas. Character, Uria. Date ? Place of deposit, Dāmodarpur S'āsana, Zilla Purī, late Paṇḍit Gopīnāth Misra. Appearance, tolerable. Verse. Incorrect.

Beginning. श्रीकृष्णः शरणम् ।
सर्व्वज्ञतादिगुणगोचरमायथार्थी
या ध्येया यतोऽपि यतिबन्धुरगाधबोधा ।
सामान्यनिर्भूतचतुर्विधविभ्रमार्त्ति
मूर्त्तिर्हमां दिशतु दाशवती शिवं वः ॥ (?)

अस्ति प्रथा परमदैत्यसुखाय नाभिः
स्तृता गजाननगुहावसिताधिबिम्बं ।
लीलावतीति नगरी कलितावदाना
दुर्गेव भावितरणा हरिणाङ्कलेन ॥
या तुङ्गसौधतलकीलितकेतुदण्ड-
षण्डैर्जवाञ्जलसुचामभिपाठितानां ।
उत्सङ्गिनीभिरवतंसपताकिकाभि-
र्बन्धं यथादिवदिवो व्रणपट्टिकाभिः ॥
यत्रान्धकारिचलशाकजवैजयन्ती
र्द्यामसारशिखरैर्भृशमिन्द्रनीलैः ।
ओकोभिराकुलमरुच्चलितैघसिन्धु-
र्विच्छिन्नवीचिवलयस्य विहायसः श्रीः ॥ (?)
... ...
तस्यामहीनकटकस्फुटवीरभद्र-
सम्पृक्तशक्तिमहिमाघ्टतभूरिशोभः ।
भूभृद् बभूव बहुदर्शनभोग्यमूर्त्तिः
श्रीकप्फिणः प्रभुरिवेन्दुकलावचूडः ॥ इत्यादि ।

End, तरसि हरसि वेरासुहसैतो विपन्ना
वरकिरगममन्तासामिकाले हि भावं ।
सरसमहिमबन्धापरिरङ्गन्तमाहं
कलचतमविरुहासम्महे आसवेश्नोः ॥ ?

Colophon, इति श्रीकप्फिणाभ्युदये महाकाव्ये समसंस्कृतप्राकृतभाषासमावेशो नामैकोनविंशःसर्गः ॥

विषयः । इति श्रीकाश्मीरभट्टशिवस्वामिनः कृतौ कप्फिणाभ्युदये लीलावतीनगरीतन्नरेन्द्र-वर्णनं नाम ।१। चरविक्षेपन्यासो नाम ।२। सभासंक्षोभो नाम ।३।४। दूतसम्प्रेषणो नाम ।५। पर्व्वतवर्णनं ।६। शिविरसन्निवेशो नाम ।७। ऋतुवर्णनं नाम ।८। कुसुमक्रीड़ाशापो नाम ।९। सलिललीलावर्णनं नाम । १० । दिगन्तवर्णनं । ११ । प्रसाधनवर्णनं नाम। १२ । आपान विवशो नाम । १३ ।सुरतसम्भोगवर्णनं नाम। १४ । १५ । इति—१६ । सङ्कुलयुद्धो नाम ।१७। युद्धवर्णनम् । १८ । समसंस्कृतप्राकृतभाषासमावेशः। १९ ।

No. 51. "कल्पान्तर्वाच्यम्" । Substance, country-made paper, 12 × 4½ inches. Folia, 53. Lines, 26 on a page. Extent, 2,120 slokas. Character, Nágara. Date ? Place of deposit, Dinmaṇḍalācārya Mahārāja Bālacandra Sūri, Benares City. Appearance, old. Prose. Correct.

Beginning. पुवाः प + + मति श्रुतावधिमनः कैवल्यमङ्गा विभो-
स्तमध्ये श्रुतनन्दनो भगवता संस्थापितः स्वे पदे ।
षडोपाङ्गमयः सपुस्तकगणाध्यायोपलब्धोदयः ।
श्रीमिद्वाभिधभूपतिर्मन्त्रवरामात्यश्चिरं नन्दताम् ॥

End. यावल्लेखकरे गभस्तिकटके धत्ते धरित्री वधूः ।
तावन्नन्दतु धर्मकर्मनिरतः श्रीमद्भट्टारकः ॥

Colophon. इति श्रीकल्पान्तर्वाच्यं सम्पूर्णम् ।

विषयः । जैनसाधूनां कर्त्तव्याकर्त्तव्यकथनम् ।

No. 52. कल्याणमन्दिरवृत्तिः । By समयसुन्दरगणि । Snbstance, country-made paper, 12 × 4½ inches. Folia, 8. Lines, 34 on a page. Extent, 238 slokas. Character, Nágara. Date, Samvat 1695. Place of deposit, Dinmaṇḍalācārya Mahārája, Bālcandra Suri, Benares City. Appearance, old. Prose. Correct.

Beginning. पार्श्वनाथं जिनं नत्वा सिद्धार्थं सृजति स्फुटं ।
कल्याणमन्दिरस्तोत्रव्याख्यां समयसुन्दरः ॥

End. अस्मिन् महास्तवे महाकविविरचितकाव्यं प्रतिमन्त्राक्षरं संभाव्यते, परं वृत्तिकारैस्तथाविधाम्नायानां अभावात् न दर्शितास्ततो मयापि न लिखिता भक्तामः ? इत्यद्वृत्तिकारक इव परं गीतार्थैः समुपस्थापित- स्वयं ज्ञेयाः ।

Colophon. संवत् १६९५. इति श्रीसमयसुन्दरगणिविरचिता श्रीकल्याणमन्दिरवृत्तिः

विषयः । कल्याणमन्दिरस्तोत्रव्याख्या ।

No. 53. कविकर्पटी । By शङ्खधर । Substance, country-made paper, 10×4 inches. Folia, 13. Lines, 10 on a page. Extent, 250 ślokas. Character, Uriā. Date ? Place of deposit, Puri S'añkara Maṭha. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।

यः कातन्त्रसुधानिषण्णकलसः साहित्यरत्नालयः

सानन्दस्फुटगद्यपद्यरचनाप्रागल्भ्यशब्दोदयः ।

षट्तर्काम्रतपूरपूर्णवदनः सद्वृत्तचन्द्रोदय-

स्तस्येयं कविकर्पटीकरचनाकण्ठे प्रतिष्ठाप्यताम् ॥

यत्नादिमां गतां विधाय × × ।

श्रुतोपदेशाद्विदितोपदेशः ।

अज्ञातशब्दार्थविनिश्चयोऽपि

श्लोकं करोत्येव सभासु शीघ्रम् ॥

आदौ तावदनुष्टुप्वृत्तेन चन्द्रवर्णनमारभ्यते ।

तत्र प्रथमपादे पश्चाच्चरेण गङ्गाप्रवाहः । मृणालनालः । शङ्खसञ्चयः ।

इत्यादि ।

End. अथ शार्दूलविक्रीड़ितं । तत्र प्रथमपादे—

विख्यातोगुणशालिकागुणमयः ।

विद्याभिः परिपीड़ितः कविरयं ।

× × × × × ×

पुनः । वागीश्वरोयं न्टपः । जीयादयं भूपतिः ।

भूयोपमाल्लोक्यतां ? । विज्ञानपारायणः । विद्वानयं राजते ॥

Colophon. इति श्रीकविराजशङ्खधरविरचिता कविकर्पटी समाप्ता ।

विषयः । नानाविधकविताप्रणयनोपयोगिनी पुस्तिका ।

No. 54. काठकोपनिषद्भाष्यटिप्पनम् । Substance, country-made paper, 10×4 inches. Folia, 20. Lines, 16 on a page. Extent, 320 ślokas. Character, Nágara. Date ? Place of deposit, late Babu Hariṣcandra, Benares City. Appearance, old. Prose. Correct.

Beginning. (अस्य प्रथमतः द्वे पत्रे नस्तः) ।

नूनमिति—श्रुत्यनुक्त—पूर्व्वभाषादीनामपि कथायामापेक्षितं, पुरयति स

एवमुक्तः पिबेति। प्रेतीभूतोयमागतो नावलोकनीय इति मन्नोपेक्षां यथा न करोति तथा प्रसादं कुर्वित्याह—किञ्च त्वत्प्रहृतमिति।

End. नान्यद्रूपमर्चिरादिमार्गगम्यं × × × संयोगस्य वियोगावसानत्वादित्यर्थः, एवं शब्दस्य चिच्छब्देन सह सम्बन्धः एवं चिदिति।

Colophon. इति शाङ्करस्य काठकोपनिषद्भाष्यस्य टिप्पनं समाप्तम्।

No. 55. कारिकादर्पणः। By वरदकवि। Substance, country-made paper, $12 \times 5\frac{1}{2}$ inches. Folia, 49. Lines, 12 on a page. Extent, 1,800 ślokas. Character, Nágara. Date ? Place of deposit, Puri Rájgopal Maṭha, Mohanta S'rí Raghunandan Rámánuj Dás. Appearance, fresh. Prose and Verse. Generally correct.

Beginning. श्रीमते निगमान्तमहागुरवे नमः।
श्रीमान् वेङ्कटनाथार्य्यः कवितार्किककेशरी।
वेदान्ताचार्य्यवर्य्यो मे सन्निधत्तां सदा हृदि॥
प्रणौमि प्रणवस्यार्थौ दम्पती जगतां पती।
नाभिपङ्कजनीड़स्य वेधः कौरगिरोत्सुकौ॥
वन्देऽहं निगमान्तार्य्यचरणाम्भोरुहद्वयं
यद्रेणवो नृणां मुक्तिनिर्म्माणपरमाणवः॥
विगाहे निगमान्तार्य्यविष्णुपादसमुद्भवां।
रहस्यत्रयसाराख्यां विस्रोतसमकल्मषाम्॥
आत्रेयं वरदाचार्य्यसम्मताचार्य्यमाश्रये।
तत्सुतं श्रीनिवासार्य्यं तारकं माहशामपि॥
आत्रेयं सुन्दराचार्य्यमस्मदग्रजमाश्रये।
सर्व्वशः सम्प्रदायं यो बालिशं मामशिक्षयत्॥
आत्रेयश्रीनिवासार्य्यसुतोऽहं वरदः कविः।
रहस्यत्रयसारस्य व्याकुर्व्वे कारिकाः क्रमात्॥
जगति निगमचूड़ाचार्य्यवाचारहस्य-
निधिमिव जननाभ्यो निर्भयः साहसिक्यात्।
प्रकटयितुमसाध्ये संप्रवृत्तोऽस्मि यद्वा
प्रतिभुव इव तस्मै देशिका दर्शयन्ति॥

तत्र भगवान् वेदान्ताचार्य्यो निखिलजगदुज्जीवनाय श्रीरहस्यत्रयसाराख्यं मोक्षशास्त्रं प्रणिनाय इत्यादि ।

End. गुरुरेव परायणं गुरुरेव परागतिरित्यादि श्रुतिवदाहरन्ति अत्तोर इत्यर्थः । तस्मादिहामुत्र च तत् पादौ आचार्य्यपादौ शरणमिति देशिका यामुनादयो विदुः अत्र परत्र चापि नित्यं यदीयचरणे शरणं मदीयमित्याभि × × तस्मादाचार्य्यचरणावेव शरणमिति सर्व्वदा न्यस्तभरैः सुखेन वर्त्तितव्यमिति भावः ॥

Colophon. इति श्रीमदात्रेयवरदाचार्य्यचरणाम्बुजचञ्चरीकस्य तत्सुत श्रीनिवासाचार्य्यकरुणैकजीवितस्य वरदकवेः कृतौ कारिकादर्पणे सम्प्रदायभागस्तुरीयः ।
बालस्य मेऽग्रजो भ्राता पितामह इवापरः ।
सारज्ञः सुन्दराचार्य्यः सम्प्रदायानुपादिशत् ॥
क इह निगमचूडाचार्य्यसूक्तौ निगूढं
करबदरकृतौ स्वार्थं विना सादशिक्यात् ॥
निधिमिव जननाम्भोनिर्भयो वा तथापि
प्रतिभुव इव यस्मै देशिका दर्शयन्तु ॥

विषयः । वेङ्कटाचार्य्यकृतस्य रामानुजसम्प्रदायविभाजनविषयकस्य रहस्यत्रयसारनामकस्य ग्रन्थस्य विस्तरतोऽर्थप्रकाशनादिकम् ।

No. 56. कार्त्तिकमाहात्म्यम् । (नानापुराणीयम्) । Substance, country-made paper, 12 × 5 inches. Folia, 57. Lines, 12 on a page. Extent, 1,600 slokas. Character, Nágara. Date V. S. 1836. Place of deposit, Puri S'aṅkara Maṭha. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः
स्कन्द उवाच ।
पापिनां पापसङ्घातं प्रसह्य निजतेजसा ।
हरन्ति सर्व्वतीर्थानि प्रयोगस्य बलेन हि ॥
तानि सर्व्वाणि तीर्थानि माघे मकरगे रवौ ।
प्रत्यब्दं निर्म्मलानि स्युस्तीर्थराजसमागमात् ॥
प्रयागश्चापि तीर्थेन्द्रः सर्व्वतीर्थार्पितं मलं ।

× × × × × × ×।

यत् सञ्चयन्ति पापौघमाचर्षं तीर्थनायकः ।

तमेकमज्जनादूर्जे तत्र पाञ्चनदे ध्रुवम् ॥

… … … … … … …

प्रयागे माघमासे तु सम्यक् स्नानस्य यत् फलं ।

तत् फलं कार्त्तिके काश्यां पञ्चनद्यां दिने दिने । इत्यादि ।

End. माहात्म्यमेतदाकर्ण्य पूजयेत् तत्र वाचकं ।

गोभूहिरण्यवस्त्रैस्तु विष्णुतुल्यो यतो हि सः ॥

वाचके पूजिते यस्माद् विष्णुर्भवति पूजितः ।

तस्मात् तं पूजयेन्नित्यं यदीच्छेत् सफलं श्रुतम् ॥

Colophon. इति स्कन्दपुराणे कार्त्तिकमाहात्म्यं समाप्तं । शुभं भूयात् ।

रसशुचिवसुचन्द्रैः सम्मिते विक्रमाब्दे

सहसि शशितिथौ जीवे हरेः कीर्त्तनस्य ।

गिरिधरद्विजवर्य्येणारचीदं सुपुस्त-

ममृतमिव हृदि स्याद् वैष्णवानां जनानाम् ॥

विषयः । इति श्रीनारदीयपुराणे कार्त्तिकमाहात्म्ये प्रथमोऽध्यायः। इति धर्म्माङ्गदचरिते। इति श्रीपद्मपुराणे। इति श्रीसर्व्वपुराणे कार्त्तिकमाहात्म्ये। इति पुराणसमुच्चये कार्त्तिकमाहात्म्ये। इति श्रीपुराणसारोद्धारे कार्त्तिकमाहात्म्ये। इति पुराणसमुच्चये कार्त्तिकमाहात्म्ये। इति ब्रह्माण्डपुराणे सारोद्धारे कार्त्तिकमाहात्म्ये नारदपितामहसम्वादे ईश्वरस्य महिमस्तोत्रं समाप्तं। इति श्रीपुराणसारोद्धारे कार्त्तिकमाहात्म्ये शालग्राममाहात्म्यं। इति सर्व्वपुराणे सारोद्धारे कार्त्तिकमाहात्म्ये शालग्रामशिलानिर्णयः। इति श्रीपुराणसारोद्धारे कार्त्तिकमाहात्म्ये तुलसी-माहात्म्यं। इति श्रीस्कन्दपुराणे ऊर्द्धपुण्ड्रमाहात्म्यं। इति श्रीस्कन्दपुराणे कार्त्तिकमाहात्म्यं।

No. 57. "काव्यप्रभावृत्तिः" Substance, country-made paper, 19×5 inches. Folia, 80. Lines, 12 on a page. Extent, 6,400 slokas. Character, Bengali. Date, Sana 1292. Place of deposit, Benares City, Babu Paresnath Ray, Kavirâja. Appearance, new. Prose. Incorrect.

Beginning. ॐ नमः शिवाय ।

निःशङ्कं निजकाव्यरत्नभवने सत्काव्यरत्नावली

रूपाया प्रविनीयया कृतसभापाङ्क्तिमावेशनात् ।

जातेऽगाधतमे समे कविमुखे सत्काव्यरत्नाकरे ।
देव्युन्मज्जनमज्जना जगति या क्रीड़त्यहं तां भजे ॥
ब्रह्माभौतिकमुत्तमाधममिदं सर्व्वं जगत्षड्रसं ।
देवज्ञाननिष्टत्तदेहनुष्टतं मन्ठासुखाद्यात्मकम् ॥ ?
तस्येह प्रतियोग्य यं कविरपि सष्टोत्तमं वाङ्मयं ।
स्वच्छन्देन सुखात्मकं नवरसं ब्रह्मापरतो जयेत् ॥ ?
काव्याख्यातरुणी सती गुणवती नित्यं रसोल्लासिनी ।
माणिक्याद्युपमादिरत्नघटितैर्भास्वत्सुवर्णात्मकैः ॥
नानालङ्करणैः सुशोभिततनुः कण्ठे प्रवक्तुः स्थिता ।
श्रोतॄणां हृदयङ्गताहमतिहृत् साध्वी तथाप्युच्यते ॥

End. इत्येतदग्निना प्रोक्तं काव्यालङ्कारशासनं ।
नये जानन्ति जानन्ति न ते काव्ये विचारणामिति ॥
इत्याग्नेये महापुराणे अग्निना प्रोक्ते काव्यालङ्कारशासने काव्यदोषलक्षणं त्रयोदशोऽध्यायः ।

Colophon. इत्याग्नेयमहापुराणे अग्निप्रोक्तकाव्यालङ्कारशासनस्य गङ्गाधरकविराजकृतायां काव्यप्रभाष्टत्तौ त्रयोदशाध्यायस्य दृत्तिः समाप्ता सन १२९१ । १५ चैत्र ।

विषयः । अग्निपुराणोक्तकाव्यालङ्कारव्याख्या ।

No. 58. काव्यादर्श टीका । By त्रिभुवनचन्द्र देव । Substance, country-made paper, 20×4 inches. Folia, 58. Lines, 8 on a page. Extent, 1,180 slokas. Character, Bengali. Date ? Place of deposit, Babu Nilkamal Bhattacharyya, zemindar, Glanga *via* Tangail. Appearance, old. Prose and verse. Generally correct.

Beginning. नमो गणेशाय ।
सर्व्वज्ञं सर्व्वहितं देवं श्रीबर्द्धमानमानम्य ।
त्रिभुवनचन्द्रेणेयं विरच्यते दण्डिनष्टीका ॥
विघ्नोपशमनपुण्यसम्भारभक्तिप्रकर्षं सम्प्रदायाविच्छेदलक्षणं फलमवलोक्य मङ्गलार्थं श्लोकमाह ।
चतुर्मुखमुखाम्भोज वनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्व्वशुभ्रा सरस्वती ॥
इत्यादि ॥

End. न केवलं रमते कीर्त्तिञ्च लभते कीर्त्तिं यशः प्राप्नोति

× × × × × × ।

गुणदोषविभागस्य प्रयोजनमेवैतत् यतः सद्भिः गुणदोषविभागजन

× × × × यत्नः कर्त्तव्य इति ध्वन्यते ॥

Colophon. इति त्रिभुवनचन्द्रदेवविरचितायां दण्डिटीकायां काव्यादर्शे दण्डिनः कृतौ दुष्कारविभागो नाम तृतीयः परिच्छेदः । समाप्तश्चेदं पुस्तकमिति ॥

विषयः । दण्डिकृतकाव्यादर्शस्य व्याख्यानम् ॥

No. 59. कुलमतं (तन्त्रं)। By कविशेखर। Substance, palm leaves, 15×1½ inches. Folia, 70. Lines, 4 on a page. Extent, 1,120 ślokas. Character, Uria. Date ? Place of deposit, Sukhapur, Post Jaypur, Pandit Pitāmbara Agnihotrī. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमः कुलदेवतायै । श्रीगुरवे नमः ।

प्रणम्य परदेवतां श्रीकमलं प्रमोदास्पदं

पुरान्तकसुरान्तकाब्जभवमौलिरत्नाञ्चितं ।

प्रकृष्टगुणगौरवं गुणपदाब्जसत्त्वाधुना

तनोति कविशेखरः कुलमतं परिजेशाचितम् ॥ ?

विचार्य्य गुणशासना शिवकृतागमानां मतं ?

मतं कुलविदां मतं प्रचुरतन्त्रकृत्वम्मतं । ?

इदं कुलमतं मया सकलसत्यपक्षे हिता

समध्वमयि कौलिका मयि वर्षं मनः कथ्यते ॥ ?

न कौलमार्गात् त्रिपुरे हन्ति मार्गः

परो न्दणां ज्ञानभवाय सर्व्वदा ।

जीवन्नरो यत्र भवत्यमर्त्त्यः

तुल्यः सुराणामपि दुर्लभोऽयम् ॥ इत्यादि ।

End. यत्र यत्र हि विधे न विधानं

तत्र तत्र परमागमविज्ञाः ।

वर्त्मने सकलभूतहितार्थाः

शोधयन्तु मम ते सततन्त्रैः ॥

शके युगखषड्विधौ परिमितेऽथ चिन्तेविधौ । ?
कलाचयदिने विचार्य्य निखिलागमाद्युयचितम् ॥
मुदे कुलविदां सदा परसमाधिभाजां मुदा ।
द्विरष्टपटलैरिदं कुलमताख्यतन्त्रं कृतम् ॥

Colophon. इति श्रीकविशेखरविरचिते कुलमते दीपिनीविधानं नाम षोड़शः पटलः । समाप्तश्चायं ग्रन्थः ।
शुभमस्तु सर्व्वजगतां श्रीदक्षिणकालिकायै नमः ॥

विषयः । इति कविशेखरविरचिते कौलाचारो नाम प्रथमः पटलः । इति श्रीन्यासविवरणं नाम । २ । इति श्रीसपर्य्यायः । ३ । इति बालकसंस्कारः । ४ । इति श्रीगुरुशिष्यलक्षणं नाम । ५ । इति दीक्षाविधानं नाम । ६ । इति यन्त्रसंस्कारः । ७ । इति मालासंस्कार । ८ । इति पुरश्चरणं नाम । ९ । इति बलिदानविधिः । १० । इति षट्कर्म्मविधिः । ११ । इति वीरसाधनं नाम । १२ । इति शवसाधनं नाम । १३ । इति योगिनीसाधनं नाम । १४ । इति चाकमंषादिप्रयोगकथनं नाम ? । १५ । इति दीपिनीवि धनं नाम । १६ ।

No. 60. कुवलयाश्वचरितम् । By लक्ष्मणमाणिक्य । Substance, country-made paper, 10×4 inches. Folia, 93. Lines, 6 on a page. Extent, 1,500 slokas. Character, Bengali. Date ? Place of deposit, Khilpárá *via* Noakhali, Pandit Ramgobinda Tarkālaṅkāra. Appearance, very old. Prose and verse. Correct.

Beginning. प्रथमपत्रं नास्ति । आदितः द्विचितुःपत्राण्यतीव खण्डितानि अतः प्रस्तावनां परित्यज्य प्रारम्भवाक्यं लिख्यते ॥
ततः प्रविशति यथानिर्द्दिष्टो राजा मन्त्री च ।

राजा । एवमेव अत्र कः सन्देहः । मयि शासितरीत्यादि पुनः पठित्वा आर्य्यसुमते पश्य पश्य—मयि जीवति सुतनूजे चरति दुरन्तस्तपोविघ्नं ।
दिनमणिनिर्म्मलवंशे नव इव × × × यशोराशिः ॥

सुमति । देव श । तापज्योतिषा प्रदीप्ते + + कुतो विघ्नानां प्रचारः ।

राजा । पौराः किमिदमुच्चरन्ति ।

मन्त्री । यद्येवं तदा दिग्विजयानन्तरविश्रामावसरे कोपि दुरात्मा एवमाचरन् पारत्रिकसुखमनुभवितुमुत्कण्ठते ॥ इत्यादि ॥

End. अतः परमपि प्रियमस्ति । तथापि ।
प्रिया प्राणैर्युक्ता पुनरपि कृता मत्सहचरी
आचार्य्यो × × × प्रियसखः ।
परित्यक्तं राज्यास्पदमपि पुनर्लब्धमधुना
किमेतस्मात्प्रेय × × × गतः । तथापीदमस्तु ।
× × विवर्जिताः श्रुतिविदः पुष्णन्तु पुण्यं द्विजाः
राजानः परिपालयन्तु ++ धर्म्मेण निःशात्रवाः ।
नन्दन्तु × × प्रजा युवतयः × × दीक्षिताः
सर्व्वे प्राप्तभृतो भवन्तु कुशला नश्यन्तु सर्व्वापदः ।
इति निष्क्रान्ताः सर्व्वे ।

Colophon. इति श्रीगुरुलक्ष्मणमाणिक्यविरचिते कुवलयाश्वनामनाटके समुल्लसितनायको नाम नवमोऽङ्कः । समाप्तोऽयं प्रबन्धः ।

× × × × × ×

विषयः । इति श्रीगुरुलक्ष्मणमाणिक्यविरचिते प्रसन्नकुवलयाश्वनामनाटके कुवलयाश्वप्रस्थानो नाम प्रथमोऽङ्कः । इति मदालसापरिचयो नाम द्वितीयोऽङ्कः । इति मौक्तिकविक्षेपो नाम तृतीयोऽङ्कः । इति विकलकुवलयाश्वो नाम चतुर्थोऽङ्कः । इति मदालसापरिणयो नाम पञ्चमोऽङ्कः । इति कल्पितमदालसो नाम षष्ठोऽङ्कः । इति उन्मत्तकुवलयाश्वो नाम सप्तमोऽङ्कः । इति अश्वतरपुरप्रवेशो नामाष्टमोऽङ्कः । इति समुल्लसितनायको नाम नवमोऽङ्कः ।

No. 61. "कूष्माण्डहोमः" । Substance, country-made paper, 10 × 5 inches. Folia, 18. Lines, 11 on a page. Extent, 400 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. तृतीयादिषु-चतुर्षु-अनुवाकेषु-पापक्षयार्थं कूष्माण्डहोमाङ्गभूता मन्त्रा उच्यन्ते तत्र तृतीयानुवाकस्यास्मृक्षु प्रथमामृचमाह-यद्देवा देव इत्यादि ।

End. इदानीं विधत्ते कर्मादिष्वेतैर्जुहुयात् पूतो देवलोकान् समश्नुत इति प्रारभ्यमान कर्मारम्भेषु कूष्माण्डहोमेन पूतस्य देवलोकप्राप्तिर्भवति ।

Colophon. इति यजुरारण्यके द्वितीयप्रपाठके सप्तमोऽनुवाकः ।

विषयः । कूष्माण्डहोमविधानम् ।

No. 62. कृत्यपद्धतिः । By यादवाचार्य्यः । Substance, country-made paper, 16 × 4 inches. Folia, 91. Lines, 7 on a page. Extent, 700 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Mayamansingha, Pargana A'ḷiyá, Post Jámurki, Gram Háláliyá, Pandit Gurudāsa Vidyáratna. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

गृहिणामपवित्राणां हितार्थं कृत्यपद्धतिः ।
नत्वा नारायणं देवं यादवेन वितन्यते ॥

ब्राह्मे मुहूर्त्ते उत्थाय रात्रिवासस्त्यक्त्वा नेत्रे मुखञ्च प्रक्षाल्य द्विराचम्य शौचार्थं जलं शुचि मृत्तिकाञ्च गृहीत्वा नैर्ऋत्यां दक्षिणस्यां वा दिशि गृहादि × विक्षेपपर्य्यन्तं देशमतीत्य तृणैर्भूमिमाच्छाद्यावगुण्ठितनासिका मुखशिरा दक्षिणकर्णोपरिमावेन पृष्ठलम्बितयज्ञसूत्रो मौणी पुरीषोत्सर्गं कुर्य्यात् ॥ इत्यादि ॥

End. अथ पञ्चमीव्रतं । — — — — — — — — — सोम उवाच ।

भद्रं प्रश्नोत्तमं चेदं पौराणिकमनुत्तमं ।
शृणुतां पठतां नृणां × × × × × नाशनम् ॥ (?) इत्यादि ।
(अतःपरं खण्डितं) ।

Colophon. इति श्रीयादवाचार्य्यकृतकृत्यपद्धतौ आह्निकप्रकरणं ।

विषयः । संक्रान्तिनिरूपणं । तत्र कर्त्तव्यकर्म्मनिरूपणं । महानिशानिरूपणं । एकादशीव्यवस्था । वैशाखादिद्वादशमासकृत्यनिरूपणं । तत्र धर्म्मघटदानविधिकथनं । जलघटदानविधिः । अक्षयतृतीयासावित्रीव्रतदशहरेत्यादीनां विधिकथनं ॥

No. 63. कृत्यप्रदीपः । By वाचस्पतिमिश्रः । Substance, country-made paper, 14 × 4 inches. Folia, 76. Lines, 7 on a page. Extent, 2,100 ślokas. Character, Bengali. Date Śaka 1741. Place of deposit, Durgapur Post Begamganga *via* Noakhali, Paṇḍit Kāśicandra Nyāyapañcānana. Appearance, fresh. Prose and verse. Correct.

Beginning. ॐ नमो गणेशाय ।

प्रणम्य पुण्डरीकाक्षं श्रीवाचस्पतिशर्म्मणा ।
आलोक्य मुनिवाक्यानि विप्राचारो वितन्यते ॥

आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः ।
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम् ॥
अलक्षणमशुभसूचकममङ्गलचिह्नं तत् सूचितञ्चाधर्म्मसञ्जनितफलमेवाचारो-
विनश्यति । तथा—

सर्व्वलक्षणहीनोपि समुदाचारवान् नरः ।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥ इत्यादि ।

End. यात्रायां वराहाचार्य्याः ।

दृष्टिः करोति दोषं तावन्नाकालसम्भवा राज्ञः ।
यावन्न भवति याने नरपशुचरणाङ्किता वसुधा ॥

तदेषां समुदायार्थो रत्नाकरे । मलिम्लुच × गुरु-शुक्र-बाल्य-वार्द्धकास्तमय-सिंहमकरान्यतरगुरुस्थितिपूर्वराश्यनागतातिचारिगुरुकसम्वत्सरपूर्वराशिं गमिष्यमाणातिचारिगुरुकपक्षत्रयवक्रिगुरुकाष्टाविंशतिवासरकेत्वाद्यद्भुतोत्तर-सप्ताहगुर्व्वादित्यसिंहादित्यपौषादिमासचतुष्टयान्यतमैकद्विव्यान्यतमदिनाधि-करणक × × नरैकनिसप्ताहान्यतमदिनानि निषिद्धसमयस्तदन्य एव शुद्धसमय इति ।

Colophon. इति महामहोपाध्यायमिश्र-श्रीवाचस्पतिविरचितः कृत्यप्रदीपः सम्पूर्णः ।
सरस्वत्यै नमः । गुरवे नमः ।

भवजलधिमहीन्द्रक्षोणिमाने शकाब्दे
घटमितदिनवर्त्मोरन्तरीक्षे चर्षांशे ।
भवपदकमलं सन्नस्य पक्षे बुधस्य
अलिखदिदमशेषं रामभद्रो द्विजातिः ॥

विषयः । प्रातरारभ्य विप्राणां दैनिककर्त्तव्यविधिविवेचनम् । तत्राचारप्रशंसाकथनं । प्रातःकृत्यनिरूपणं । तत्र शौचानन्तरं आचमनविधिनिरूपणं । दन्तधावनविधिकथनम् । प्रातःस्नानादिविधिकथनम् । तर्पणविधिकथनम् । सन्ध्याप्रयोगकथनम् । पूजादिविवेचनम् । भक्ष्याभक्ष्यविवेचनं । सायंसन्ध्याविधिकथनम् । अथ शयनविधिकथनम् । क्षौमवस्त्राद-विधिविधानम् । अथक्षौमवस्त्राणानन्तरं स्नानविधिकथनम् । अथ गोभिलोक्तस्नानतर्पण-विधिकथनम् । अथ गोभिलकल्पस्याभावे नरसिंहपुराणीयस्नानादिविधिकथनम् । अथ नरसिंहपुराणीयस्नानान्तरं छन्दोगपरिशिष्टोक्तसन्ध्यावन्दनादीनां विष्णुपुराणोक्ततर्पणस्य च विधानकथनम् । अथ अमावास्यादौ पार्व्वण विधिकथनम् । वैश्वदेवकर्म्मनिरूपणं । नित्य-

श्राद्धविधिकथनम् । आभ्युदयिककालनिरूपणं । अथ वाजसनेयिश्राद्धप्रयोगकथनम् । अथापाच-काभ्युदयिकप्रयोगनिरूपणं । अथ सपाचकाभ्युदयिकप्रयोगकथनम् । अथ समयस्य शुद्ध्यशुद्धि-विवेचनम् ॥

No. 64. कृष्णतापनीयोपनिषद् (उत्तरभागः)। Substance, palm-leaf, 17×2 inches. Folia, 6. Lines, 5 on a page. Extent, 120 slokas. Character, Bengali. Date ? Place of deposit, Puri S'aṅkaramaṭha. Appearance, old. Prose and verse. Generally correct.

Beginning. एकदा हि व्रजस्त्रियः सकामाः शर्व्वरीमुषित्वा
सर्व्वेश्वरं गोपालं कृष्णं हि वाचूचिरे ।
उवाच ताः—कृष्ण × स्नैकस्मै ब्राह्मणाय भैक्ष्यं दातव्यं भवति दुर्वाससेति
कथं यास्यामोऽतीर्त्त्वा जलं यमुनायाः यतः श्रेयो भवति । इत्यादि ।

End. × × कृत्वा स्तुतिं पुण्यतमां ब्रह्मणे स्वस्वरूपिणे ।
कर्त्तृत्वं सर्व्वलोकानामन्तर्द्धाने वभूव सः ।
ब्रह्मणो ब्रह्मपुत्रेभ्यो नारदानुश्रुतं यथा ।
तथा प्रोक्तन्तु गन्धर्व्वि गच्छ त्वं स्वालायान्तिकम् ॥

Colophon. इत्याथर्व्वणोपनिषदि कृष्णतापनीयोपनिषदुत्तरभागः समाप्तः ।

No. 65. कृष्णतापनीयोपनिषद् (पूर्व्वभाग)। Substance, palm leaf, 17×2 inches. Folia, 3. Lines, 5 on a page. Extent, 30 slokas. Character, Bengali. Date ? Place of deposit, Puri S'aṅkaramaṭha. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥
मुनयो ह वै ब्रह्माणमूचुः कः परमो देवः कुतो मृत्युर्विभेति कस्य विज्ञाने-
नाखिलं ज्ञातं भवति केनेदं विश्वं संसरतीति तदुहोवाच ब्रह्मा कृष्णो वै
परमं दैवतं गोविन्दान्मृत्युर्विभेति गोपीजनवल्लभज्ञानेन तज्ज्ञातं भवति ।
इत्यादि ।

End. अमुं पञ्चपदं मन्त्रमावर्त्तयेद् यः
स यात्यनायासतः केवलं तत् ।
(तत्पदं) अने × देकं मनसो यवीयो
× × यद्देवा आप्नुवन् पूर्ब्बमर्षदिति ॥
तस्मात् कृष्ण एव परोदेवस्तं ध्यायेत् तं × × × × तं भजेत् तं यजे-
दित्यों तत्सदिति ।

Colophon. इत्याथर्ब्बणोपनिषदि कृष्णतापनीयोपनिषद्पूर्ब्बभागः समाप्तः ॥

No. 66. केनेषितवाक्यभाष्यटिप्पणम् । Substance, country-made paper, 14×4 inches. Folia, 12. Lines, 9 on a page. Extent, 444 ślokas. Character, Bengali. Date ? Place of deposit, Rajguru's Maṭha, Gaṇeśa Mahallā, Benares City. Appearance, old. Prose. Correct.

Beginning. ॐ नमः परमात्मने ।
प्रथमाद्यान्तरेणैव मनआदेः प्रवर्त्तकं ।
विदिताविदितान्यत्वमिद्धं ब्रह्माहमद्वयम् ॥
केनेषितमित्यादिकं सामवेदशाखाभेदब्राह्मणोपनिषदं पदशो व्याख्यायापि
न तुतोष भगवान् भाष्यकारः । इत्यादि ।

End. सत्यकामः स्वयंसिद्धः सर्वेशो यः स्वशक्तितः ।
स एकान्तः प्रविष्टोऽस्मदुपास्यः सर्व्वदेहिनाम् ॥

Colophon. इति केनेषितवाक्यभाष्यटिप्पनं समाप्तम् ।

विषयः । केनेषितोपनिषद् भाष्यव्याख्या ।

No. 67. कोषसङ्ग्रहः । By मधुसूदन । Substance, country-made paper, 10×2½ inches. Folia, 71. Lines, 4 on a page. Extent 980 ślokas. Character, Bengali. Date, Śaka 1590. Place of deposit, Santoṣa via Tangail, Babu Bhuvan Candra Sen Kaviraj. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
नत्वा नारायणं कोषसङ्ग्रहं मधुसूदनः ।

व्यातेनेऽमरसिंहस्य व्याख्यानौपायिकं मतम् ॥

सिन्धुः समुद्रेऽनन्ते च सिन्धुर्नद्यां महानसे । व्याडिः ।

अयमुदयति मुद्राभञ्जनः पद्मिनीना-

मुदयगिरिवनालीबालमन्दारपुष्पः ।

विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्

कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥

अकारो वासुदेवः स्यादाकारस्तु पितामह इत्येकाक्षरकोषः । इत्यादि ।

End. सव्यं वामे च दक्षिणे । फलं फालं मतं भाग्ये भोगप्रत्यययोरपि । रभसः रात्रौ नापितचाण्डालकपिनाम न कीर्त्तयेत् । एतेन दिवा कीर्त्तितत्वं शुभमस्तु शकाब्दाः । १५९० ।

Colophon. श्रीराजीवलोचनसेनेन लिखितमिदं स्वकीयपाठार्थञ्च । श्रीदुर्गाचरणे मम सदा भक्तिरस्तु ।

विषयः । अमरकोष-एकाक्षरकोष-वकार भेद-बकारभेद-ऊष्मवर्णभेदादिककोषाणां संग्रहणं । इदमेतस्य विशेषत्वं यदमरकोषस्य स्वर्गवर्गादावश्यकपदानां दृष्टान्तपूर्व्वकं व्युत्पत्तिकथनमिति ॥

No. 68. क्रतुरत्नमाला । Substance, country-made paper, 9×4 inches. Folia, 22. Lines, 20 on a page. Extent, 400 ślokas. Character, Nágara. Date ? Place of deposit, Benares City, late Hariścandra Babu. Appearance, old. Prose. Correct.

Beginning. श्रीगुरुभ्यो नमः ।

क्रतुरत्नमाला लिख्यते ।

ओम् वन्दे (...) विघ्नवृन्दकन्दे (...) पदारविन्दे । ?

यं देवमिन्द्रोपि त्रिदेववन्द्यः सन्देहभेदे तमपीह वन्दे ॥ ?

End. पर्व्वाणि सुत्यमहः, ? इत्येकदीक्षापक्षे । अथवा पर्व्वणि दीक्षा, पञ्चम्यां सुत्यमहः ? । नायं मीमांसकानां अभीष्टतरः पक्षः ।

(इतो नास्ति) ।

Colophon. × × × × × × ×

विषयः । क्रतूणां सर्व्वविषयनिरूपणम् ।

Colophon. इत्यार्षे श्रीमत्भगवन्मुखारविन्दात् विनिर्गते श्रीगौतमर्षिपादपद्माराधकेन श्रीजिनसेनाचार्य्येण विरचिते त्रिवर्णाचारे उपासकाध्ययनसारोद्धारे सूतशुद्धिकथनीयं नाम अष्टादश पर्व्व इति त्रिवर्णाचारः समाप्तः. संवत् १८४४. वैशाखशुक्लाष्टम्यां चन्द्रवासरे. लिखीलाकरमध्ये रामपालब्राह्मण ॥ ?

विषयः। प्रथमपर्वणि पूजकलक्षणम्, द्विजातिनिर्णयप्रकरणम्, ऋषभदेवस्य पञ्चकल्याणकवर्णनम्, द्विजोत्पत्तिः भरतराजदृष्टषोड़शस्वप्नफलवर्णनञ्च. द्वितीयपर्वणि सामरिकादिकथनम्. तृतीयपर्वणि शौचाचारकथनम्. चतुर्थपर्वणि स्नानवस्त्राचमनसन्ध्यार्घनित्यतर्पणनित्यनैमित्तिकश्राद्धादिकं ऋषितर्पणञ्च. पञ्चमपर्वणि गृहस्थधर्मः, देवपूजानिरूपणञ्च. षष्ठपर्वणि जिनतर्पणम्, जिनस्तुतिकथनञ्च. सप्तमपर्वणि मन्त्रोपदेशकथनम्. अष्टमपर्वणि लोकसंस्थानमध्यलोकद्वयगवर्णनञ्च. नवमपर्वणि जिनचैत्यालयागमनादिभोजनान्तक्रियाप्रतिपालनम्. दशमपर्वणि स्वस्वव्यापारकथनम्. एकादशपर्वणि शयनविधिः, रात्रिकृत्यं, गर्भोत्पादनं, शारीरवर्णनञ्च. द्वादशपर्वणि गर्भाधानादिपञ्चदशक्रियास्वरूपवर्णनम्. त्रयोदशपर्वणि मौञ्जीबन्धनादिज्ञानवर्णनम्. चतुर्दशपर्वणि ब्रह्मस्वरूपवर्णनम्. पञ्चदशपर्वणि विवाहविधिवर्णनम्. षोड़शपर्वणि वर्णलाभादिपञ्चक्रियावर्णनम्. सप्तदशपर्वणि अशौचप्रकरणवर्णनम्. अष्टादशपर्वणि सूतकशुद्धिकथनम्.

No. 120. "दयानन्दपराभवः." Substance, country-made paper, 8 × 3 inches. Folia, 6. Lines, 7 on a page. Extent, 84 slokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Paṇḍit Vāmanācārya. Appearance, new. Verse. Correct.

Beginning. श्रीमद् हयग्रीवाय नमः।

श्रीमद्वैदिकसंवेद्यारघुराजेन्द्रचिन्तनात्।
योऽप्राप्नोद्रघुराजत्वं बान्धवेशः स इन्द्रतात्।
श्रीकाशीनगराधीशकाशीराजसमाज्ञया।
दयानन्दो निरानन्दो वामनेन प्रकाश्यते॥

End. तत एवं पराभूतं दृष्ट्वा श्रीमदीश्वरीप्रसादनारायणाभिधं महाराजं सर्व्वे जनाः जयशब्दैः समं तोषयन्ति॥

Colophon. इति दयानन्दनिराकृतिप्रपञ्चसारः सुधीभिर्विभावनीय इति शम्.

विषयः। वामनाचार्य्यकर्त्तृकदयानन्दपराजयः.

No. 121. दानदीपावलिः। By योगीश्वर। Substance, palm leaf, 13 × 1 inches. Folia, 128. Lines, 6 on a page. Extent, 2300 slokas. Character, Uria. Date ? Place of deposit, Sāsana Dāmodarpur, Puri, Paṇḍit Sadāsiva Kāvyakaṇṭha. Appearance, old. Prose and verse. Incorrect.

Beginning. श्री गणेशाय नमः ।

जय सर्व्वसुराराध्य जय संसारमोचन ।
जय विघ्नतमश्चन्द्र जय सिद्धिप्रदायक ॥
लम्बोदरमवलम्बे जयमविलम्बे ददानमपवाधं ।
यन्मौलिचन्द्रलेखा सिन्दूरिताननसदृया जयति ॥
यश्चन्द्रान्वयसिन्धु × × × × निरयं
स कंसमथनमण्डलीं मण्डयन् × × × ।
लीलच्छाधरशेखरप्रविलसज्जयो महाभूतिमान्
योऽयं भृत्यस्वभावप्रभवनयवरप्रीतिदत्तात्मभक्तिः ।
श्रीमन्निःशङ्कभानुः चितिपपदयुगयोऽर्च्ये
... ... (?)
(श्रौतस्मार्त्तादि तत्तुपचयपरिचया भारताद्युक्तकीर्त्तिं) (?)
नित्यानुष्ठानतैला सुचरितविनया सत्यवैश्वानरार्च्चिः ।
श्रद्धाभाजां बुधानां विरचयतु चतुर्वर्गमार्गप्रकाशं
× × × × ॥

देवल-याज्ञवल्क्यौ शङ्खलिखितगौतमबृद्धवशिष्ठवशिष्ठा विष्णुबृहस्पति-पराशराङ्गिरसयोगियाज्ञवल्क्यशातातपमरीचिरुद्दिष्टाः (?) सम्वर्त्तापस्तम्बौ लघुहारीतः महारीतः दानव्यासो व्यासः सलघुकात्यायनः बौधायन-स्वाण्डुपलिकप्रभृतयश्चालिखितानि (निरूप्य (?) निपुणं स्मृतयः षट्त्रिंशन्मतं यावत्)। ... ... महाभारतमन्वादितोक्तानि (?) ज्योतिषनानागम-मतैर्वाक्यैः प्रमाणकैरनुद्धृतानि । अथ दानपरिभाषा । इत्यादि ।

End. स्वर्गप्राप्तिकामोऽहमित्युक्त्वा पुरुषपोषणयोग्यां प्रियदत्तां भूमिं ददानि स्वस्त्या-दिस्वीकारान्तं पूर्व्ववत् ।

Colophon. इति श्रीदानदीपावल्यां भूमिदानविधिर्नामचतुर्विंशतितमोऽध्यायः ।
(अतः परं खण्डितं)

विषयः । इति श्रीमन्महाराजाधिराजगजपतिनिःशङ्कभानोर्ललितपदकमलधूलिकला-पालङ्कृतपात्रयोगीश्वरविरचितायां दानदीपावल्यां पुण्यदेशकीर्त्तनं नाम प्रथमोऽध्यायः । पात्रा-पात्रनिरूपणं २ । ३ । तुलापुरुषदानं । ४ । हिरण्यगर्भमहादानविधानं । ५ । ब्रह्माण्डमहा-दानविधानं । ६ । गोसहस्रमहादानविधानं । ८ । कामधेनुमहादानविधानं । ९ । हिर-

ण्याश्वरथमहादानविधानं । १० । हेमहस्तिरथमहादानविधानं । ११ । पञ्चलाङ्गलकमहादान-विधानं । १२ । धरामहादानविधानं । १४ । कल्पलतामहादानविधानं । १५ । सप्तसागर-महादानविधानं । १६ । रत्नधेनुमहादानविधानं । १७ । महद्भूतघटमहादानविधानं । १८ । धान्याचलादिदशाचलविधिः । १९ । २० । गोप्रदानगुडधेन्वादिधेनुदानविधिः । २१ । रुद्र-देवताकालङ्कृतगोदानविधिः । २२ । भूमिदानविधिः । २४ ।

No. 122. दानरत्नप्रदीपिका । By चन्द्रचूडः । Substance, country-made paper, 17×4 inches. Folia, 10. Lines, 7 on a page. Character, Bengali. Date ? Place of deposit, Pāruikurā, Chittagong, Paṇḍit Kālikānta Vācaspati. Appearance, tolerable. Prose and verse. Correct.

Beginning. ॐ नमो गणेशाय ।

स्वर्गारोहणसोपानदानसागरपद्धतिः ।
क्रियते चन्द्रचूडेण दानरत्नप्रदीपिका ॥

प्रातरशौचोत्तरदिने नद्यादौ स्नात्वा प्रेतक्रियाधिकारी × × × × × × × तदनु कृतनित्यक्रियः गुरुकुलद्विजयोरनुज्ञां गृहीत्वा दानस्थानमाविशेत् ॥ इत्यादि ।

End. नमो ऽयं सवस्त्रमालङ्कारसोपकरणगजो विष्णुदेवताकः ।
अद्येत्यादि कृतैतत् सवस्त्रमालङ्कारसोपकरणगजदानकर्माच्छिद्रमस्तु ।
खण्डितत्वात् समाप्तिवाक्यं नास्ति ।

Colophon.

विषयः । तिलदानविधिकथनं । भूम्यासनादिदानविधिकथनं ॥ धेनुदानविधिकथनं ॥ दोलादानविधिकथनं । गजाश्वनौकादिदानविधिकथनं ॥

No. 123. दिव्यसिंहकारिका । Substance, palm leaf, 17×1½ inches. Folia, 75. Lines, 6 on a page. Extent 2700 slokas. Character, Uria. Date ? Place of deposit, Dāmodarpur Śāsana, Zilla Puri, late Paṇḍit Gopināth Miśra. Appearance, old. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः । अविघ्नमस्तु ।

वात्स्यायनसमुत्पन्नो दिव्यसिंहाभिधः सुधीः ।
एकतः स्मृतिवाक्यानि सोपस्थित्यै लिखाम्यहं ।

आचारात् लभते ह्यायुराचारादीप्सिताः प्रजाः ॥
आचाराद्धनमक्षय्यमा चारो हन्त्यलक्षणं ।
श्रुतिस्मृत्युदितं धर्म्ममनुतिष्ठन् हि मानवः ।
इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखं ।
आचाराद् विच्युतो विप्रो न वेदफलमश्नुते ।
आचारेण तु संयुक्तः सम्पूर्णफलभाग् भवेत् ॥ इत्यादि ।

End. दशकृत्वः पिवेदापो गायत्र्या श्राद्धभूक् द्विजः ।
भुक्त्वा च पार्व्वणश्राद्धे प्राणायामान् षड़ाचरेत् ॥
श्रीरामः । इति ।

Colophon.

विषयः । स्वेनैव कृते कालदीपश्राद्धदीपाख्ये स्मृतिसंग्रहे यानि बाहुल्यादुक्तानि कर्त्तव्य-कर्म्मोपधायकानि वचनानि इह तु तेषामेव संक्षेपेण वर्णनं ।

No. 124. दुर्गोत्सवचन्द्रिका । By रामचन्द्र गजपति । Substance, palm leaf, 17 × 1½ inches. Folia, 77. Lines, 4 on a page. Extent, 1540 ślokas. Character, Uria. Date ? Place of deposit, Dāmodarpur Śāśana, Zilla Puri, Paṇḍit Sadāśiva Kāvyakaṇṭha. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीवनदुर्गायै नमः ।
अम्भोदान् चिकुरच्छलेन तपनं सिन्दूरविन्दूपधेः
पीयूषद्युतिविम्बमाननमिषा ज्योत्स्नां स्मितच्छद्मना ।
शैलेन्द्रं कुचकैतवाद्‌लिकुलव्याजाद् वहन्तीर्नदी-
र्द्धाङ्गाय शिवस्य विश्वनिधये मूलप्रकृत्यै नमः ॥
सकलागमसारतत्ववेत्ता स कलावानिव सर्व्वतोऽनवद्यः ।
तनुते भुवि रामचन्द्रदेवस्वरणाम्भोरुहभक्तिमम्बिकायाः ॥
यस्योदेति यशोविधुस्त्रिजगतामानन्दमापादयं-
स्ताराभिः परिपन्थिपान्यरमणीगण्डैर्महापाण्डुभिः ।
का चिन्ता लवनाम्बुधौ बलयतामप्यागते ऽस्याभितः
क्षीराम्भोधिरखण्डमण्डलपरीवेश्याय नेश्याय ते ॥ (?)

कर्णः कर्णपथं न याति न स ते वैरोचनी रोचते
मोघाः कामदुघा बभूवुरनघा नीचोदधीचिः स्वयं ।
स्वल्पः कल्पतरुः परेषुगणना का नाम कामस्पृशां
यस्मिन् दानविधानमानवसमाधानव्रते जाग्रति ॥
वदान्यमनुयुञ्जाने जनोयमनुशंसते ।
स्वयं मूकायते नूनं वदान्यमिति श्च्छति ॥
श्वेतद्वीपं शिशिरशिखरी लक्षते पक्षयुग्मं
सव्ये पादौ वहति कणकक्ष्माधरयक्षुशोभां ।
तारास्तारापतिरपि तनूर्धूतपक्षानुकारी
यस्याः स्वैरं स्फुरति भुवने यस्य सा कीर्त्तिहंसी ॥
भीतेव प्रथमं विरोधिवसुधा यद्वाजिराजीखुर
क्षोभोद्भूतरजश्छलेन रिपुभिः साकं द्युलोकं गता ।
श्रुत्वा तव धरानुपालनयशःस्वर्वारनारीगणै-
र्गीतं निर्भयतामुपागतवती भूयः परावर्त्तते ॥
स निशम्य सम्यगखिलागमोदितं विबुधैर्विचिन्त्य वसुधानुमोदितः ।
शरदुत्सवे गिरिभुवः समर्चनचन्द्रिकां दिशति सम्मतां सतां ॥
मन्त्राः सन्ति क्षितिधरभुवो लक्षणो दक्षिणेऽपि (?)
प्रायो मार्गे जपकृतविधौ ये फलं साधयन्ति ।
अष्टविंशाक्षरमनुरयं किन्तु सञ्चिन्तितानां
नानार्थानां क्षमा इति ततः कीर्त्त्यते तत् प्रयोगः ॥
एषा विद्या सर्व्वभावानवद्या पद्या मुक्तेः सेविता मुक्तिकामैः ।
यद् वा दत्ते कामनां मन्त्रिमुख्यः सद्योदत्ते तं तमेवास्य कामं ॥
ईशानसंहितादौ यदीक्षितं कालिकापुराणादौ ।
यदबोधि रुद्रयामले सम्मोहनसम्मुखोक्तेषु ॥
यदलम्भि तत्त्वसागरसारस्वतन्त्रमन्त्रवरवाक्यैः ।
अन्यासु संहितासु च तन्त्रेष्वथवा पुराणेषु ॥
तत्तत् विषये निबन्धे यदिदं विषये विलोकितं किमपि ।
दुर्गायाः शरदुत्सवविषये तत्तत् निबध्निमः ॥ इत्यादि ।

End. इत्येवं दशदिक्षु भौतिकबलिं दत्वाथ नत्वा स्वपो

रुद्राणीं मुदितां विचिन्त्य हृदये सञ्चिन्तयेदीप्सितं ।
सौवर्णीमथ तां विशेषविभवैरानीय सम्मानयन्
स्वागारे विनिवेशयेदितिविधिर्भूपस्य वाञ्छानिधिः ॥
यावद् ज्यावश्यभूयं दधति मधुकराः कार्म्मुकं शम्बरारे-
र्यावत् तद्वैरिकण्ठे स भवतु भगवान् भूषणं पन्नगेशः ।
यावत् तत्तल्पशायी विहरति रमयानुगूढ़ × × ×
तावच्छ्रीरामचन्द्रक्षितिपतिरचिता निर्म्मितिः प्रीतिदास्तां ॥

Colophon. इति श्रीरामचन्द्रगजपतिविरचिता दुर्गोत्सवचन्द्रिका सम्पूर्णा । श्रीदुर्गे तव चरणे ।

विषयः । श्रीदुर्गा-जपविधि-होमविधि-तर्पणविधि-चतुर्विधदेहभावनादुर्गासमर्चनविधि काष्ठदेवीविधानादिविवेचनं ।

No. 125. देवीमाहात्म्यटीका (सुबुद्धिणी) सुबोधिनीनाम्नी By माधवानन्द चक्रवर्त्ती । Substance, country-made paper, 18×4 inches. Folia, 37. Lines, 8 on a page. Extent, 750 ślokas. Character, Bengali. Date, Śaka 1712. Place of deposit, Elanga *viâ* Tangail, Babu Nīlkamal Bhaṭṭācāryya, Zemindar. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमश्चण्डिकायै ।

प्राक्किल भगवद्बादरायणान्तेवासी जैमिनिर्महाभारतविषयेषु केष्वतीत-पदार्थेषु सन्दिहानो मार्कण्डेयं महर्षिमुपगम्य प्राचष्टीत × × अथ तेनोक्तं नायमस्माकं कथाक्षण इति सर्व्वार्थाभिज्ञान् विन्ध्याचलनिलयां-श्चतुरः पक्षिणः पृच्छेति अमुना उपदिष्टोऽसावपि तथैवाकार्षीत् । पुनर्जैमिनिप्रश्नानुरोधात् सर्व्वादिपुराणाङ्गव्याख्यानावसरो तुरीयपुरा-णाङ्गव्याख्यायां मार्कण्डेयभागुरिसम्वादात्मकमितिहासमनुवर्त्तयन्तोऽष्टममन्वन्त-रमुपक्रममाणा धर्म्मपक्षिण ऊचुर्मार्कण्डेय उवाचेति इत्यादि ।

End. एवमिति । एवं प्रकारेण सुरथः देव्या वरं लब्ध्वा सूर्य्याज्जन्म समासाद्य सावर्णिर्मनुर्भविता क्षत्रियर्षभः क्षत्रियश्रेष्ठः सावर्णिर्भवितामनुरिति पुनरावृत्तिः समाप्तिं द्योतयति सम्प्रदायात् ॥ तथा स्वायादिति चतुर्भुजेन लिखितमिदमिति । अनुष्टुभाद्याच देवीमाहात्म्ये त्रयोदशाधिकानि

षट्शतानि भवन्ति । तथाहि नन्दान्वयः । १७ । बसुतरः ६८ । एकावदा । १४ । बक्रिपबो । ६७ । नन्द नागा । ४९ । सुदन्ना । १० । बाणखिन । १५ । सार्ङ्गशशाङ्ककाला । ६१ । नन्दग्रहः । ५९ । सार्ङ्गनगाश्विनः । १७ । पञ्चशर । ५५ । सार्ङ्गगजान्वयः । ६८ । × × × १० । × ध्याशयः पाद्यगणाः क्रमेण । एवं ६२ । सार्ङ्गचतुरा × × षट्-शतानि । × × × × इति चण्डिमानं ।

इत्थं त्रयोविंशतिसंयुक्ता अनुष्टुभ्तां षट्कनिता इत्य ॥

तथापि यः सप्तशतीप्रकारः स षट्शता- दिकानिबन्धनः स्यात् ॥

Colophon. इति श्रीमाधवानन्दचक्रवर्त्तिविरचितायां सुबोधिन्यां देवीमाहात्म्यव्याख्यानं समाप्तं । शकाब्दाः । १७१२ ।

विषयः । देवीमाहात्म्यव्याख्यानं ॥

No. 126. देवीमाहात्म्यटीका By धृतिदास। Substance, country-made paper, 12×3 inches. Folia, 77. Lines, 18 on a page. Extent, 594 ślokas. Character, Nāgara. Date, Saṃvat 1582. Place of deposit, Benares City, late Babu Hariścandra. Appearance, old. Prose. Correct.

Beginning. (अस्य प्रथमतः कतिपयपत्राणि न सन्ति) ।

End. सुरथः क्षत्रियर्षभः क्षत्रियश्रेष्ठः. क्षत्रिय इति भ्रादगुणोरपरत्वं. सूर्य्यात् विवस्वतो जन्म समासाद्य प्राप्य सावर्णिर्मनुर्भविता भविष्यति.

Colophon. श्रीधृतिदासविरचितायां सन्दर्भदीपिकायां भट्टारिकाटीकायां देवी-मद्दात्म्यविवेचनं समाप्तम्. संवत् १५८२.

विषयः । देवीमाहात्म्य-व्याख्या.

No. 127. दैवज्ञमनोहरः By लक्ष्मीधर। Substance, country-made paper, 9×4 inches. Folia, 127. Lines, 10 on a page. Character, Nāgara. Date ? Place of deposit, District Chāprā, P.O. Gopālganj, Paṇḍit Jagadeo. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

... येष्टफलदो देवः । ... परमेश्वरः (आदि चातुर्गेषा × × ×) क्षितिं मनस्विनः सदा ।

तिथ्यादिकाला × × × स्वरूपां
जगत् प्रसूत्यादिकहेतुभूतां ।
कालत्रयज्ञानवतीं च दुर्गां
+ + + + + + देवीं । इत्यादि ।

End. सत्वेन जायते सिद्धी रजसार्द्धफलं लभेत् ।
तमो नास्ति च सर्व्वस्वं तेषां एव फलक्रमात् ।
तिथिः पञ्चगुणाकार्य्या दिनमतन्त्र विन्यसेत् । (?)
वह्निभिस्तु हरेत् भागं शेषं यात्रा विनिर्द्दिशेत् ।
+ + + + +
तत्सुनु र्ब्रह्मभट्टान्तो देवाद्रौ सर्व्वशास्त्रवित् ॥
तत्सूनुर्वामनोविद्वान् प्रतिष्ठाने द्विजाग्रणीः ।
तस्यात्मजः पाठकदण्डपाणिः काशीरतो वेदविदां वरिष्ठः ।
तदङ्गजः पुष्पपुरीनिवासी स्वकर्म्मनिष्ठो धरणीशमान्यो ।
धारेश्वरो मासनीकः समस्तशास्त्रार्थवित् उच्चककल्पवृत्तः
तदात्मजः केशवनामा नाम्ना महिम्नागणकः स रूढ़ः ।
अभूत्ततः तस्य च स्वगटहिण्यां ? यो लक्ष्मीधरस्तनुजोऽभिजातः ।
लक्ष्मीधरप्रौढ़क्रियावशात् (च कालज्ञ) ताननियशोधरण्यां । ?
ग्रन्थं चक्रे हि रुचिरं स दैवज्ञमनोहरं ।
बालव्युत्पत्तये तेन प्रीयताम्न ग्रहेश्वरः ॥ * ॥

Colophon. इति श्रीदैवज्ञमनोहरे संहितासारे केशवभट्टसुतलक्ष्मीधरेण कृतं फलग्रन्थः सम्पूर्णः ॥ शुभमस्तु ॥

विषयः । ऋतुफलादिकथनं । पुंसवनसीमन्तोन्नयनादिकथनं । विवाहविहितनक्षत्रादिकथनं । यामित्रादिनिर्णयः । गृहप्रवेशादिकथनं । रोगदिनमर्य्यादादिकथनं । राजाभिषेकादिकथनं । निर्गमविध्यादिकथनं । गृहार्थुदायप्रकरणकथनं । वास्तुप्रकरणकथनं । गण्डादिकथनं । अभोज्यमूलविचारादिकथनं । ग्रहवेधादिकथनं । कोटचक्रादिकथनं ।

No. 128. दोलतत्त्वामृतम्। By कृष्णनाथ न्यायपञ्चानन। Substance, English paper, 18×3½ inches. Folia, 10. Lines, 6 on a page. Extent, 240 slokas. Character, Bengali. Date ? Place of deposit, Elanga *viâ* Tangail, Babu Nilkamal Bhaṭṭācāryya, Zemindar. Appearance, fresh. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

सीताया वल्लभो देवो गिरिजानन्दवर्द्धनः ।
श्रीशो वा गिरिशो वापि पुनातु दुरितात् सदा ॥
दोलयात्रा विषेस्तत्त्वेऽमृतं भाषे यथामति ।
श्रीकृष्णनाथः प्रणमन् गोपीवल्लभमच्युतं ॥
तत्रादौ वक्तृत्सवव्यवस्था लिख्यते ॥ इत्यादि ।

End. यत्तु विवेलं दोलयेदेवं इत्युत्कलखण्डवचनं तदपि पञ्चाहानि अहानि वा इत्यत्र अहानि इत्यस्य समानार्थकं पूर्व्वाह्णमध्याह्नापराह्णपरम्वा इत्यन्यदेतत् । न च पौनरुक्त्यं अहर्दोलस्यावश्याकलप्रदर्शनार्थत्वादित्यास्तां विस्तरः ।

Colophon. इति श्रीकृष्णनाथन्यायपञ्चाननभट्टाचार्य्यविरोचितो दोलयात्रामृतग्रन्थः समाप्तः ।

दोलारूढं नमस्यामि कृष्णं वक्रविधायकं ।
तमिषं मनसो हन्तुं खलस नखरोचिषा ॥

विषयः। दोलयात्रायाः प्रमाणप्रयोगादिकथनं ।

No. 129. द्रव्यसारसंग्रहः। By रघुदेवः। Substance, country-made paper, 10×4 inches. Folia, 23. Lines, 13 on a page. Extent, 920 slokas. Character, Nāgara. Date ? Place of deposit, Puri, Śaṅkarācāryya Maṭha, Madhusūdana Tīrthasvámī. Appearance, old. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः । श्रीरामाय नमः । श्रीसीतायै नमः ।

यत्तादात्म्यस्फुटपरिचर्यां स्वादनायार्द्धदेहं
गौरी प्राप्ता हरिरपि यदीयार्द्धदेहं जहार ।
अत्युद्दामापरिमितगुणग्राममीशं तमाद्यं
वन्दे यस्मादमलमतिभिः प्राप्यते मोक्षलक्ष्मीः ॥

रघुवीरकृतद्रव्यसारसंग्रहश्लोकनैः ।
सन्तश्चरन्तु निःशङ्कं सिद्धान्तसिद्धवर्त्मसु ॥

अत्र सकलशिष्टैर्ग्रन्थादौ मङ्गलस्योपनिबद्धत्वादादौ मङ्गलफलं विचार्य्यते । अत्र केचिन्मङ्गलं समाप्तिफलकं समाप्त्यन्याफलकत्वे सति सफलत्वादित्यनुमानात् मङ्गले समाप्तिफलकत्वसिद्धिरिति समाप्तिरेव मङ्गलफलं । इत्यादि ।

End. अत्र सजातीयविजातीय × × नभिभूततेजो × × × गोलोकान्त × × तेजःस्वरूपमेकमेव गोलोकद्वयवर्त्तिचक्षुः तदेव चाक्षुषजनकं अतो न तथाविधापराभिभूततेजोऽवयवारब्धगोलोकान्तर्वर्त्तितेजसः प्रत्यक्षजननापत्तिरित्यपि बोध्यं । (अतःपरं खण्डितं)

Colophon.

विषयः । द्रव्यगुणकर्म्मादिषड्भावपदार्थानामभावपदार्थस्य च विवेचनं अत्र सर्व्वे एव पदार्था न्यायसम्मता ॥

No. 130. **द्वितीयश्येनप्रयोगकारिका** Substance, country-made paper, 9×4½ inches. Folia, 8. Lines, 20 on a page. Extent, 320 ślokas. Character, Nāgara. Date, Saṃvat 1858. Place of deposit, Benares City, Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. प्रकृतौ षोड़शिन्यग्निरग्निष्टोमेऽपि नेष्यते ।
विकृत्योस्त्वनयोरिष्टः साद्यास्त्वादिनिषेधतः ।

End. आकृतिस्तोममवश्य पुनर्मनस्याथायं न आदिरथदृष्टिरथाप्युपस्यारोपणं व्रजत एव भवेदुपत्वा तत्रेदमुनु सकलं प्रकृतिः प्रयोगः ।

Colophon. इत्यग्निचयनकारिका समाप्ताः ।

विषयः । अग्निचयनविधानम् .

No. 131. द्वितीयश्येनोपाधानकारिका । Substance, country-made paper, 10×3 inches. Folia, 5. Lines, 9 on a page. Extent, 100 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Vāmanācāryya. Appearance, new. Verse. Correct.

Beginning. द्वितीये श्येनचित्माने अन्तेऽसौ पूर्व्ववद्विमा ।
शंकुः शिरोये तत् पश्चात् प्रक्रमे प्रक्रमे दश ॥

End. लोकं पृणास्ततः शिष्टा एकोनविंशदेवहि ।
हिरण्यादि यथापूर्व्वं समाप्ता श्येनकारिका ॥

Colophon. इति द्वितीयश्येने जनाधिकप्रस्तारायां ग्रुस्कोपधानमन्त्रोपधानकारिका समाप्ता .

विषयः । द्वितीयश्येनोपधानविधिः.

No. 132. आपस्तम्बद्विसहस्रकारिका । Substance, country-made paper, 10×5 inches. Folia, 3. Lines, 18 on a page. Extent, 120 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. प्रयोगस्तु द्विसाहस्रे मन्त्रास्तु विहिताः पुनः ।
द्विसाहस्रेऽपि च ज्ञेयाः सर्व्वे एव विचक्षणैः ॥
अपि वा सन्ततिर्ज्ञेयाः प्रस्तावेपि तृतीयके ।
वशानामुपधानं स्याच्छिष्टनां चापि चेष्यते ।

End. आष्टयाकोपधानं स्याच्छिष्टा लोकं पृणा इह ।
चितौ हिरण्यमित्यादि चितिधर्मः प्रवर्त्तते ॥

Colophon. इति द्विसाहस्रकारिकाः समाप्ताः ।

विषयः । द्वितीयश्येनस्यद्विसहस्रविसहस्रइष्टकाभिः रचनाप्रकारः ।

No. 133. धम्मिल्लचरित्रम् । Substance, country-made paper. 12×5 inches. Folia, 109. Lines, 24 on a page. Extent, 3,927 ślokas. Character, Nāgara. Date ? Place of deposit, Diṅmaṇḍālācārya Mahārāja Bālacandra Sūri. Appearance, old. Verse. Correct.

Beginning. अर्हं श्रीपार्श्वप्रभु नमोनमः ।
बोधिबीजं सतांक्षान्तभूमौ बप्नुमना इव ।
योऽध्यात् वृषं पदोपान्ते स श्रीमान् ऋषभःश्रिये ॥

End. एवं बुधाःश्रुतिसुधां श्रुतिधम्मिलस्य ।
सम्यङ ५१ निशम्यचरितं करुणाकरस्य ।
आमुष्मिकैहिकसुखाय भजन्तु जन्तुः ।
रक्षार्थमादरमुदारधियः सदैव ॥

Colophon. इति श्रीजयशेखरसूरीन्द्रकृतं धम्मिल्लचरित्रं सम्पूर्णम् .

विषयः । धम्मिल्लनामकस्य कस्यचित् वैश्यपुत्रस्य चरित्रम् .

No. 134. बौधायनधर्मप्रश्नः By बौधायन । Substance, country-made paper, 10×4 inches. Folia, 28. Lines, 18 on a page. Extent, 560 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City. Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. अथातः सामयाचारिकान् धर्मान् व्याख्यास्यामो धर्मज्ञसमयः प्रमाणं वेदाश्च चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः तेषां पूर्वः पूर्वो जन्मतः श्रेयान् शूद्राणां अदुष्टकर्मणामुपायनं वेदाध्ययनं अन्याधेयं फलवन्ति च कर्माणि शुश्रूषा शूद्रस्येतरेषां वर्णानां पूर्व्वस्मिन् पूर्व्वस्मिन् वर्णो निःश्रेयसं पुरा उपनयनं विद्यार्थस्य श्रुतितः संस्कारः ॥

End. सम्यग्विनीतानां वृद्धानां आत्मवतां अलोलुपानां अदाम्भिकानां वृत्तसादृश्यं भजेतैवमुभौ लोकावभिजयति स्त्रीभ्यः सर्व्ववर्णेभ्यश्च धर्मशेषान् प्रतीयात् इत्येक .

Colophon. — — — — — —

विषयः । चतूर्णां वर्णानां धर्मकथनं

No. 135. नयमयूखमालिका। (By अप्पयदीक्षित।) Substance, country-made paper, 11×4 inches. Folia, 130. Lines, 16 on a page. Extent, 2,080 slokas. Character, Nāgara. Date ? Place of deposit, Bibihaṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीहयग्रीवाय नमः।

हेषारवैर्यः श्रुतिष्टन्दनिर्भरैः स्वीयां व्यनक्ति स्वरसोदितां पुरा।
निश्वासपङ्क्तिं निखिलामपि त्रयीमश्वाननः पातु स वधिरं हरिः॥
श्रेयसां निधिमिव श्रियःपतिं प्रेक्षतां प्रियहिताध्वदर्शना।
लक्षणार्थ्यमिव हृदयानुसारिणी रच्यते नयमयूखमालिका॥

End. बृहदारण्यकवचसां स्वर्थो (.) ब्रह्मजीवैक्यं सुग्रहांन्तर्भेदश्रवणात् पत्यादिशब्देभ्यः.

Colophon. इति श्रीभरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य्यश्रीविश्वजिद्याजि श्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितकृतौ वत्तर्मतसारे (?) नयमयूख-मालिकाख्ये द्वितीयपरिच्छेदे प्रथमाध्यायस्य तृतीयः पादः.

विषयः। उत्तरमीमांसावृत्तिः.

No. 136. नलचरित्रम्। Substance, country-made paper, 11×4 inches. Folia, 148. Lines, 15 on a page. Extent, 5,950 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, old. Verse. Correct.

Beginning. श्रीशङ्खेश्वरपार्श्वनाथाय नमः।

नमोस्तु श्रितदेवाय विघ्नविध्वंसकारिणे।
श्रीउग्रापुरसंस्थायिशान्तये कृतशान्तये॥
स्वस्ति श्रीसेवते नित्यं यस्याङ्घ्रिपद्मयामलं।
तं बर्द्धमाननामानं नमामि नतनाकिनम्॥

End. मतौमिरोमणेर्मेवगुणाः संकथिता मुदा।
प्रमादेन गुरोर्लब्धा यादृशा तादृशाः पुनः॥
पूर्व्वभवचरित्रेण धनदाख्यसुरस्य च।
चरित्रं नलराजस्य पवित्रं कथितं मया॥ इत्यादि।

Colophon. — — — — — —

विषयः । जैनमते नलचरित्रवर्णनम् ।

No. 137. नवतत्त्वटीका । Substance, country-made paper, 11×4 inches. Folia, 8. Lines, 16 on a page. Extent, 500 ślokas. Character, Nāgara. Date, Saṃvat 1772. Place of deposit, Benares City, Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, old. Prose. Correct.

Beginning. जयति श्रीमहावीरः श्रेयः श्रीश्रेणिसंश्रयः ।
सम्यक् जीवादितत्त्वानामवबोधनिबन्धनम् ॥
नवतत्त्वस्य सूत्रस्य परिमितपरिणामस्य प्रभूतपरा ।
(. .) स्यातीव गम्भीरार्थस्य मुग्धजनावबोधाय विचारः कश्चिदुच्यते ॥
तथाहि जीवाजीवेत्यादि ॥

End. अजीवस्य मूलभेदाः (१४) तेस्कन्ध (१) देशः (२) प्रदेशपरमाणु (४) ते च द्रव्य-क्षेत्र-काल-भाव ते चतुर्गुणाः क्रियन्ते ततः (५६) भवन्ति, (२५) भेदाः मिलिताः (८२) भवन्ति. एषां मध्ये भङ्गाः (४८) मिलिता भङ्गा भवन्ति. सर्वे (५६३) अजीवस्य इति अजीवस्य (५६३) भेदाः सम्पूर्णाः ।

Colophon. सम्वत् १७२१ पौषकृष्णपक्षे ॥

विषयः । जैननवतत्त्वसूत्रव्याख्या ।

No. 138. नवीननिर्माण By रघुदेव शर्म्मा । Substance, country-made paper, 9×4½ inches. Folia, 104. Lines, 12 on a page. Character, Nāgara. Date ? Place of deposit, Benares City, Durgāghāṭ, Bābācārī Sāstrī. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीनरसिंहाय नमः ।

भोक्तुं नवनवनीतं विनीतमिव यातमङ्कमम्बायाः ।
वेदाविदितगुणवन्तं नन्दसुतं तं नमस्यामः ॥
अयत्नतः पण्डितमण्डलीनां गूढार्थतत्त्वप्रतिपत्तिहेतोः ।
संक्षेपतः श्रीरघुदेवशर्म्मा नवीननिर्म्माणमिदं तनोति ॥

प्रत्यक्षप्रमाणोपजीवकत्वात् प्रत्यक्षानन्तरं अनुमानं निरूप्यते प्रत्यक्षप्रमित्युपजीवकत्वात् प्रत्यक्षप्रमित्यनन्तरं अनुमितिर्निरूप्यते। नन्वसङ्गतं न प्रयुञ्जीत इति वाक्यात् अनन्तरनिरूपणे सङ्गतिरपेक्षिता किं तत् प्रदर्शनेन किम्बा निरूपणीयनिरूपणप्रतिज्ञयेति चेन्न। यतो यत् यत् प्रतिपाद्यनिरूपितसङ्गतिमत् प्रतिपादकः × × × × × × × × वाक्यं भवतीति नियमात् प्रत्यक्षग्रन्थानुमानग्रन्थयोरेकप्रयोजनकत्वज्ञानार्थं सङ्गतिप्रदर्शनं॥ तस्य च ग्रन्थप्रवृत्तौ इष्टसाधनताज्ञानविषया उपयुक्तत्वात् न वैयर्थ्यं × × × × × × × × न च घटादिप्रत्यक्षेऽपि इदानीन्तनक्षतिसाध्यत्वानुमितिप्रयोज्ययागादिजन्यादृष्टद्वारानुमित्युपजीवकत्वमस्त्येवेति कुतो न व्यभिचार इति वाच्यं॥

End. नन्विदमयुक्तं तथापि हेतुसामानाधिकरण्याभावप्रतियोगितावच्छेदकत्वांशे तद्धर्मितावच्छेदकव्याप्तिज्ञानं नानुमितिहेतुः तथासति हेत्वधिकरणवृत्त्यभाव प्रतियोगितावच्छेदकसाध्यतावच्छेदकमिति व्यभिचारज्ञानकालेऽप्यनुमित्यापत्तिः किन्तु तदंशे सद्धर्मितावच्छेदकं तथाविधज्ञानमेव तथा, तथा च गोत्वे समानाधिकरणं।

Colophon. अतःपरं खण्डितं

विषयः। अनुमानचिन्तामणिव्याख्या॥

No. 139. नानार्थरत्नं By श्रीनाथ। Substance, country-made paper, 16 × 5 inches. Folia, 4. Lines, 6 on a page. Extent, 80 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Mayamansing, Pargana Aḷiá, Post Jamurki, Gram Haláliá, Paṇḍit Candra Nāth Bhaṭṭācāryya. Appearance, fresh. Verse. Correct.

Beginning. ॐ नमो गणेशाय।

यं गद्यपद्यवचसां निकरैः प्रभाते
किञ्चित् स्फुरत्कमलकोरकहस्तयुग्माः।
संयत्य चेन्द्रियगणान् मुनयः स्तुवन्ति
भूयादसौ यदुपतिर्मम साध्यसिद्धै॥
नानाकोषान् समालोक्य विचिन्त्य पण्डितैः सह।

नानार्थरत्नं कुरुते श्रीश्रीनाथ इदं लघु ॥
जानन्ति पण्डिताः सर्व्वं तदर्थं न परिश्रमः ।
संक्षिप्तविषयो ग्रन्थः शिशुभिर्दृश्यते मुदा ॥
अनेकार्थकोषेष्वनेकेषु सत्सु भवेद्व्यर्थ एष प्रबन्धो लघुर्नो ।
विधौ पूर्णदेहे यथा ध्वान्तमोषे कलां तस्य भाले विभर्त्ति स्मरारिः ॥
नानार्थः प्रथमान्तोऽत्र ज्ञेयो लिङ्गानुरूपतः ।
स्त्रीपुंनपुंसकैः शब्दैर्बोद्धव्यमपि कुत्रचित् ॥
सप्तम्यन्तन्तु तद्वाच्यं सप्तमी न विशेषणे ।
वर्ज्जयित्वा स्त्रियां पुंसि क्लीवे चेतीह निश्चितं ॥
... ... पर्य्याय उच्यतेऽधुना ॥
प्रकाशे परमे काले ब्रह्मण्यात्मनि कः पुमान् ॥ इत्यादि ।

End. इन्द्रे सूर्य्ये यमे विष्णौ भीरौ सोमे कपौ हरिः ।
× × × सिंहे च मरुते भेके केतौ शुकेऽपि च ।
लोकान्तरे घोटकेऽपि भुजङ्गेऽपि हरिः स्मृतः ॥

Colophon. (अतः परं खण्डितं)

विषयः । नानार्थकशब्दकथनं ॥

No. 140. नाममालावृत्तिः Substance, country-made paper, 13×4 inches. Folia, 164. Lines, 18 on a page. Extent, 8856 ślokas. Character, Nāgara. Date, Saṃvat 1658. Place of deposit, Benares City, Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, old. Prose and verse. Correct.

Beginning. श्रीवीतरागाय । अर्हम् .
धर्मतीर्थकृतां वाचं नत्वा तत्त्वाभिधायिनीं ।
स्वोपज्ञनाममालाया विवृतिं विदधाम्यहम् ॥
श्रेयोर्थमयमारम्भः किं तत्रात्मविकत्थनैः,
परात्मनिन्दां स्तोत्रं हि नाद्रियन्ते मनीषिणः.

End. दिग्देशे काले पूर्व्वादौ प्रागुदक् प्रत्यगादयः,
अव्ययानामनन्तत्वात् दिङ्मात्रमिह दर्शितम् .

यदाहुः.

इयन्त इति संख्यानं निपातानां न विद्यते,

प्रयोजनवशादेते निपात्यन्ते पदे पदे॥ इति।

Colophon. इत्याचार्य्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञाभिधानचिन्तामणिनाममाला-टीकायां सामान्यकाण्डः षष्ठः। समाप्ता चेयं अभिधानचिन्तामणि-नाम-मालायाष्टीका. संवत् १९५८ भाद्रपदमासे कृष्णपक्षे भृगुवासरे॥

विषयः। हेमचन्द्राभिधानव्याख्या॥

No. 141. नारदसंहिता। Substance, country-made paper, 14×5 inches. Lines, 12 on a page. Character, Nāgara. Date ? Place of deposit, District Chapra, P.O. Gopalganj, Harapurā, Jagadeo Paṇḍit. Appearance, tolerable Verse. Correct.

Beginning. श्रीवात्स्यार्काय नमः। श्रीगणेशाय नमः।

अतः शृणुत साक्षादीश्वरो महतो महान्।

आत्मगुहायां निहितो ... ...।

वक्ष्ये शुभाशुभफलप्राप्तये सर्व्वदेहिनां।

होरास्कन्धस्य शास्त्रस्य व्यवहारप्रसिद्धये॥ इत्यादि।

End. श्राद्धकर्मण्यमावस्या लक्षश्राद्धफलप्रदा।

हस्तद्वये पुष्यचतुष्टये च।

हस्तत्रये मैत्रचतुष्टये च।

सौम्यद्वये च श्रवणात्रये च।

श्राद्धप्रदाता बहुपुत्रवान् स्यात्॥

Colophon. इति श्रीनारदसंहितायां श्राद्धलक्षणं॥ शुभमस्तु॥

विषयः। १ अध्याये शास्त्रोपनयनकथनं। २ ग्रहचारादिकथनं। ३ संवत्सरादिकथनं। ४ तिथिलक्षणकथनं। ५ वारलक्षणकथनं। ६ वृक्षफलादितकथनं। ७ योगकथनं। ८ करणादिकथनं। ९ मुहूर्त्तादिकथनं। १० उपग्रहादिकथनं। ११ संक्रान्तिकथनं। १२ गोचरादिकथनं। १३ चन्द्रताराबलादिकथनं। १४ लग्नबलाबलादिकथनं। १५ आद्य-ऋतुफलकथनं। १६ नामादिकथनं। १७ पुंसवनकथनं। १८। सीमन्तोन्नयनकथनं।

१९ व्रतकर्मकथनं । २० नामकर्मकथनं । २१ अन्नप्राशनं । २२ । २३ । मङ्गलाङ्कुरार्पणादिकथनं । २४ मुण्डनादिकथनं । २५ छुरिकाबन्धनकथनं । २६ । २७ । विवाहप्रश्न-कन्यावरपूजादिकथनं । २८ सुरप्रतिष्ठाकथनं २९ । ३० विवाहनववास्तुपूजादिकथनं । ३१ । ३२ यात्रागृहप्रवेश-कथनं । ३३ । ३४ वृष्टिलक्षणकूर्मविभागादिकथनं । ३५ उत्पातकथनं । ३६ बायसमैथुन-शान्तिकथनञ्च । ३७ पक्षिसरटाद्युभशान्तिः । ३८ । ३९ । ४० । ४१ । ४२ । पोतपिङ्गला-दिशान्ति । ४३ परिवेशलक्षणं । ४४ शुभलक्षणादिकथनं । ४५ श्राद्धलक्षणकथनं ॥

No. 142. नारायणशतकम् । (पीताम्बरकविचन्द्रकृत-टीकासहितम्) By विद्याकरपुरोहित । Substance, palm leaf, 11×1½ inches. Folia, 92. Lines, 5 on a page. Extent, 1400 ślokas. Character, Uria. Date ? Place of deposit, Puri, Uria Maṭha, Mohanta Adhikarī Rámkrisṇ. Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीनारायणशतकं ।

अच्छिद्रलं चिरलं यदि समुदयते नष्टमन्वेष्टुमिच्छा
श्रेयः पात्रे तदा स्वे हृदि मिलदमलस्नेहपूरस्य पूर्णे ।
आसाद्य द्योतमानं भ्रमशमशरणदशां संहृतांहःपतङ्गं
दध्यादध्यात्मदीपं दलिततमतमस्तोममीशस्य धाम ॥
हित्वोरःपीठपद्मं तदितरललनालभ्यवाह्यभ्यसीमां
हस्ताभ्यां विभ्रमाभ्यावपि सुभगतमे किम्बं सञ्चारचारुं ।
स्नेहर्द्धिं प्रस्नुवानामपि वनजवनीमादरादूरुयुग्मे
न्यस्याम्भोजालया यत् परिचरति हरेस्तत् स्मरेत् पादपद्मं ॥ इत्यादि ।

टी० प्र० कमला चपलाश्लिष्टा जघनश्रीघनायितं ।
तापत्रयव्यपोहाय नारायणमुपास्महे ॥
पीताम्वरेण मिश्रेण कविचन्द्रेण तन्यते ।
नारायणीयशतकव्याख्या विशदचन्द्रिका ॥ इत्यादि

मू० अ० योगीन्द्राणां विषः षड्विषधरविषमानिच्छतां बोद्धुमङ्ग
वज्रौघोत्थैर्मघोनो धनुभिरगणितैश्चित्रमुद्यद्गुणैश्च ।
निर्व्वाणीभूय भूयः सफलयति मतिं त्वोभया भावमूलं ।
न्यस्योद्दोषां विभूषां महयतु महितुं मौलिमाम्नायमौलेः ॥

End. इति श्रीविद्याकरपुरोहितविरचिता श्रीनारायणस्य प्रत्यक्षवर्णना समाप्ता।

टी० ब० शिरसः विभूषां मौलिमिति पूर्व्वमते मह्रीयतु भक्ता इति शेषः अत्र श्लेषोत्थापितो विरोधालङ्कारः।

विद्वन्मदद्विरदसिंहसिंहसूनुः पीताम्बरः कविकदम्बकेशरीशः।

विद्याकराभिधपुरोहितसूरिकृप्तनारायणीयशतकस्य चकार टीकां॥

Colophon. इति श्रीपीताम्बरकविचन्द्रकृता श्रीनारायणशतकटीका सम्पूर्णा॥

विषयः। श्लोकशतेन श्रीनारायणस्य प्रत्यक्षवर्णनं॥

No. 143. नाचिकेतोपाख्यानम्। Substance, country-made paper, 14×5 inches. Folia, 38. Lines, 8 on a page. Date Sam. 1862. Place of deposit, District Chaprā, P.O. Gopālganj, Harapurā, Jagadeo Paṇḍit. Appearance, tolerable. Verse. Correct.

Beginning. श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥

सूत उवाच।

गङ्गातीरे सुखासीनं कृतस्नानमलङ्कृतं।

प्रमदाभिर्वृतं तत्र दीक्षितं जनमेजयं॥

प्रायश्चित्तविशुद्ध्यर्थं (× ×) द्वादशवार्षिकीम्।

उपदेष्टुं महाभागो द्विजश्च कृतवांस्तथा॥ इत्यादि

End. ज्ञानमाप्नोति परमं सर्व्वाभीष्टफलप्रदं।

धर्म्मः सम्वर्द्धते तस्य हिमांशुरिव सिते यथा॥

तस्मात् श्रुत्वा प्रयत्नेन वाचकं तोषयेत् ततः॥

सन्तानवृद्धिजनकं रहस्यमवनीपतेः॥

Colophon. इति श्रीनाचिकेतोपाख्याने जन्मविशेषप्राप्तिभूतशुभाशुभकथनं नाम अष्टादशोध्यायः॥ संवत १८६२॥

विषयः। १ अध्याये उद्दालक-पिप्पलादसंवादमुखेन पुत्रफलादिकथनं॥ २ चन्द्रवत्या-अरण्यगमनकथनं। ३ पितापुत्रसंयोगकथनं। ४ चन्द्रावतीविवाहकथनं। ५ धर्म्मराजदर्शनं। ६ पितापुत्रसंवादकथनं। नरककीर्त्तनं। ८ नरकगामिसामान्यकथनं। ९ नरकाविशेषकथनं। १०—११ नरकविशेषवर्णनं। १२ कालाकृत्युकथनं। १३—१४ स्वर्गसाधनधर्म्मोपदेशकथनं।

१५ पुण्योदकानदीवर्णनं। १६—१७ यममार्गनिर्णयः। १८ जन्मविशेषप्राप्तिशुभाशुभादिकथनं।

No. 144. नित्यहोमकारिका। By बलराम। Substance, palm leaf, 11 × 1 inches. Folia, 2. Lines, 5 on a page. Extent, 30 slokas. Character, Uria. Date ? Place of deposit, late Paṇḍit Gopīnāth Misra. Appearance, old. Verse. Correct.

Beginning. शुभमस्तु। नमो यज्ञपुरुषाय।

आहिताग्नेर्होमकर्म्म सायं प्रातर्विधीयते।
नर्य्येऽध्वर्य्ये तथाशंसेऽध्वर्युणा स्वयमेव वा॥
नर्य्योऽग्नेयो गार्हपत्यः शंसस्त्वाहवनीयकः।
अध्वर्य्यो दक्षिणाग्निः स्यादिति याज्ञिकसम्मतिः॥
अध्वर्य्युरुद्धरयामीति प्रागस्तजमनोदयात्
वदेत् स्वाम्युद्धरेत्येतन्मदीये होमकर्म्मणि॥ इत्यादि।

End. नर्य्याध्वर्य्यान्तरा गत्वा स्मृत्वाध्वर्य्यन्तु चेतसा।
निष्क्रामेद्दक्षिणद्वारा सद्वाथ स्मार्त्तमाचरेत्॥
बलरामेण रचिता नित्यहोमस्य कारिका।
बालज्ञानाय विद्वद्भिः क्षम्यतामत्र चापलं॥

विषयः। नित्यहोमविषयिणी नियमावलिः।

No. 145. नित्याचारः। By विद्याकर वाजपेयी। Substance, palm leaf, 15½ × 1 inches. Folia, 128. Lines, 6 on a page. Extent, 1180 slokas. Character, Uria. Date ? Place of deposit, Śāsana Dāmodarapur, Purī, late Paṇḍit Gopīnāth Misra. Appearance, old. Prose and verse. Generally correct.

Beginning. श्रीगणेशाय नमः। अविघ्नमस्तु।

यदा यदाहि धर्म्मस्येत्यङ्गीकृतवशीकृतः।
मत्तातपादरूपेण यो जातस्तं हरिं भजे॥

तातपादपदाम्भोजं नत्वा वाजसनेयिनां ।
नित्यान्याह्निककृत्यानि लिख्यन्ते तत्प्रसादतः ॥
दुरितक्षपणार्थानि कानिचिच्च प्रसङ्गतः ।
तथा वैष्णवकृत्यानि लिख्यन्ते चैव नित्यवत् ॥
प्रसक्त्यानुप्रसक्त्या च यद्यत् पुंसामवेक्षितं ।
तत्तत् सर्व्वमिहालेख्यं प्रसङ्गात् साधुतुष्टये ॥ इत्यादि ।

End. तेनैतेषां मध्येऽन्नादीनां प्रवेशाच्च स्यादशुद्धिरिति "क्षुते श्लेष्मपरित्यागे पीते वा भक्षिते सति । चण्डालस्य च सम्भाषे स्वप्ने वाचम्य शुध्यती"त्यादि वाक्यैर्यत्र यत्राशुद्धिरुक्ता तत्र तन्त्रेणाचमनं चाशुद्धिनिवृत्त्यर्थं प्रत्यवायानुत्पादार्थञ्च यत्र चाशुद्धिर्नास्ति तत्र प्रत्यवायानुत्पादनीयतार्थं एवं ताम्बूलभक्षणादावपि चाशुद्ध्यभावेऽपि आचमनं प्राप्नोति अतएव भट्टपादैः परस्परस्पृष्टताम्बूलभक्षणं देवमानावाचमनं च दाक्षिणात्यानां दुराचारा उक्ता इति ।

Colophon. इति श्रीमदग्निचिद्विद्याकरवाजपेयिकृतौ नित्याचारे दिवसस्य प्रथमभागकृत्यं समाप्तं ॥ शुभमस्तु ॥

विषयः । निशान्तादारभ्य दिवसस्य प्रथमभागपर्य्यन्तं वाजसनेयिनां वैष्णवानाञ्च कर्त्तव्यानां कर्म्मणां समुदाहरणं । प्रसङ्गात् तिथिप्रभृतीनां तत्त्वनिरूपणञ्च ।

No. 146. नित्याचारपद्धतिः । By गोपालानन्द । Substance, palm leaf, 13 × 1 inches. Folia, 79. Lines, 6 on a page. Extent, 1985 slokas. Character, Uria. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Beginning. पूर्णमानसः कृष्णः ।
राधाधरमधुपानालसलोलविलोचनोऽवतु नः ॥
शब्दब्रिःशेषभासार्णवमथनेन भृतभूरियशः
कौमोदकीपूर्णचन्द्रः श्रीमार्कण्डेयशर्म्माऽजनि ।
धरणितले मान्यैः काश्यपपुराणान्यवलोक्य ?
भूयो द्विजन्मनां सामविदां हिताय ॥

कात्यायनमुनिगदितं गोभिलभाष्यं तथा वीक्ष्य ।
श्रीगोपालानन्दस्य मानसं प्राप्य दुर्लभं ॥
तथात्मानं समादध्याद्ब्रध्येत यथापुनः ।
ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत् ॥
रात्रेः पश्चिमयामस्य मुहूर्त्तो यस्तृतीयकः ।
स ब्राह्म इति विख्यातो विहितः सम्प्रबोधने ॥ इत्यादि ।

End. बृहस्पतिमतं पुण्यं प्रातरुत्थाय यः पठेत् ।
दुःस्वप्नं जायते तस्य सुस्वप्नं नात्र संशयः ॥

Colophon. इति श्रीगोपालानन्दविरचिते नित्याचारपद्धतौ सायाह्नादिरात्रिकृत्यस्वप्न-फलादिकं समाप्तं ॥ समाप्तोऽयं नित्याचारपद्धतिः ।

विषयः । सामगानां नित्यकृत्यनिरूपणं ।

No. 147. निर्णयामृतं । By अल्लाड़नाथ । Substance, country-made paper, 13×5 inches. Folia, 81. Lines, 11 on a page. Extent, 2400 ślokas. Character, Nāgara. Date ? Place of deposit, District Chaprā, P.O. Samariā Siśoya, Paṇḍit Rāghava Prasād. Appearance, very old. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः ॥

कारणमेकं जगतां वारणमास्येन वारणं विपदां ।
किमपि महोमहनीयं प्रत्यूहव्यूहदारणं वन्दे ॥
२७ श्लोकाः न सन्ति ।
× × × × ×
× × × × ×
× × × × ×
जलेन दिव्येन सदाभिषिक्ताः
सिंहासनाध्यासयिनो निरस्ताः ।

श्रीसूर्य्यसेनेन वनेऽपि राज्यं
कान्तातपचाः कलयन् प्रमिथाः ॥
× × × × ×
चकास्ति यस्यातिततः प्रतापः
प्रतापसेनोवरजः प्रसिद्धः ।
भव्याभिरामस्य सदाग्रजस्य
यो लक्ष्मणाकारमुपैति भव्यं ॥ एकः श्लोकोनास्ति ॥
× × × × ×
श्रीदेवसेन स्तनयोपि सोपी-
नारायणस्याजनि कामरूपः ॥
लब्धप्रसादेन महेश्वरस्य रामारतिस्तुष्टिमुपैति यत्र ।
× × × × ×
× × × × ×
× × × × ×
× × × × ×
चत्वारः श्लोकाः न सन्ति ।
विद्वत्सुमत्स्वपि महत्सु समाश्रितेषु ।
श्रीभिल्ललक्ष्मणसुतः सुतरामसुष्य ॥
श्रीसूर्य्यसेनन्दपतेरुपतेजसोऽभूत् ।
चल्लाङ्गनायमतिमाननिमानपात्रं ॥
एनं कदापि सुमतिं नृपतिः स्वनाम्ना ।
श्रौतादिकर्म्मसु स कालविनिर्णयाय ॥
वादिव्रतपतिस्तच्चयशा निशात-
शस्त्राञ्चताञ्चितशतःशतमन्युकल्पः ।
अगाधग्रन्थपाथोधिमथालोच्य मया श्रिया ।
समुद्धृतं न्पादेशात् वेनेदं निर्णयामृतं ॥

End. प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि ।
कोटिदानं भवेद्विष्णोर्महापूजां प्रवर्त्तयेत् ॥ इति ।
कोटिदानं प्रार्थपरिवर्णनं ।

Colophon. इति भाद्रपदैकादशी ॥ अतःपरं खण्डितं ॥

विषयः। तिथ्यादिनिरूपणं ॥ श्राद्धादिनिरूपणं ॥ द्रव्यशुद्धिकथनं। अशौचनिरूपणं ॥ कर्म्मसामान्यनिरूपणं ॥ नक्ततिथिकथनं। एकभक्ततिथ्यादिनिरूपणं ॥ उपवासादिव्रत-साधारण-युग्मतिथ्यादिनिरूपणं ॥ तिथिसामान्यनिरूपणं ॥ तिथ्यादिव्यवस्थाकथनं ॥ दुर्गोत्सवव्यवस्था-कथनं ॥ हरिशयनादिकथनं ॥ अतःपरं खण्डितं ॥

No. 148. नैषधचरितटीका (मनोहारिणी) By उदयकर। Substance, country-made paper, 12×4½ inches. Folia, 473. Lines, 9 on a page. Character, Nāgari. Date, Sam. 1851. Place of deposit, Sīsoa, District Chaprā, Paṇḍit Rāghava Misra. Appearance, old. Prose. Incorrect.

Beginning. श्रीगणेशाय नमः।

इह खलु पुराणपथप्रसिद्धनिखिलनायकगुणग्रामविश्राममहाराजाधिराज-श्रीमन्नलराजचरितमुपवर्णयितुमुपक्रममाने वस्तुनिर्द्देशमुखेन कविरलङ्कार-लक्षितं महाकाव्यलक्षणमाह। निपीययस्येत्यादि ॥ अस्यार्थः। स नल आसीत् अभवत्। स कः बुधाः पण्डिताः यस्य नलस्य कथां निपीय × × × × सुधामपि अमृतमपि न आद्रियन्ते विषयीकुर्व्वन्ति ॥ अर्थात् यत् कथामित्यन्वयः ॥

End. तत् परीभूय तदेकपरायणानित्यत्वेन तमेव परमात्मानं प्रतिपादयन्ती अनित्यत्वादन्यदुक्तं परिहरन्तीत्यर्थः ॥

आनन्दपदाङ्कसर्गभङ्गपद्यमिदं ॥

× × × × ×

स श्रीराजकरः सुधाकरकरद्वारक्रियाकीर्त्तिभिः
प्रख्यातः पृथिवीतले जनयिता यस्य प्रशस्यात्मनः ॥
रामरत्नमभूद्व लक्ष्मणवती सूतिः सतीभूषणं।
सोऽयं काव्यकलाकलापकुतुकी श्रीरामचन्द्रः कविः ॥
मीमांसावल्लातर्कश्रुतिपथपथिकः स्वर्णशर्म्मा धरान्तः।
कल्याणी पुण्यवाणी तनयमजनयत् यस्य साध्वीधुरीणा।

टीकायां नैषधस्योदयकरकविना तेन यत्नैः कृताया-
मस्यामेकादशोऽग्राहिवुधगुणनिधेस्तस्य वर्गेन सर्गः ।

× × × × ×

अङ्गुल्यामङ्गुलीयं कुण्डलयवचिता कर्णयोः स्वर्णभूषा ।
तोषायाम्याः समाप्तावुदयकरकवे रामचन्द्रेण दत्तं ।

Colophon. इति श्रीतीरभुक्तिवास्तव्यमहामहोपाध्यायश्रीमद्गदाधरप्रपौत्र महामहोपाध्याय-श्रीरामधरपौत्र-श्रीस्वर्णधरात्मजमहामहोपाध्याय श्रीमदुदयकरविरचिता सकलकायस्थवंशावतंसविविधविद्यानवद्यविद्वज्जोद्गीगरिष्ठसकलधर्म्मशास्त्राभ्यासनिर्णीतकृत्यजातविख्यातयशोराशिविहसितशिशिरकिरणकिरणजात-सद्ठकुरमतृकुलश्रीश्रीकरप्रपौत्रसद्ठकुरभास्करपौत्रसद्ठकुर-श्रीराजकरात्मजसतनस्रापतेयसञ्चिल वसुवर्षणप्रोषितानेकभूदेवहन्दवदनारविन्दसहकविलसकरन्दसन्दोहसुन्दरस्वान्तनिर्णीतविविधगुणगणाम्रतासारस्रपित-भूतधात्रीवलय-सकलार्थिसार्थकृतार्थीकरणकल्पद्रुमावतारदुस्तरसरस्वतीपूरावगाहन-निपुण-सद्ठकुर-श्रीरामचन्द्रकारिता सकलकविकुलावतंसश्रीहर्ष-कविविरचितनैषधाभिधानमहाकाव्ये श्रीमन्मनोहारिणीटीका समाप्ता । संवत्सरे एकाधिकपञ्चाशत्के समयनाम्नि पौषे वायु × × × षलिखत्पुस्तकमिदं ।

विषयः । नैषधकाव्यस्य व्याख्यानं ।

No. 149. न्यायशास्त्रप्रदीपः । Substance, country-made paper, 14 × 4 inches. Folia, 18. Lines, 7 on a page. Extent, 250 slokas. Character, Bengali. Date ? Place of deposit, Zilla Mayamansinha, Pargana Aṭiyâ, Post Jamurki, Háláliya, Paṇḍit Gurudâsa Vidyâratna. Appearance, tolerable. Prose. Incorrect.

Beginning. अथ शब्दप्रमाणं निरूप्यते ।
तत्र भ्रमप्रमादविप्रलिप्साराहितेन पुरुषेण प्रयुक्तं प्रमाणं ।
भ्रमो ऽतद्वति तत्प्रकारकं ज्ञानं । प्रमादोऽनवधानता विप्रलिप्सा प्रतारणेच्छा ।
अभिप्रयुक्तं वाक्यन्तु न प्रमाजनकं किन्त्वप्रमाजनकमेव । इत्यादि ।

End. अनेन घटेन जलमाहरेत्यत्र घटपटप्रयोगे प्रथमत एवाप्रयोजनकल्पनायां लक्षणा, यथा च लक्षणा यदि लक्षार्थस्य तद्वाचकपदेन ।

नत्वा गौरीचरणयुगलं वागधीशञ्च नत्वा
मान्यान् सर्व्वानपि परगुणोद्देशिनः सम्प्रणम्य ।
अध्येतृणां × × × × विज्ञान-हेतुं ।
भट्टाचार्यो वितनुत इमं न्यायशास्त्रप्रदीपं ॥

विषयः । आकाङ्क्षादीनां लक्षणकथनं । शाब्दबोधे विशेष्यविशेषणभावनिरूपणं । नञर्थविवेचनं । एवकारस्य व्युत्पत्तिविवेचनं । उपसर्गार्थविवेचनं । निर्द्धारणवाक्यस्य व्युत्पत्ति-कथनं । द्विकर्म्मकवाक्यार्थनिरूपणं । आख्यातविचारः । लक्षणादिनिरूपणं ।

No. 150. न्यायामृततरङ्गिणी । Substance, country-made paper, 10×5 inches. Folia, 102. Lines, 8 on a page. Character, Nāgari. Date ? Place of deposit, Durgāghāṭ, Benares City, Paṇḍit Bābāchārī Sāstrī. Appearance, old. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।

ॐ श्रियः सदानन्दगुणै र्भृतं भुजे ।
भुजेऽप्यदोषं तदशेषशक्तिभिः ॥
विशेषवाणीमितमात्मनो मुदा ।
मुदारमीशं प्रियवल्लभं नुमः ॥

× × × × × × × धर्म्मव्याकृतपूर्णाधिकृतसदाचारस्मृतिव्याकृतिव्याजेन
प्रणमामि तं पितरमुद्बोधाय शब्दार्थयोः ।
× × × ×

नमामि तं व्यासकुलावतंसं
नारायणाचार्य्यमथाग्रजं मे ।
व्यासविन्दूरमाचार्य्यकृती षड्व्याकृतिच्छलात् ।
रामो × × आनत्य श्रुतं × × ×
उद्यद्व्यासमहोदधेर्विदुरुषी गम्भीरकुम्भी नयत् ।?
भङ्गान् सत्प्रतिविम्वमम्बुजदृशापत्नीविचित्रीकृतं ।
स्वच्छन्दोघ-तरङ्गिणी द्विजमुखैर्न्यायामृतं व्याकृतं ।
सेवं सेवमिरासुरा इनसभे ऽराजन्त लेखा इव ॥

इह खलु सकलविद्वन्मणिचिन्तामणिर्व्यामतीर्थ × × × × × विशेष-चतुष्टयवर्त्तेनेष्टदेवतामभिष्टौति । निखिलगुणनिकायमित्यादिना ॥

End. तस्मात् प्रतिकर्म्मव्यवस्थानुपपत्त्या × × प्रतिभासमानं शरीरमिति नोपाधेः साधनवतः पश्चाद्व्याप्तिरिति परनीत्याचारमुपाधिर्द्रष्टव्यः ॥

व्यासाद्रिसुततर्काम्बु पूरैः पचयुगं युजि ।
न्यायामृततरङ्गिण्यां इष्टत्वादेरुपाधयः ॥
अतःपरं खण्डितं ।

विषयः । व्यासतीर्थकृतन्यायामृतस्य व्याख्यानं ॥

No. 151. पञ्चपक्षीटीका By शुकदेव । Substance, country-made paper, 15 × 3 inches. Folia, 10. Lines, 8 on a page. Extent, 130 slokas. Character, Bengali. Date ? Place of deposit, Zilla Medinipur, Post Garvetá, Grám Khunverá, Babu Vaikuṇṭhanáth Cakravartī. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐनमो विघ्नेश्वराय ।

देवदेवं परं स्थाणुं देवानां सर्व्वदेहिनां ।
त्रिलोकनाथ दीनानां त्वां भोगं स्वर्गमोक्षदं ।
सर्व्वज्ञं सर्व्वगं शान्तं ज्योतिर्लिङ्गमयं शिवं ।
प्रणम्य पञ्चपक्षीणां क्रतमत्र विवेचनं ॥
इदमेवाद्भुतं प्रोक्तं शब्दलं सारबोधकं ।
गोपितं कोटिशास्त्रेषु इदानीं प्रकटीकृतं ॥
कल्पनीया अकारादौ स्वरादिवारपञ्चकाः ।
नन्दाद्यास्तिथयः पञ्च रेवत्यादिभमण्डलाः ।
मेषाद्याराशिभेदाश्च गन्धाद्या विषयास्तथा ।
ब्रह्माद्या ईश्वराद्याश्च पञ्च पञ्च यथामताः ।
× × × × × × × ×
कादिहान्ता वर्णयुता भृताद्याश्चमकपकाः ।
ऊर्द्धाधसमदक्षिण प्रश्नरूपाः × × प्रदाः ॥
मुनयो महादेवं पप्रच्छुः ब्रूयुः किं कृत्वा सर्व्वशास्त्रविशारदं सर्व्वेषां भक्तानां

मन्त्रार्थज्ञानशास्त्राणां विशारदं अभिगम्य गत्वा मुदा हर्षेण किमर्थं भविष्यदर्थबोधाय भाविप्रयोजनज्ञानाय । इत्यादि

End. गम्भीरसस्तथारूपं स्पर्शः शब्दश्च पञ्चमः ।
मारणं शोषणञ्चैव मोहनञ्च तथैव च ।
सन्त्रासनं प्रमथनं कामवाणाः प्रकीर्त्तिताः ॥
इत्युक्तं पञ्चपक्षीणां लाभालाभजयादिकं ।
उक्तं श्रीशुकदेवेन शब्दलं शङ्करोदितं ॥

Colophon. इति पञ्चपक्षीटीका समाप्ता ॥ श्रीहरिः । श्रीमते रामानुजाय नमः ।

विषयः । पञ्चपक्षीव्याख्यानं ।

No. 152. परामर्शदीधितिटीका। By गदाधर। Substance, country-made paper, 16×3 inches. Folia, 55. Lines, 8 on a page. Extent, 5000 slokas. Character, Bengali. Date ? Place of deposit, Zilla Mayamansinha, Pargana Aṭiyá, Post Jamurki, Gram Háláliya, Paṇḍit Gurudās Vidyāratna. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमः श्रीकृष्णाय ।

पक्षतां निरूप्य विशिष्टपरामर्शत्वेनानुमितिहेतुता, ज्ञानद्वयकारणतावादि-मीमांसकविप्रतिपत्तिं निरस्य मणिकारेण व्यवस्थापिता तत्र सङ्गतिं दर्शयति लक्षणोपघातेनेति ॥ इत्यादि ।

End. अयञ्चाभ्युपगमवादः तत्तत्पक्षतावच्छिन्नविशेष्यकवह्न्याद्यनुमितित्वरूप विशेष-कारणकार्य्यतावच्छेदकगर्भे वह्न्यनुमितित्वादिनिवेशेनैवोपपत्तेस्तदवच्छिन्नं प्रति हेतुत्वान्तरस्य निर्युक्तिकत्वात् सुखादिसाधारणजन्यविशेषगुणत्वा-वच्छिन्नं प्रति मनस्त्वेन कारणताकल्पनात् तत एवानुमितौ सकरणत्व-निर्व्वाहेऽनुमितित्वावच्छिन्नं प्रत्ति ज्ञानत्वादिना हेतुत्वमपि निर्युक्तिक-मित्यक्षरसवीजमत्र बोध्यं ॥

Colophon. इति श्रीगदाधरभट्टाचार्यविरचिता परामर्शदीधितिटीका समाप्ता ॥ श्रीतारिणीचरणपङ्कजमस्तुचित्ते ॥

विषयः । रघुनाथशिरोमणिविरचितायाः परामर्शदीधितेर्गदाधरकृता व्याख्या ।

No. 153. परिभाषाप्रदीपार्चिः। By उदयङ्कर। Substance, country-made paper, 10 × 4½ inches. Folia, 116. Lines, 8 on a page. Character, Nāgara. Date ? Place of deposit, District Chapra, P.O. Samāriya Sisoyā, Paṇḍit Rāghava Prasād. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः।

समदद्यानन्दनिदानं शिवयोर्धिरं नमस्कुर्वत।
वेरम्वं निष्प्रत्यूह फलाशये।?
वक्षकोपुस्तककरां पुण्डरीकासमन्वितां।
शारदां नीरकुन्देन्दुधवलां भावयेतरां॥
कृत्वा पाणिनिरूपाणां मितष्टत्यर्थसंग्रहं।
परिभाषाप्रदीपार्चिस्तन्तोषायो निरूप्यते॥
तत्र तावत्, नामलिङ्गवत्वे प्रतिपन्दिग्धार्थस्य नियामकत्वात् परिभाषात्वं॥
इत्यादि।

End. वक्ष्येकोनुम्भावत इत्यत्र परिभाषायां कर्त्तव्यायां (......) सर्व्वमपे विवेचयिष्यामः॥
परिभाषाप्रदीपार्चिषदयङ्करदर्शिते।
द्वितीयो × × × × × कृताध्यायः समाप्ततः॥

विषयः। पाणिनिपरिभाषायाः व्याख्यानं।

No. 154. पर्य्यायमुक्तावली। Substance, palm leaf, 10½ × 1 inches. Folia, 47. Lines, 4 on a page. Extent, 282 slokas. Character, Nāgara. Date ? Place of deposit, Puri, Imār Maṭha or Rājgopāl Maṭha, Mohānta Mahārāj Sri Raghunandan Rāmānuj Dās. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः। अविघ्नमस्तु।

वर्हिवर्हापीडः श्रुशिरपरो बाल × × × गोष्ठे।
मेदुरमुदिरश्यामश्च वचिरन्यादेष गोविन्दः॥
पूर्व्वं लोकहिताय माधवकराभिख्यो भिषक् यो बल-
कोषान्वेषण-तत्परः प्रविततायुर्व्वेदरत्नाकरात्।

मालां रत्नमयीं चकार स यथालाभं न शोभाधिकां
साम्नाभिः कमनीयभक्तिरचना × × × × ॥
उत्तमगुणपरिणा × सौकर्य्यादथबोधतिमिरघ्ना ।
सम्प्रति सुधियां हृदये विलसतु पर्य्यायमुक्तावली ॥ इत्यादि ।

End. कृतान्नवर्गः कथितो द्रव्यैरेभिस्त्रिषष्टिभिः ।

Colophon. इति पर्य्यायमुक्तावल्यां भुक्तादिकृतान्नवर्गो विंशतिः ।
अतः परं सम्भवतः खण्डितं ॥

विषयः । इति पर्य्यायमुक्तावल्यां कर्पूरादिसुगन्धिवर्गः । १ । इति जीवकादिमध्यगन्धिवर्गः । २ । इति कर्कटाख्यादि-हीनगन्धिवर्गः । ३ । इति अहिफेणादि-सारजवर्गः । ४ । इति माणिक्यादिरत्नवर्गः । ५ । इति धातूपधातुवर्गः । ६ । इति द्राक्षादिमधुरवर्गः । ७ । इति दाड़िम्बाद्यम्लवर्गः । ८ । जीवन्त्याद्युत्तमशाकवर्गः । ९ । इति पाठादितिक्तशाकवर्गः । १० । इति जात्यादिपुष्पवर्गः । ११ । इति कुष्माण्डादिलताफलवर्गः । १२ । इति कशेरुकादिकन्दवर्गः । १३ । इति न्यग्रोधादिमहावृक्षवर्गः । १४ । इति नन्दिवृक्षादिह्रस्ववृक्षवर्गः । १५ । इति दुर्व्वादिवर्गः । १६ । इति ताम्बूलादिलतावर्गः । १७ । इति हरेण्वादिशिम्बिधान्यशूकधान्यवर्गः । १८ । इति श्यामाकादितृणधान्यवर्गः । १९ । इति भुक्तादिकृतान्नवर्गः । २० ।

No. 155. परिभाषासूत्रभाष्यम् । By कपर्दिस्वामी । Substance, country-made paper, 10 × 4 inches. Folia, 33. Lines, 22 on a page. Extent, 794 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Vāmanāchāryya. Appearance, old. Prose. Correct.

Beginning. यज्ञं व्याख्यास्यामः । व्याख्यानं नाम शब्दप्रतिपादितार्थस्य न्यायलब्धार्थस्वरूपकथनं । अस्मादयमर्थोलभ्यत इति इह यज्ञशब्देन साङ्गोपाङ्गो यागोऽभिधीयते ।

End. यस्य तत्र प्रयोजनं नास्ति न तस्य तत्र प्रणयनं यथादक्षिणाग्नेर्दर्शपूर्णमासार्थे होमे सारस्वते ।

Colophon. इति कपर्दिस्वामिभाष्ये परिभाषापटलम् ।

विषयः । परिभाषासूत्रव्याख्या ।

No. 156. **पाकावली ।** Substance, country-made paper, 10 × 4 inches. Folia, 18. Lines, 7 on a page. Character, Nāgara. Date, Saṃvat 1828. Place of deposit, District Chāprā, Sisoyā, Paṇḍit Rāghava Prasād. Appearance, tolerable. Verse. Correct.

Beginning. श्रीगुरुचरणाभ्यां नमः ।

अथ पाकविधि लिख्यते ।

प्रथमस्त्रीयोग्यः सौभाग्यशुण्ठीपाकः ।

प्रस्थत्रयं शुडमत्त्रौषधस्य विपाचयेत् गव्यघृतैःसमे च ।

चतुर्गुणक्षीरसमस्तखण्डं संग्राह्य ताम्रायसले कटाहे ।

प्रत्येकतो जातिफलं फलत्रयञ्च जीरत्रयं धान्यशताह्वके च ।

वल्लीपकुल्याघनबालकानि द्राक्षाविदारी घनसारकञ्च । इत्यादि

End. गोक्षुरकः शतमूलिका वानरी नागवल्ला चातिबला च

सर्करया पयसा निशि पेयं यस्य गृहे वनिता शतमस्ति ।

Colophon. इति पाकविधिः । संवत् १८२८ ।

विषयः । सौभाग्यशुण्ठीपाककथनं । सुपारिपाककथनं । मुशलीपाककथनं । गोक्षुरपाकादि-फेनपाक-हरितकीपाकादिकथनं कामेश्वररसपाकादिकथनं ।

No. 157. **पाण्डवचरित्रम् ।** Substance, country-made paper, 10 × 4 inches. Folia, 162. Lines, 17 on a page. Extent, 9720 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Diṅmaṇḍalācārya Mahārāja Bālcandra Sūri. Appearance, old. Verse. Correct.

Beginning. नमः श्रीसर्वज्ञाय ।

श्रियं विश्वत्रयं चाच नि × × × पु × × × तु वः प्रभुः

शङ्करः पुण्डरीकाक्षः श्रीमन्नाभिसमुद्भवः ।

पूज्याः प्रकृतिः श्रीनेमे यांतु × × × देशनागवी ।

× × × स्मरादयो यस्याः चीरं मोक्षसुखं पुनः ।

End. यावत् संसारतापव्यतिकरभिदुरा वाग् जिनानां मुनीन्द्राः ।

प्रज्ञाकान्तावगाढ़ा विभुरयति सुधादीर्घिका दर्पमुद्रां ।

तावत् × × × × स्वरकमलकलां पुष्यदश्रान्तमस्यां ।
विश्वं विद्वद्विरेफार्त्तितमहिममहाकाव्यमेतद्विनोतु ॥

Colophon. इति श्रीमलधारि श्रीदेवप्रभसूरिविरचिते पाण्डवचरिते महाकाव्ये बलदेव-स्वर्गगमनं श्रीनेमिनाथमोक्षगमनं पाण्डवनिर्वासवर्णनं नामाष्टादशोऽध्यायः ॥

विषयः । जैनमते पाण्डवचरित्रवर्णनम् ।

No. 158. पार्श्वनाथचरित्रम् । Substance, country-made paper, 11 × 4 inches. Folia, 79. Lines, 15 on a page. Extent, 3555 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, old. Verse. Correct.

Beginning. ॐ नमः

श्रिये तत् परमं ज्योति र्द्योतिताशेषदिङ्मुखं ।
समस्तं वस्तु यद्भासां हस्तन्यस्तमिवाजनि ॥

End. विहारिहारिप्रतिबोधसिद्धिं सौधाधिरोहप्रतिबन्धशुद्धं ।
श्रीपार्श्वभर्त्तुश्चरितेऽत्र सर्गःषष्ठः समाप्तिं समीयाय रम्यः ॥

Colophon. श्रीहेमविजयगणिविरचिते श्रीपार्श्वनाथचरित्रे षष्ठः सर्गः सम्पूर्णः ।

विषयः । जैनतीर्थङ्करेषु त्रयोविंशतीर्थङ्कर-श्रीपार्श्वनाथचरित्रवर्णनम् ॥

No. 159. पितृमेधभाष्यम् । Substance, country-made paper, 11 × 6 inches. Folia, 8. Lines, 10 on a page. Extent, 180 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, new. Prose. Correct.

Beginning. श्रीः

जीवतः कर्माणि यजमानोऽनुवर्त्तते अग्निहोत्र-चातुर्मास्य-दर्शपूर्ण-मासादीनि कर्माणि मुमूर्षोर्यजमानस्य यथा चोदितकालानपेक्षया जीवतो यजमानस्य शीघ्रं प्रधानकरणमात्रेणापि संख्यातानि ।

End. इत्थिषतोऽग्रेवंशद्विरण्यादिविभमवस्थाप्य प्रत्येनाः पैतृकर्षापाकरणसमर्थाः
त्रिः प्रदक्षिणं करोति ।

Colophon. इति पितृमेधभाष्यं समाप्तं ।

विषयः । पितृमेधव्याख्या ।

No. 160. पूर्णाभिषेकदीपिका । By आनन्दनाथ । Substance, country-made paper, 18 × 5 inches. Folia, 55. Lines, 10 on a page. Extent, 2000 slokas. Character, Bengali. Date ? Place of deposit, Sivapur *via* Tangail, Paṇḍit Bhabānīnāth Bhaṭṭacāryya. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. ॐ नमः शिवाय परमात्मने ॥
नत्वा श्रीगुरुपादाब्जमानन्दनाथशर्म्मणा ।
क्रियते कौलिकप्रीत्यै पूर्णाभिषेकदीपिका ॥
ज्ञात्वा श्रीशिवयोः सदागममतं सत्सम्प्रदायाद् गुरो
स्त्वन्तेऽच मुमुक्षूणामपि सतामानन्दसन्दायिका ।
गोप्येयं खलु यत्नतो यदि भवेत् संसारदुःखार्णवात्
मन्तर्मुक्ति समिच्छुको यतिवरो मूर्खेषु दिव्यं मम ॥

आचारचिन्तामणौ । कलावागात्मिका पूजा न शस्ता च पुराणिकेति ।
आगमकल्पद्रुमे । श्रुतिस्मृतिपुराणोक्तैः पूजा कार्य्या युगत्रये ।
आगमोक्तविधानेन कलौ देवान् यजेत्सुधीः ॥ इत्यादि ।

End तथानन्दो ब्रह्ममयस्तथा वेष्टितं विश्वं ।
तस्यांशेन सर्व्वाः सम्भवन्तीति ॥

Colophon. इत्यहंकालीवंशीयश्रीरमानाथसूनुना ।
भूदेवानन्दनाथेन देवेनाकृतदीपिका ॥
× × × × × संमाने शाके सद्गुरुदेशतः ।
समाप्तेयं पद्मो गोप्या पूर्णाभिषेकदीपिका ॥

विषयः । कलावागमोक्तविधानेन पूजाकर्त्तव्यतिकथनं । आगमलक्षणवेदाद्यसप्राचारभाव-लक्षण चतुर्विधाश्रमकुलाचारपूर्णाभिषेकविधानं अभिषेकभेदकथनं । अभिषेकमात्र अक्रानुष्ठाना-

भिषेक-गुरुनिर्णय-कुलधर्म्मप्रशंसा-कौलिकलक्षण-कौलज्ञानप्रशंसा-कौलार्चनफल-गृहस्थाश्रमि-कौललक्षण-धीरलक्षण-दिव्यवीरपूजाकालनिर्णय-योगानुष्ठान-कामकलानिर्णय-तत्त्वज्ञान-निर्णयाः। कौलकम्बलासनादिनिर्णय-कौलयोगिरहस्यमालानिर्णयाः कलौ पश्वाचाराभावः दिव्यवीरयोः पुरश्चरणविधानं। प्रथमाधिकारेणादिकथनं। दिव्यवीरयोः प्रायश्चित्तविधानं कालीकुलदेवताश्रीकुलदेवतानिर्णयः। अन्तर्यजनध्यानादिनिर्णयः। दिव्यवीरस्नानविधिः पूर्णाभिषिक्तपानविधानमुक्तिलक्षणादिकथनं॥

No. 161. प्रक्रियादीपः (खण्डितः) By प्रद्युम्नविद्याभूषणाचार्य्य। Substance, palm-leaf, 15×1 inches. Folia, 79. Lines, 4 on a page. Extent, 3990 ślokas. Character, Uria. Date ? Place of deposit, Puri, Rājgopāl Matha, Mahanta Mahārāj Srī Raghunandan Rāmānuj Dās. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः।
लम्बोदरपदयुगलं वृन्दारकवृन्दवन्दितं वन्दे।
भक्तजनकल्पवल्लीं जगदम्बामम्बिकाञ्च गुरुं॥
जाड्यान्धकारशमनो विविधपदार्थावधारणे हेतुः।
विद्याभूषणकृतिना विधीयते प्रक्रियादीपः॥
पदसाधनपरिपाटी योग्यैः सुकुमारबुद्धिप्रतिपत्त्यै।
परिशोधितरसवत्या सूत्रैः क्रियतेऽनुगृह्यतां सद्भिः॥ (?)
अ इ उ ऋ ऌ क ए ओ ङ ऐ औ च इति सूत्रचतुष्टये एकादश-प्रत्याहारा गृह्यन्ते॥ इत्यादि।

End. इति उभयपदिनः, अथ कण्ड्वादयः कण्ड्वादिर्यः कण्ड्वादेरुत्तरे यो भवति कण्डूयति कण्डूयः स्त्रीलिङ्ग मह्विञ ... ... कण्डूयाञ्चकार महीयाञ्चकार। अतः परं खण्डितं॥

विषयः। संज्ञासन्ध्यादिशरीरो व्याकरणविशेषः। नास्त्यस्य समाप्तिः केवलमस्य पुष्पिकयैकया निरूप्यतेऽस्य कर्त्तुर्नाम यथा इति श्रीप्रद्युम्नविद्याभूषणाचार्य्यविरचिते प्रक्रियादीपे सन्धिप्रक्रिया समाप्ता।

No. 162. प्रतिहारसूत्रभाष्यम् । By वरदराज । Substance, country-made paper, 12 × 5 inches. Folia, 39. Lines, 16 on a page. Extent, 1950 ślokas. Character, Nāgara. Date, Saṃvat 1693. Place of deposit, Benares City, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. ॐ महागणपतये नमः . ॐ नमः श्रीसामवेदाय .
ॐम् वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे,
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् .
नमोऽस्तु तस्मै देवाय यः प्रह्वयाप्राजन्मनां ।
कार्ष्णे च वेदे प्रथमः साक्षात् देवकी × सुतम् । ?
यो वामनाचार्य्यमपात् (?) अनन्तनारायणयज्वसुतात्
अजनि उग्गिकाख्यो यः साङ्गे श्रौते च सामवेदे यः ।
रचयति स वरदराजः प्रतिहारार्षेयकल्पयो वृत्तिं ।
बोध्य च ब्राह्मणसूत्रोपग्रन्थ-निदानतद्व्याख्याः ॥

End. अपि चैकार्षेयानां + + + + दैवत + + + न्यायोऽस्माभिः प्रदर्शितं पूर्वं कार्ष्ण्यं छन्दोदैवतविनियोगानां तु दर्शयिष्यामः . आर्षेयकल्पविवृतिस्तु + + + + नास्ति + + + + नुसारेण क्रमात् .

Colophon. इति श्रीवरदराजकृतौ प्रतिहारभाष्ये पञ्चदशखण्डः प्रतिहारभाष्यं समाप्तिमगमत् . संवत् १६९३ . कार्त्तिकशुक्लद्वादश्यामश्वे (?) .

विषयः । सामवेदप्रतिहारसूत्रव्याख्या .

No. 163. प्रत्यकतत्त्वविवेकटीका । By रामकृष्ण । Substance, country-made paper, 11 × 5 inches. Folia, 195. Lines, 10 on a page. Character, Nāgara. Date ? Place of deposit, District Chāprā, Sisoyā, Paṇḍit Rāghavaprasād. Appearance, very old. Prose. Incorrect.

Beginning. श्रीगणेशाय नमः ।
नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
प्रत्यक् तत्त्वविवेकस्य क्रियते पददीपिका ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारादिप्राप्तमिष्टदेवतागुरुनमस्कारलक्षणं मङ्गलाचरणं स्वेनानुष्ठितं । शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति ॥ अर्थात् विषयप्रयोजने सूचयति। नमः श्रीशङ्करानन्दगुरुपादाम्बुजन्मने इत्यादि । शं सुखं करोति इति शङ्करः सकलजगदानन्दकरः परमात्मा एष ह्येवानन्दयतीति श्रुतेः॥ आनन्दः निरतिशयप्रेमास्पदत्वेन परमानन्दरूपप्रत्यगात्मा, शङ्करश्चासावानन्दश्चेति शङ्करानन्दः प्रत्यगभिन्नः परमात्मा स एव गुरुः। परिपक्वमलोत्पादनहेतुशक्तिपातेन योजयति परे तत्वे सदीक्षया चार्य्यमूर्त्तिस्थ इत्यागमात् + + + + + + जीवब्रह्मणोरेकत्वलक्षणविषयसम्भावनाय जीवस्य सत्यज्ञानादिरूपत्वादिकं दिदर्शयिषुरादौ ज्ञानस्याभेदप्रतिपादनेन नित्यत्वं साधयति शब्दस्पर्शादयः इत्यादिना ॥

End. तद्वाक्यगतस्यैकीभूत इतिपदस्यार्थमाह । विज्ञानमय (मूल्ये यो नूपयुक्तः)? + + + + येनैक्यतां प्राप्त इति यश्चात्मा पुरा जागरणावस्थायां विज्ञानमयमुख्यैः स वा अयमात्मा ब्रह्मविज्ञानमयो मनोमयः + + + + + + क्रोधमय इत्यादिश्रुत्युक्तैराकारविशेषैर्युक्तोऽभूत् अतःपरं खण्डितं ॥

विषयः। प्रत्यक्तत्वविवेकाख्य-पञ्चदश्यनुक्रमणिकाया व्याख्यानम् ।

No. 164. प्रपञ्चसारसम्बन्धदीपिका। By उत्तमबोधः। Substance, country-made paper, 10×4 inches. Folia, 306. Lines, 9 on a page. Extent, 6000 ślokas. Character, Nāgara. Date ? Place of deposit, Patna City, Saṃskrita Sanjīvanī, Paṇḍit Jayanārāyana Vājapeyī. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

वन्देऽहं दक्षिणामूर्त्तिं सर्व्वविद्याप्रवर्त्तिकां ।
भुक्तिमुक्त्योः प्रदातारं सर्व्वज्ञं सर्व्वहृच्छ्रितं ॥
+ + + + + सरस्वती सा कृपया गिरं मे ।
+ + + + + प्रपञ्चसारार्थजुषं तनोतु ॥
व्याख्या विशेषानालोच्य सारं संगृह्य यत्नतः ।
प्रपञ्चसारसम्बन्धदीपिका रच्यते मया ॥

इह खलु प्रपञ्चागमसारसंग्रहभूतं प्रपञ्चसाराख्यं तन्त्रं प्रारभमाणो भगवान् भगवत्पादाचार्य्यः प्रारिप्सितपरिसमाप्तिप्रत्यूहविघ्नविध्वंसनादिलाभाय + + + + + प्रन्थारम्भौपयिकं विषयादिचतुष्टयं चार्थात् सूचयति । अकचटतपयाद्यैरित्यनेन श्लोकेन। शरारिष शरीराणि शौर्य्यमाणतया तानि पुरुषाणां भोगापवर्गाय येश्वररूपेण ददाति प्रयच्छतीति ॥ इत्यादि ।

End. रवीन्दुवह्नीनां उपलक्षणमेतत् ब्रह्मादीनां चगादीनाञ्च ते जगन्ति भुवनानि पुष्णन्ति रक्षन्ति तस्मै परिपूर्णतेजसे ज्ञानशक्तिबलवीर्य्यतेजोभिरत्यूर्जित-महिम्ने नमोऽस्तु इत्यर्थः । + + + + + + भक्ते + + + + + सततमेतद्दिगंमरः ।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमदुत्तमप्रकाशपूज्यपादशिष्येण उत्तमबोधकृतायां श्रीमत्प्रपञ्चसारसम्बन्धदीपिकायां त्रिंशत्पटलः । समाप्तोऽयं ग्रन्थः ॥

विषयः । शङ्कराचार्य्यकृतप्रपञ्चसारस्य व्याख्यानम् ।

No. 165. प्रयोगपल्लवः । By भवनाथ । Substance, palm-leaf, 16 × 1½ inches. Folia, 16. Lines, 5 on a page. Extent, 600 slokas. Character, Uria. Date, Sam. 1713. Place of deposit, Puri, Mahimprakasmath, Paṇḍit Valadeva Bramhacāri. Appearance, old. Prose and Verse. Generally correct.

Beginning. भवान्यै नमः ।

नत्वा शङ्करचरणौ भवनाथः पल्लवं तनुते ।
मुकयितुं बालमकृपान् बालानखिलान् वावदूकयितुं ॥
चमत्कितस्तुवानेवचक्षिप्ताः किंवदुरुषा भवत ।
वाञ्छा प्रयोगमाला पल्लवयतु पल्लवं यौव्य ॥
मूलभूताः प्रयोगाणां सर्व्वेषामेव धातवः ।
धातवश्च प्रथमं कल्पान्ते तण्डुला इव ॥
धात्वादिश्चा × × × × मवधात्वन्तर्गताश्चया ।
इकारा सूच्यते × × × × × × ॥ इत्यादि ।

End. पयाख्यां पचीरन् पचीष्टाः पचीयान्तां
पचीध्वं पचीय पचीवहि पचीमहि ॥

Colophon. इति श्रीमहामहोपाध्यायपल्लवकारपदाङ्कितश्रीभवनाथविरचितः प्रयोग-पल्लवः समाप्तः ॥
प्रयोगाः खिद्यन्ते कति कति न येषामधिगताः
निबद्धारोऽप्यन्धा इव दधति हस्ताग्रमणिकां ।
भवानीनाथार्थं करवदरकल्पानकरवं
तदस्मिन मात्सर्य्यं विजहित विचारप्रणयिनः ॥
ज्वलनचन्द्रतुरङ्गमभूमिभिर्विमानिते नृपविक्रमहायने ।
गुरुदिने रविपौषसिते ऽलिखत् स्वयमहोभवदेवमहामतिः ॥

विषयः। कतिचिद्धातूनां साधारण-प्रणालीकथनं ॥

No. 166. प्रश्नचूड़ामणिः। By चन्द्रशेखर। Substance, country-made paper, 13×3 inches. Folia, 17. Lines, 6 on a page. Character, Bengali. Date ? Place of deposit, Zilla Medinipur, post Garvetā, gram Khunverā, Babu Vaikunṭhanāth Chakravarti. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमः शिवाय ।
धर्म्मचिन्ता हि कर्त्तव्या प्राणैः कण्ठगतैरपि ।
यदा यदा प्रचलति तदायुः चीयते नृणां ॥
सर्व्वज्ञः सर्व्वभूतात्मा सर्व्वदाता जगत्पतिः ।
सुरासुरपरित्राणो यो रविः स प्रणम्यतां ॥
पञ्चवर्णात्मकैर्वर्गैः पञ्चभिश्चन्द्रशेखरः ।
अप्रमत्तेभ्यो धातुभ्यः प्रामाणोकशुभाशुभम् ॥
शुभं लाभो जये जीवो ज्ञानं मौनं तथान्यथा ।
अस्ति नास्ति चियोनिस्थ चिन्तां चित्तादिकं चिकं ॥
वर्णाकारवयोजातिदिक्संख्या अचरागमाः ।
वर्षर्त्तुमासपचाहःमर्व्वं वर्गसुखोद्भवं ॥ ?

स्वाङ्गच सङ्गतं यच प्रसङ्गेन तदात्मकं ।
भाविनः + + + + + सारं चूड़ामणेः कृतं ॥
प्रथमवर्गविन्यासो यथा + + + + + + ।
एकद्वित्रिचतुर्वर्गः क्रमाद्वर्गचतुष्टयं ॥ इत्यादि

End. याचाभुवः। भागचयं एकेन शुभा याचा द्वाभ्यां मृत्युः शून्येनाशुभा याचा। गुर्व्विणीभुवः। एकेन पुचः द्वाभ्यां स्त्री शून्ये बन्ध्या। जयविजयभुवः। एकेन जयः द्वाभ्यां सन्धिः शून्येन भङ्गः।

Colophon. इति प्रश्नचूड़ामणिः।

विषयः। शुभाशुभलाभालाभजयपराजयजीवज्ञानमौनप्रभृतिनिरूपकवर्गनिरूपणं। प्रश्नप्ररणक्रमनिरूपणं। संयुक्तासंयुक्तप्रश्ननिरूपणं पचिगणनिरूपणं। सिंहावलोकितादि-चक्रनिरूपणं। याचाभुवगुर्व्विणीभुवविजयभुवादिनिरूपणञ्च।

No. 167. प्रश्नदीपिका। By दामोदरदैवज्ञ। Substance, country-made paper, 9×4 inches. Folia, 10. Lines, 10 on a page. Extent, 200 ślokas. Character, Uriyā. Date ? Place of deposit, Puri, Saṅkaramaṭha Madhusūdana Tīrthasvāmi. Appearauce, fresh. Generally correct.

Beginning. श्रीगणेशाय नमः।

मणिकर्णीकृतावासं नत्वा सिद्धविनायकं।
चम्मेश्वरकृतावासदामोदरविनिर्म्मिता ॥
वाराहसुतदैवज्ञप्रश्नस्येयं प्रकाशिका।
सिद्धान्तज्ञैः सुगणकैः द्रष्टव्यापि च तुष्टये ॥
अथेह वराहमिहिराचार्य्यात्मजः प्रश्नविवक्षुरादौ निर्विघ्नतापरिसमाप्त्यर्थ मङ्गलं कृत्वा सम्बन्धाद्यनुबन्धये चतुष्टयमाह प्रणिपत्येत्यादि।

End. श्रीजानकीरघुनाथाङ्घ्रिजातो दामोदरःकृती।
तेनेयं रचिता टीका सुप्रश्नस्य प्रदीपिका ॥

Colophon. इति श्रीदामोदरदैवज्ञविरचितायाः षटपञ्चाशिकायां प्रश्नदीपिकायां सप्तमोऽध्यायः।

विषयः। होराषट्पञ्चाशिकाया विवृतिः।

No. 168. प्रश्नसारः । Substance, country-made paper, 13×3 inches. Folia, 4. Lines, 8 on a page. Extent, 100 ślokas. Character, Bengali. Date, Śaka 1766. Place of deposit, Zilla Medinipur, post Garvetā, grām Khuānvera, Babu Vaikunṭhanáth Chakravartí. Appearance, fresh. Generally verse. Generally correct.

Beginning. ॐ नमः श्रीसूर्याय ।
नराणां प्रश्नवाक्येन मनोगतशुभाशुभं ।
तां वर्णरूपिणीं वन्दे भारतीं परमेश्वरीं ॥
विना लग्नं विना भावं विना ग्रहविचारणं ।
अदृश्यदर्शनादर्शः प्रश्नसारो निरूप्यते ॥
अ इ ए ओ भवेज्जीवं आ ई ऐ औ च मूलकं ।
उ ऊ अं अः भवेद्धातुः स्वस्वयोनिं वदा + + + इत्यादि ॥

End. पञ्चशेषेण वर्गाणामन्ताक्षरविनिर्णयः ।
यदि संवीक्षते प्रष्टा यत्र संस्थोपि पृच्छति ।
चौरस्य वस्तुनो वापि तां दिशं तद्वनं वदेत् ॥
नष्टेऽथ प्रश्नाक्षरवर्णसंख्यां पिण्डे विधायानलदग्धभावात् ।
विक्रीतसंस्थापितदूरितञ्च ज्ञेयं ततः पञ्चहृताच्च पिण्डात् ॥
नष्टं गृहे भूतलतोऽथ देवालये विदेशे च सुहृत् परेण ॥

Colophon. इति निकषानाम्नीराक्षसीकृते प्रश्नसारे केरली समाप्ता ॥ लिपिरियं श्रीरामतारणशर्म्मणः । शकाब्दाः १७६६ । ५ । २ सां भाटपाड़ा ।

विषयः । अक्षरपिण्डनिरूपणं तस्य च पञ्चविधभेदकथनं कर्म्मजन्ययोनिभेदकथनं तस्य चाष्टविधभेदकथनं तिथिविशेषे प्रश्नानामक्षरभेदकथनं लुककलक्षणकथनं मात्राफलनिरूपणं चौरस्य नामाद्यक्षरज्ञानकथनञ्च ।

No. 169. प्रश्नोपनिषद्भाष्यटीका । By नारायणेन्द्रसरस्वती । Substance, country-made paper, 14×4½ inches. Folia, 33. Lines, 10 on a page. Extent, 825 ślokas. Character, Bengali. Date ? Place of deposit, Rājguru's Maṭh, Guneśumahalla, Benares City. Appearance new. Prose. Correct.

Beginning. ॐनमो गणेशाय .

अथर्वेवे ब्रह्मा देवानामित्यादिमन्त्रैरेवात्मतत्वस्य निर्णीतत्वात्, तत्रैव ब्राह्मणेन तदभिधानं पुनरुक्तमित्याशङ्क्य तस्यैवेह विस्तरेण प्राणोपासनादिसाधनसाहित्येनाभिधानान्न पौनरुक्तमिति वदन् ब्राह्मणमवतारयति . मन्त्रेति ।

End. तस्मादिति पिप्पलादेव किं पूज्यतरत्वं परिचार्यत्वं स्वामित्वं किमु वक्तव्यमित्यर्थः . अतएव वाजसनेयके मात्रापि सह दास्या + + +मिति भावः ।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत् कैवल्येन्द्रमिश्रज्ञानेन्द्रगुरुचरणसेविनारायणेन्द्रसरस्वतीविरचितं प्रश्नोपनिषत्भाष्यविवरणं समाप्तम् .

विषयः । प्रश्नोपनिषद्भाष्यव्याख्या .

No. 170. प्रायश्चित्तकुतूहलम् । Substance, country-made paper, 15×4 inches. Folia, 42. Lines, 9 on a page. Extent, 1000 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, new. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः ।

श्रुतः श्रुतिं यच्छति यो जनानां मतं मतानामपि योजनानां ।
आराध्य भक्त्या तमनन्तदेवमथ ब्रुवे दुःशमनन्तदेव ॥ १ ॥
अत्रानि श्रौतविध्यपराधे प्रायश्चित्तानि स्मार्त्ते ऽधुना वक्ष्यामः ।
स्मार्तत्वञ्च स्मृत्याद्यनुमितश्रुतिगम्य सकलाङ्गकलापशालित्वं ।

End. वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।
तावन्ति हरिनामानि कीर्त्तितानि न संशय इति ।
अवादीत्यमनन्तेन प्रायश्चित्तकुतूहलम् ।
प्रीयातु भगवांस्तेन श्रुतिगम्यो गुणाश्रयः ॥

Colophon. श्रीमदनन्तदेवोदयस्य रघुनाथविदुषः कृतौ प्रायश्चित्तकुतूहले द्वितीयः परिच्छेदः ॥

विषयः । स्मार्त्तप्रायश्चित्तविधानम् .

No. 171. प्रायश्चित्तप्रदीपः। Substance, country-made paper, 12 × 4 inches. Folia, 107. Lines, 18 on a page. Extent, 1926 ślokas. Character, Nāgara. Date, Saṃvat 1713. Place of deposit, Benares City, Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. नत्वा बौधायनाचार्य्यं तेनोक्तं श्रौतकर्म्मणां।
विध्यतिक्रमणे प्रायश्चित्तदीपःप्रकाश्यते॥
श्रौते बौधायनोक्तानि प्रायश्चित्तानि यानि तु। उक्तानि इत्यादि।

End. समस्ताभिः श्रोम् स्वाहेत्यादि एतैः सर्व्वैः प्रायश्चित्तानि कुर्य्यात्।

Colophon. इति प्रायश्चित्तप्रदीपे सोमप्रायश्चित्तं नाम पञ्चमं प्रकरणम्।

विषयः। बौधायनीयप्रायश्चित्तसंग्रहः।

No. 172. प्रायश्चित्तविलोचनं। By वासुदेवत्रिपाठी। Substance, palm-leaf, 18 × 2 inches. Folia, 97. Lines, 5 on a page. Extent, 2800 ślokas. Character, Uria. Date ? Place of deposit, Dakṣiṇa Baidyanāthpur Śāsan, Nīlgiri State, *viâ* Balasore, Paṇḍit Bināyak Miśra. Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीनारायणाय नमः।
प्रायश्चित्तविशुद्धिसाधनधियो ध्यायन्ति धीरा ध्रुवं
यं निर्व्याजमजं जरादिरहितं वीजं जगत् कारणं।
श्रीरामं स्मर कोटिसुन्दरतरं कामं नमस्कृत्य तं
प्रायश्चित्तविलोचनं वितनुते श्रीवासुदेवः सुधीः॥
विद्यन्ते विदुषां निबन्धनिवहा यद्यत्र नानाविधाः
प्रायश्चित्तविलोचने बहुमतास्ते ते प्रपञ्चोत्तराः।
तानेव प्रविलोक्य सारमखिलं संगृह्य संक्षेपतः
किञ्चित् कौशलपेशलस्तदपि मे सोऽयं प्रबन्धोद्यमः॥
अथ प्रायश्चित्तलक्षणं।
प्रयत्नाद्दोपचितमशुभं नाशयतीति प्रायश्चित्तमिति। इत्यादि।

End. विष्णुश्च तान्त्रिकः कांषिक एव इति न हि काकिनीचतुष्टयात्मकरूपणेन तदर्द्धेन वा भोजनं निर्वपति । शिवं ॥
विदुषा वासुदेवेन प्रायश्चित्तविलोचने ।
सद्द्रव्यशुद्धिविविधप्रायश्चित्तमितीरितं ॥
नानानिबन्धानालोच्य वासुदेवत्रिपाठिना ।
कृतं मुदेऽस्तु विदुषां प्रायश्चित्तविलोचनं ॥
अमत्सराः सारविचारशूरा धीरा मयैतं रचितं निबन्धं ।
पविचयन्तः करुणाद्रदृष्ट्या गृह्णन्तु सन्तः प्रणतोऽर्थये तान् ॥
यो नाम नास्तिकतयात्र मम प्रबन्धे सम्बोधयन्निजमहत्वविबुद्धिसिद्धौ ।
सन्नामधेयमधिरोपयितायमास्तां कर्त्ता समस्तदृजिनव्रजसाधनानां ॥

Colophon. इति श्रीवासुदेवत्रिपाठिविरचितं प्रायश्चित्तविलोचनं सम्पूर्णं ॥
श्रीदिव्यसिंहनृपतेरङ्केऽब्धिदृग्गमस्मिते ।
विनायकाख्यो मिश्रोऽपि व्यलिखत् पुस्तकं शुभं ॥

विषयः । विविधप्रायश्चित्तविवेचनं ॥

No. 173. प्रायश्चित्तशतद्वयी । By आपस्तम्बीया । Substance, country-made paper, 10 × 4 inches. Folia, 13. Lines, 14 on a page. Extent, 350 slokas. Character, Nāgara. Date, Saṃvat 1749. Place of deposit, Benares City, Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. यस्य स्मृतो लक्षणमात्रमेव चित्तस्य दिष्टं श्रुतिलक्षणं तत् ।
ततो निमित्तेन विवर्चितं स्यात् विशेषणं सामचविर्गतिक्यं ॥ १ ॥ ?

End. इति जन्मगुरो निरीक्ष्य कविरामार्य्यात्मजो भास्करो ।
धूर्त्तस्वामिमतं विलोक्य सचितं कल्पान्तराणामपि ॥
श्लोकानां द्विशतं व्यधत्त जनकात् संप्राप्तविद्यः शुभं ।
प्रायश्चित्तसमुच्चयं बुधजनैः संपूज्यमानः सुधीः ॥
लिखितं दोषचिन्तामणिभट्टात्मजेन मार्कण्डेयेनेदं पुस्तकं संवत्—१७४९ ।

विषयः । आपस्तम्बीयप्रायश्चित्तप्रश्नविवरणं ॥

No. 174. प्रायश्चित्तप्रदीपिका । Substance, country-made paper, 10 × 4 inches. Folia, 73. Lines, 14 on a page. Extent, 1628 ślokas. Character, Nāgara. Date, Saṃvat 1768. Place of deposit, Benares City, Vamanācāryya. Appearance, old. Prose. Correct.

Beginning. व्याख्यातो भास्कराचार्य्येण प्रायश्चित्तप्रपाटकः ।
शतद्वयेन श्लोकानां धूर्त्तस्वाम्यनुसारतः ।१।
तान् कृत्वा मनसि श्लोकान् तदर्थमनुसंदधत् ।
करोमि सुखबोधार्थं प्रायश्चित्तप्रदीपिकां ।

End. भूर्भुवः स्वः स्वाहेति स्मार्त्तकर्म × × चेदं प्रायश्चित्तं बह्वृचब्राह्मणे जैमिनी-ब्राह्मणेनोक्तं ।

Colophon. इति पञ्चमः पटलः समाप्तः ।

विषयः । आपस्तम्बीयप्रायश्चित्तशतद्वयीव्याख्या ।

No. 175. प्रायश्चित्तशतद्वयी । Substance, country-made paper, 10 × 5 inches. Folia, 6. Lines, 14 on a page. Extent, 168 ślokas. Character, Nāgari. Date ? Place of deposit, Benares, Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. नैमित्तिकेषु श्रुतिलक्षणेषु सूत्रे यदस्पष्टमिवाल्पबुद्धेः ।
तद्भाष्यदृत्याद्यनुसृत्य सम्यक् सुखावबोधाय विविच्यते तत् ॥

End. स्यात् समग्रहोतेव तदाप्ययं स्यात् ।
यदा प्रवृत्तो न समाप्यते यः ॥

Colophon. इति तुरीयप्रकरणम् ।

विषयः । आपस्तम्बसूत्रीयप्रायश्चित्तविवरणम् ।

No. 176. प्रायश्चित्तशतद्वयीव्याख्या । By वेङ्कटेशवाजपेयी । Substance, country-made paper, 12 × 5 inches. Folia, 64. Lines, 11 on a page. Extent, 1736 ślokas. Character, Nāgarī. Date ? Place of deposit, Benares, Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. आपस्तम्बमुनिं नत्वा प्रायश्चित्तशतद्वयीं ।
मन्दानां सुखबोधाय व्याकरिष्ये यथामति ।
तत्र तावत् प्रायश्चित्तस्य ग्रन्थस्य विषयप्रयोजनादिकं दर्शयति नैमि त्तिकेषु इत्यादि ।

End. ततोभयरहिते देशे काले वा हतान्तादारभ्य क्रतुशेषः समापनीयः ।

Colophon. इति वत्समकुलभूषणश्रीवेङ्कटेशवाजपेययाजिनः कृतौ प्रायश्चित्तशतद्वयी-व्याख्याने तुरीयं प्रकरणं समाप्तं ।

विषयः । वेङ्कटेशप्रायश्चित्तशतद्वयीव्याख्या ।

No. 177. प्रैष्याध्यायः । Substance, country-made paper, 10 × 4 inches. Folia, 17. Lines, 22 on a page. Extent, 272 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Prose and verse. Incorrect.

Beginning. श्रीगणेशाय नमः . ॐम् ।
होतायक्षदग्निं समिधासु समिद्वासमिद्धं नाभाश्पृथिव्याः संगथे वामस्य ।
वर्ष्मन्दिव इडस्य देवेत्ताध्यस्य होतर्यज । १ ।
होतायक्षतनूनपातमदितेर्गर्भं भुवनस्य गोपां × × × × ×

End. विश्वान्देवान् हवामहेऽस्मिन् यज्ञे सुपेशसः ।
तरमं यज्ञभागमं देवासो देव्या धिया,
जुषाणा अध्वरे सदो ये यज्ञस्य तनूकृतः ।
विश्व त्वा सोमपीतये वाचमहं देवीं
वाचास्मिन् यज्ञेषु पेशसा, सरस्वतीं हवामहे ।

Colophon. इति पुरोरुक् ।

विषयः । अस्मिन् चत्वारोऽध्यायाः तत्र प्रथमे प्रैष्याध्यायः । द्वितीयो निवीताध्यायः । तृतीयः कुन्तापाध्यायः चतुर्थः पुरोरुगध्यायः । ऋग्वेदान्तर्गतोयमध्यायः किन्त्वधुना संहिता-पाठेऽस्य पाठो न दृश्यते ।

No. 178. **फक्किकासमुच्चयः।** Substance, country-made paper, 8 × 2½ inches. Folia, 56. Lines, 5 on a page. Extent, 1120 ślokas. Character, Bengali. Date, Śaka 1641. Place of deposit, Zilla Mayamansing, Pargana Aṭiyá, post Jámurki, gram Háláliá, Paṇḍit Abhayacandra Bhaṭṭācāryya. Appearance, very old. Prose. Generally correct.

Beginning. ॐ नमो गुरवे ।
विश्वेश्वरं गुरुतरं प्रणिपत्य भूमौ ।
कायं निपात्य प्रणिपत्य च वासुदेवं ।
स्वीयं मतं क्वचिदपि प्रतिगृह्य यत्ना-
ल्लेखे स्वशिष्यपरितोषविभावनाय ॥
सच्छिष्यप्रेरिते × × नीयते फक्किका × × × × सदाचार परिप्राप्तं समाप्तिफलकं मङ्गलं मन्यमानो ग्रन्थकृत् प्रारब्धपरिसमाप्तिकाम इष्टदेवता नमस्काररूपं मङ्गलं विधाय
× × × आह । अथ शब्दानुशासनमिति ॥ इत्यादि ॥

End. यद्यपि वाह्यप्रयत्नपार्थक्येऽपि अभ्यन्तरप्रयत्नतुल्यमस्त्येव
यद्येवं षकारटकारलोपोविधेय इति चेत् नैवं हनोयमां
यमिलोप इत्यतो ऽण् ग्रहणमित्यनुवर्त्तते ।
× × × × × लोपाभ्युपगमात् ॥ रेखापादः ॥
फक्किकेयं समाप्ता । शकाब्दाः १६४१ ।
च्मार्णवेनमितातीतशकाभिन + वत्सरे ।
यत्नादेतां फक्किकान्तु रघुनाथोऽलिखत् स्वयं ॥
आगते दिवसध्येया वोधिस्थे शुचिपञ्चके । ?

Colophon. श्री × × × × × × × × × स्वार्थान्तु फक्किकां ॥
हरते य इमं ग्रन्थं फक्किका सञ्चितो हि सः ।
गर्द्दभो गर्द्दभी तस्य माता तातस्य गर्द्दभः ॥

विषयः। अस्यस्याभ्यन्तर एकत्र इति फक्किकासमुच्चये द्वितीयोध्यायः ॥ इति ।

No. 179. बालबोधरत्नकौमुदी। Substance, palm-leaf, 14 × 1½ inches. Folia, 83. Lines, 3 on a page. Extent, 1000 ślokas. Character, Uria. Date ? Place of deposit, District Purī, Parganā Rāhān, grām Jagannātha, Vidyādharpur, Paṇḍit Rāmacandra Miśra. Appearance, old. Prose and verse. Correct.

Beginning. यमुनायास्तटे रम्ये गोपीगोपसमावृते ।
सुवर्णवेणुना भान्तं वन्दे गोपीनसुन्दरं ॥
बोधः—विहङ्गा विहगाः खेटाश्च भोगाः खेचराः खगाः ।
व्योमाभिवामिनश्चापि पक्षाश्च परिकीर्त्तिताः ॥
आदित्यः सविता सूर्य्यो भास्करोऽर्क्को दिवाकरः ।
उष्णांशुस्तपनो भानुः सहस्रांशुः प्रभाकरः ॥ इत्यादि ।

End. जलचरधनभोक्ता वासवस्यानुरक्तः
समतचिरशरीरस्तुङ्गनामो हृतत्कः ।
अभिभवति सपत्नानाशुजिष्वावदहिं
बहु निधिधनभागी पश्चिमस्थान्तरासौ ॥

Colophon. इति श्रीबालबोधरत्नकौमुद्यां सप्तदशोऽध्यायः ।

विषयः। प्रश्नाभिधानं। नक्षत्राभिधानं। चन्द्रदृष्टिभङ्गविधानं। राहुदृष्टिभङ्गकथनं। लग्नफलकथनं। तिथिफलकथनं। वारफलकथनं। लग्नदृष्टिफलकथनं। अष्टमपञ्चफलकथनं। नवमस्थपञ्चफलकथनं। केन्द्रफलकथनं। पञ्चयोगफलकथनं। राशिफलकथनं। इत्यादि।

No. 180. बौधायनकल्पं By श्रीशिङ्कराचार्य्य। Substance, country-made paper, 12 × 5 inches. Folia, 141. Lines, 9 on a page. Extent, 2820 ślokas. Character, Nāgara. Date ? Place of deposit, Benares Paṇḍit Gobinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ।
बौधायनयोकल्पनताया यन्निरूपितं ।
दोषयन् प्रियमादते मीमांसासमुद्दयं । १ ।

यः सायनाचार्य्यपदाभिषिक्तः श्रीशिङ्गनाचार्य्यसद्ग्रगण्यः ।
प्रसन्नगम्भीरमतिः स्फुटार्थं बौधायनं कल्पमथो विधास्ये । २ ।

End. स्वाहा प्रजापतये इन्द्रश्रौवात् सुवेणोपोह्य ब्रह्मप्रतिष्ठामनस इत्यनेनानुवाकेन प्रतिमन्त्रं जुहोति ।

Colophon. इति सप्तद्ग्रः ॥

विषयः । श्रौतकर्मणां विधानं ।

No. 181. बौधायनसूत्रवृत्तिः (दर्शपूर्णमासप्रकरणम्) । Substance, country-made paper, 12×5 inches. Folia, 238. Lines, 9 on a page. Extent, 4760 ślokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. नमस्कृत्य गुरून् सम्यक् भाष्यार्थमवधारयन् ।
बौधायनीयसूत्रस्य कुर्वे वृत्तिं सुबोधिनीं ।
आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवति स पुरस्तादेव इत्यादि ।

End. बौधायनकृतस्यासौ वृत्तिःसूत्रस्य तायते ।
दर्शस्य पौर्णमासस्य सम्पूर्णः प्रीयतां शिवः ।
क्वेदं बौधायनं सूत्रं क्व मेऽल्पविषया मतिः ।
गुरोः कटाक्षमनुते वृत्तिमेवं सुबोधिनीं ।

Colophon. शुभमस्तु ।

विषयः । बौधायनीयदर्शपौर्णमासव्याख्या .

No. 182. ब्रह्मसूत्रवृत्तिः । अनुभाष्यानुसारि (प्रथमाध्यायावधिः) । Substance, country-made paper, 16×6 inches. Folia, 43. Lines, 10 on a page. Extent, 860 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, late Hariścandra Babu. Appearance, old. Prose. Correct.

Beginning. श्रीकृष्णाय नमः ।
नत्वा श्रीवल्लभाचार्य्यपादपद्मयुगं मदा ।
तदीयभाष्यमार्गेण व्यासस्त्रार्थ ईर्य्यते ।

End. वैदिकानां वेदानुसारेण वस्तुविचारः कर्त्तव्यः। तद्विरुद्धवादानां अप्रामाण्यादब्रह्मवेदे न कापि शङ्का इति सर्व्वं सुस्थं। अतएवाग्रिमाध्याये विस्तरेण मतान्तराणि निराकरिष्यन्ते। अध्यायसमाप्तिसूचिका सूत्रैकदेशावृत्तिः।

Colophon. इति श्रीमद्ब्रह्मसूत्राणां अनुभाष्यानुसारिवृत्तौ प्रथमाध्यायस्य चतुर्थःपादः प्रथमाध्यायः समाप्तः ।

विषयः। ब्रह्मसूत्रव्याख्या .

No. 183. ब्रह्माण्डनिर्णयः (ब्रह्मयामलोक्तः) । Substance, country-made paper, 8 × 3 inches. Folia, 5. Lines, 7 on a page. Extent, 100 slokas. Character, Bengali. Date ? Place of deposit, Sāṅkrail *via* Tangail, Babu Bijaya Siṁha Dās Gupta. Appearance, old. Verse. Generally correct.

Beginning. श्रीगुरवे नमः ।
अथ ब्रह्माण्डनिर्णयः ।

ईश्वर उवाच । यस्मिन् काले महादेवि किञ्चिन्नास्ति जगत्त्रये ।
न नक्तं न दिवा सन्ध्या न मेरुर्नच मन्दरः ।
न जलञ्च न चाकाशं न मनोबुद्धिगोचरं ।
तस्मिन् काले जगत्स्वामी प्रकृतित्वमुपागतः ।
इत्येवं चिन्तनादेवि सम्भूता त्रिगुणात्मिका ॥
महामाया महालोला नित्यं मे मोहकारिणी ।
मायोपहतचैतन्यं सकलं समुद्यतं ॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
एतानि पञ्चभूतानि वामायोपायहेतवे ॥
ब्रह्मा विष्णुश्च रुद्रश्च चन्द्रादित्यनवग्रहाः ।
अमी चान्ये च ये देवास्तथा स्थावरजङ्गमाः ॥
अण्डजाः स्वेदजाश्चैव तथोद्भिज्जजरायुजाः ।
एवं क्रमेण सृष्टिः स्यात् संहारस्तु विपर्य्ययः ॥ इत्यादि ॥

End. इत्येतत् कथितं देवि यत्त्वं मां परिपृच्छसि ॥
सुकुलीनाय शान्ताय ऋजवे दम्भवर्ज्जिते ।
प्रकाश्यं वा कदाचिच्च न देयं यस्य कस्यचित् ॥
प्रकाशिते ऽप्रकाशः स्यादप्रकाशे प्रकाशितः ।
एवं ज्ञात्वा सदा योगी गोपयेन्मातृजारवत् ॥

Colophon. इति ब्रह्मजामलोक्तः ।

विषयः । संक्षेपतः सृष्टिप्रकरणप्रकाशनं ॥

No. 184. ब्रह्मामृतवर्षिणी (ब्रह्मसूत्रवृत्तिः तृतीयाध्यायमात्रं) By धर्म्मभट्ट । Substance, country-made paper, $10 \times 4\frac{1}{2}$ inches. Folia, 41. Lines, 16 on a page. Extent, 2000 slokas. Character, Bengali. Date ? Place of deposit, Puri, Sankara Matha. Appearance, old. Prose. Generally correct.

Beginning. ॐ श्रीपरमात्मने नमः ।

पूर्व्वस्मिन् पादे जीवोपकरणभूतभौतिकानि ब्रह्म × × × इत्युक्तं तदुपजीव्य तदुपहितजीवस्य संसारप्रकारवैराग्यार्थं निरूपयितुं देहान्तरारम्भभूतसूक्ष्मपरिमुक्तस्यैव लोकान्तरगमनमित्याह × × तदन्तरप्रतिपत्तौ × × × × × प्रश्ननिरूपणाभ्यां पूर्व्वस्मिन्नध्याये ब्रह्मा × × × × × स्मृतिन्यायविरोधनिरासेन अनध्यवसायलक्षणप्रामाण्यनिरासेन तार्तीयोवितारो भवतीति अनयोरध्याययोः हेतुहेतुमद्भावसंगतिः । इत्यादि ।

End. नहि साक्षात्काररूपविद्यायां उपचयापचयत्वमस्ति नहि पूर्व्वोक्तभावि घटसाक्षात्कारयोश्चिरत्वाचिरत्वमतिशय इति कश्चिदभ्युपैति तस्मान्निर्विशेषब्रह्मसाक्षात्कारस्य एकरूपत्वात् तज्जन्यो मोक्षो निरतिशयानन्दात्मकएकरूप एवेति सिद्धं अभ्यासोऽध्यायसमाप्तिद्योतनार्थः । १७ ।

Colophon. इति श्रीधर्म्मभट्टकृतौ ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां तृतीयाध्यायस्य चतुर्थपादः समाप्तः ॥

विषयः । ब्रह्मसूत्रस्यव्याख्यानं ।

No. 185. ब्रह्मोपनिषद्व्याख्या कृष्णतत्त्वप्रकाशिका By केशवकाश्मीरी। Substance, country-made paper, 9 × 3 inches. Folia, 29. Lines, 12 on a page. Extent, 870 ślokas. Character, Nāgara. Date ? Place of deposit, Puri, Rājgopāl Maṭha Mohānta, Śrī Raghunandan Rāmānujā Das. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीमते रामानुजाय नमः।

सनन्दनपदद्वन्द्वं भक्तिनम्रेकचेतसा।

प्रणम्य क्रियते व्याख्या ब्रह्मोपनिषदो मया॥

तत्र श्रीदशमस्कन्धे निरोधलक्षणं द्वारीकृत्य दशमं लक्ष्यभूतमाश्रयं श्रीकृष्णं श्रीशुकेन तत् तत् ब्रह्मरुद्रेन्द्रादिवाक्यैस्तत्तद्गर्भस्तवादिस्थैरन्यस्कन्धस्थैश्च सर्व्वेषां विदुषां प्रमाणभूतैः शास्त्रविषयत्वेन प्रतिपादितं ज्ञात्वा तस्यैव सर्व्वज्ञ-सर्व्वशक्तेर्ब्रह्मणोभगवतः स्वरूपगुणशक्तिज्ञानान्मोक्षलक्षणफलं निर्णीय अन्ये-षाञ्च स्वबुद्धिपरिकल्पितवेदविरुद्धकल्पनामाकलय्य तदसम्भवञ्च निश्चित्य अन्येषां तच्छ्रवणोत्सुकानां श्रद्धापन्नानां स्वबुद्धिपरामर्शहीनानां श्रीकृष्णे भगवति असम्भावनादिनिवृत्तये राजा परीक्षिन्महाभागवतं श्रीशुकं पृच्छति इत्येतदध्यायस्य वीजं। इत्यादि।

End. अजस्रं ध्यायेदित्यनेन साध्यसाध्यायार्थः संपद्य आत्मजामित्यनेन फलस-ध्यायार्थश्चेति संपूर्णा चतुरध्यायिणी ब्रह्ममीमांसा श्रीशुकेनैकस्मिंश्च श्लोके व्याख्याता इति भावः। ५०।

Colophon. इति श्रीकाश्मीरिकेशवविरचिता कृष्णतत्त्वप्रकाशिका ब्रह्मोपनिषट्टीका समाप्ता॥ श्रीमते रामानुजाय नमः।

विषयः। ब्रह्मोपनिषद्व्याख्यानं॥

No. 186. भक्तामरस्तोत्रवृत्तिः। Substance, country-made paper, 13 × 5 inches. Folia, 9. Lines, 18 on a page. Extent, 684 ślokas. Character, Nāgara. Date 1653. Place of deposit, Benares City, Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, new. Prose. Correct.

Beginning. प्रणम्य परमानन्ददायकं परमेश्वरं।

वृत्तिं भक्तामरस्यार्थं कुर्व्वे कान्तिहितैषिणीम्

End. मानतुङ्गमितिविशेषणं तं कथयता स्तोत्रकर्त्तृकविना मानतुङ्ग इति स्वनाम। बन्धननिगड़ाद्युपद्रवनाशो राजप्रसादश्चाशु समुपैति समन्तात् पार्श्वमायाति इति मङ्गलम्.

Colophon. नयनशररसेन्दुमिते वर्षे वैराटनाम्निनगरे बालजनविरोधार्थं विजयदशम्यां हि संसमाप्ता. इति श्रीभक्तामरस्तोत्रवृत्तिः.

विषयः। ऋषभदेवस्वामिस्तोत्रव्याख्या.

No. 187. भक्तिकुलसर्व्वस्वं। Substance, palm-leaf, $20 \times 1\frac{1}{2}$ inches. Folia, 15. Lines, 3 on a page. Extent, 180 ślokas. Character, Bengalī. Date, Śaka 1696. Place of deposit, Zilla Mayamansing, Pargana Aṭiā, Post Jāmurki, gram, Hālāliā, Paṇḍit Abyayacandra Bhaṭṭācāryya. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमः परदेवतायै।

अथ भक्तिकुलसर्व्वस्वनामस्तोत्रं।
कैलासशिखरे देवं महादेवं महेश्वरं।
भवानी रहसि प्रीत्या पप्रच्छ परमेश्वरं॥
श्रीपार्व्वत्युवाच।
कथमीशान सर्व्वज्ञ लभन्ते शक्तिमुत्तमां।
साधकाः सर्व्वदा येन तन्मे कथय सुप्रभो॥
शङ्कर उवाच।
विना पूजां विना ध्यानं विना जापं विना बलिं।
विना न्यासं विना धूपं विना भूतविशोधनं।
विना पुष्पं विना गन्धं विना पर्य्यटनेन वा।
तथार्च्चनं विना होमं विना नित्योदितां क्रियां।
प्राणायामं विना दानं येन तारा प्रसीदति।
लभन्ते येन कल्याणं तन्मे निगदतः शृणु॥
नाम्नां सहस्रं तारायाः कथयिष्याम्यसंशयं॥
— — — — — —

अस्य श्रीभक्तिकुलसर्व्वस्वनामस्तवस्य × × ऋषिरुष्णिक्छन्दः—
— — — विनियोगः । इत्यादि ।

End. यः स्तोत्रं कुलनामकं प्रतिदिनं भक्त्या पठेन्मानवः
स स्यादिन्दुधरैर्धनेश्वरसमो विद्यामदैर्वाक्पतिः ।
सौन्दर्य्येण च मूर्त्तिमान् मनसिजः कीर्त्या च शीतद्युतिः
शक्त्या शङ्कर एव सौर्य्यविभवैर्भूमेः पतिर्नान्यथा ।

Colophon. इति हरगौरीसम्वादे श्रीतारादेव्याभक्तिकुलसर्व्वस्वनामस्तोत्रं समाप्तम् ।
— — — — शकाब्दाः । १६८६ ।

विषयः । श्रीतारादेव्याः सहस्रनामकथनं ।

No. 188. भक्तिरहस्यम् (वल्लभमतानुयायी) । Substance, country-made paper, 12 × 5 inches. Folia, 9. Lines, 12 on a page. Extent, 200 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, late Hariścandra Babu. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
पदनखनिविष्टमूर्त्तिरेकादशरूपतामिवाव + + + ।
यं समुपास्ते गिरीशस्तं वन्दे नन्दमन्दिरे कञ्चित् ।

End. श्रद्धा भागवते शास्त्रे नि + + + चैव हि ।
मनोवाक्काय + + + श्च सत्यं शमदमावपि ।
श्रवणं कीर्त्तनं ध्यानं हरेरद्भुतकर्मणः ।

विषयः । भक्तिविषयकप्रमाणम् .

No. 189. भक्तिवर्द्धिनी By वल्लभाचार्य्य । Substance, country-made paper, 10 × 5 inches. Folia, 10. Lines, 8 on a page. Extent, 150 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, late Babu Hariścandra. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

प्रणववदखिलाधारं ललितविहारं मनोहराकारं ।
तमसः परं त्वदीयं जयति विभो मण्डलं महसां ॥
दूरमितश्रीसहिता पञ्चाशत्कोटियोजनोल्लसिता ।
अणुवद्विलसति यस्मिंस्तस्मै तुभ्यं नमो महते ॥

End. सत्यं ज्ञानमनन्तं श्रुतिगणगीतं यदि त्वमेवासि ।
तर्हि त्वं मम हृदये वस वासय त्वयीश मे हृदयं ।
सुखयतु सदैव भक्तान् भवदीयाभक्तिवर्द्धिनी एषा ।

विषयः । वल्लभाचार्य्यकृतवेदान्तमतमादाय भगवद्भजनम् ।

No. 190. भक्तिहंसः By विट्ठलदीक्षित । Substance, country-made paper, 8×5 inches. Folia, 14. Lines, 8 on a page. Extent, 120 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, late Hariścandra Babu. Appearance, old. Verse. Correct.

Beginning. श्रीकृष्णाय नमः ।

जयन्ति पितृपादाब्जरेणवो यत्प्रसादतः ।
भक्तिःप्राप्ता तदन्यत्र मोहाभावश्च पण्डितैः ।
मन्त्रोपासनवैदिकतान्त्रिकदीक्षार्चनादिविधिभि र्यः ।
अस्पृष्टो रमते निजभक्तेषु स मेऽस्तु सर्व्वस्वं ॥

End. व्रजामि शरणं मुदा शरणमैहिकामुष्मिके ।
निरस्तनिजसंशयो य इह भाग्यवद्भिः स्मृतः ।
व्रजेशसुतपादपङ्कजपरागरागान्वितं ।
करोति सततं हि मानिजतनूजवात्सल्यजं ॥

Colophon. इति श्रीगोपीजनवल्लभचरणैकतानश्रीविट्ठलविरचितो भक्तिहंसः समाप्तः ।

विषयः । वल्लभमतानुसारेण कृष्णस्तुतिः ।

No. 191. भगवद्भावना । वल्लभाचार्य्यसम्प्रदायानुयायिनी (असम्पूर्णा)। Substance, country-made paper, 7 × 4 inches. Folia, 41. Lines, 18 on a page. Extent, 312 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, late Hariścandra Babu. Appearance, old. Verse. Correct.

Beginning. श्रीकृष्णाय नमः.

श्रीमदाचार्य्यचरणं शरणं सर्व्वदेहिनां ।
समस्तदोषदहनं मस्तके राजतां मम ।
प्रातरारभ्य भगवद्भावना विनिरूप्यते ।
सेवनायां यतस्तस्यामानमित्वं प्रसिध्यति ।

End. किं कर्त्तव्यं दुर्ल्ललितो भवानेकसुतो मम ।
अतो निवार्य्यते चैवं क्रीड़ासक्तो गृहे गृहे ।
(इतो नास्ति)

विषयः । श्रीवल्लभाचार्य्यमते भगवद्भावना .

No. 192. भगवद्गीताटीका By गङ्गाधरकविराज। Substance, country-made paper, 10 × 6 inches. Folia, 315. Lines, 12 on a page. Character, Bengali. Date ? Place of deposit, Benares City, Babu Paresānāṭh Rāy Kavirāja. Appearance, new. Prose. Correct.

Beginning. ॐनमो गणेशाय .

प्रणमामि गुरुं ब्रह्म परमात्मपरापरं ।
परमेष्ठिगुरुं देवीमद्य स्वाभीष्टसिद्धये ।
अथ तैत्तिरीयोपनिषदि . असद्वा इदमग्र आसीत् ततो वै सदजायत, तदात्मानं स्वयमकुरुत तस्मात्तत्‌ सुकृतमुच्यते ।

End. यत्रेत्यादि हे राजन् यत्र युद्धे योगेश्वरः कृष्णो वर्त्तते, यत्र युद्धे पार्थोऽर्जुनोधनुर्द्धरो योद्धा वर्त्तते तत्र युद्धे श्रीश्च विजयश्च भूतिरैश्वर्य्यञ्चेत्येतानि ध्रुवाणि निश्चितानि इति मम मति र्मम मतमित्यर्थः अध्यायं समापयति . इतीत्यादि इत्याध्यायस्य व्याख्या समाप्ता .

Colophon. इति गङ्गाधरकविराजेन कृता भगवद्गीताव्याख्या समाप्ता . इति .

विषयः । भगवद्गीताव्याख्या .

No. 193. भगवद्गीताटीका (परमार्थप्रपा) By दैवज्ञसूर्य्यपण्डित । Substance, country-made paper, 8×4 inches. Folia, 156. Lines, 12 on a page. Extent 3180 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, late Babu Hariścandra. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः .

एवं द्वितीयाध्यायमादिकृत्याध्यायाष्टके क्रमेण देहादिव्यतिरिक्तात्मस्वरूप-दर्शनपूर्व्वकं तत्प्राप्त्युपायभूतकर्मनैष्कर्माभ्यां सभक्तियोगांस्तदधिकारिनश्च निरूप्य स्थूलसूक्ष्मप्रपञ्चमिथ्यात्वदर्शनप्रसङ्गेन स्वसत्यत्वञ्च प्रकटयन् मुख्यप्राणापरपर्य्यायमपञ्चीकृतभूतविग्रहं हिरण्यगर्भात्मकं स्वस्वरूपं निरूपितम् ।

End. तात्पर्य्यश्लोकश्च .—

प्राक्संस्कारानुरूपं विधिविधुरधियः श्रद्धया संयजन्ते ।

द्रौ (...) क्रियाद्यैस्त्रिविधगुणवशात् तत् फलं ते लभन्ते ।

तद्वैगुण्यं निहन्तुं प्रभवति (... ...) देषा त्रिवर्णी ।

तेन ब्रह्मार्पणं स्यादिदमिति दशमे सप्तयुक्ते निषक्तम् ।

Colophon. श्रीमद् दैवज्ञपण्डितसूर्य्यविरचितायां भगवद्गीताटीकायां परमार्थप्रपायां श्रद्धाविवेको नाम सप्तदशोध्यायः .

विषयः । भगवद्गीताव्याख्या .

No. 194. भगवद्गीताटीका ; श्रीकृष्णरसिकरञ्जनी By कल्याणभट्ट । Substance, country-made paper, 10×5 inches. Folia, 300. Lines, 9 on a page. Extent, 4800 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Bibihāṭi, Paṇḍit Vāmānācārya. Appearance, old. Prose. Correct.

Beginning. (अस्य त्रयोदशाध्यायमारभ्य अष्टादशाध्यायपर्य्यन्तं नास्ति)

श्रीगणेशाय नमः। श्रीराम(...)जीतं
श्रीमद्गोकुलाधीशं परमानन्दविग्रहं।
कृपाम्बुधिं गुणनिधिं नमामि पुरुषोत्तमम्॥
अपीश्वराणां यं प्राप्तुं भ्रमन्ते यत्नकोटयः।
श्रुतिस्मृतिपुराणाद्यैरलभ्यं चरणाम्बुजं॥

End. स्पष्टं।

Colophon. इति भगवद्गीतोपनिषट्टीकायां निःशङ्कतदीयविविधप्रकर्षप्रकाशनारम्भ-टीकायां श्रीकृष्णारमिकरञ्जन्यां तद्विमुखमुखमार्जन्यां श्रीकृष्णकिङ्कर श्रीवल्लभभट्टविरचितायां असाधारणाभिख्यातद्वादशाध्यायव्याख्या।

विषयः। वल्लभमतानुसारेण भगवद्गीताव्याख्या।

No. 195 भगवल्लीलाचिन्तामणिः By कमललोचन। Substance, palm-leaf, 10 × 2 inches. Folia, 94. Lines, 4 on a page. Extent, 1500 ślokas. Character, Uriā. Date ? Place of deposit, District Puri, Pargana Rāhān, grām Jagannātha Vidyādharpur, Paṇḍit Rāmcandra Miśra. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो भगवते वासुदेवाय।

तत्र भगवान् वेदव्यासः श्रीभागवताख्यं प्रारिप्सुस्तत्र तावत् प्रथमस्कन्धे जन्माद्यस्येत्यादि-पद्यमयीं नान्दीं निबध्नयन् तत्रोद्देश्यतया प्रथमस्कन्धादारभ्य द्वादशस्कन्धावधि सकलपदाम् श्रीभगवतः प्रसङ्गलीलात्मकानचिन्त्यमणीर्-वाकलयामास तद्यथा प्रक्रियाप्रसङ्गो लीला चेत् तत्र भक्तादिपरोक्षस्वरूप-मविभाववर्णनं प्रसङ्गः अवताराणां साक्षाद्रूपस्य च मविभवर्णनं लीला तत्र तावदादौ सूतशौनकादिसंवादकथनप्रश्नप्रसङ्गवादजन्मादीति। इत्यादि।

End वाणिरत्नकुरकं
वाधितमायाविलासं सत्यं तं परं धीमहि।
वाणीवल्लीविश्वनाथः प्रवरतरभरद्वाजवंशावतंसः
शाण्डिल्या कृष्णभक्तोऽभवदथ तनुजोयस्ततोरामचन्द्रः।
तत् पुत्रश्चित्रवाक्यागमरचनपटुः श्रीलगोविन्दनामा।

तस्यासीन्नन्दनो यः सकलगुणकलावन्दितः कृष्णचन्द्रः ।
तस्यात्मजः कमललोचननामधेयः श्रीनीलशैलनिलयः कलयन्नकस्मात् ।
कौतूहलं हृदि हरीरितईशलीलाचिन्तामणिं विवृतिमारचयाञ्चकार ॥

— — — — —

Colophon. इति श्रीभगवल्लीलाचिन्तामणौ श्रीभागवतनालीपद्व्याख्याने द्वादशस्कन्धार्थ-दिग्दर्शनं ॥ समाप्तोऽयं ग्रन्थः ।

विषयः । भागवतव्याख्येयं ।

No. 196. भक्तमहोदयनाटिका By नरसिंहमिश्र। Substance, palm-leaf, 16×1 inches. Folia, 42. Lines, 6 on a page. Extent, 1300 ślokas. Character, Uriā. Date ? Place of deposit, Dāmodarpur Śāsana, Zilla Puri, Late Paṇḍit Gopīnāth Miśra. Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीगणेशाय नमः । अविघ्नमस्तु ।

जिज्ञास्य यदनेकसाधनपरैः सद्भाग्यपुण्योदये
जन्माद्यस्य यतोयदेवसकलं यच्छास्त्रयोनिः स्वयं ।
एकं तत्वसमन्वयात्स्मृतिविदो नित्यं रटन्ति स्फुटं
तत् चित्सत्यसुखात्मकं श्रुतिशिरोवेद्यं निरीहं भजे ॥

अपि च । या विद्या सदसद्विलक्षणपरा सर्व्वेष्टसिद्धिप्रदा
नित्यं विश्वविवर्त्तनैकनिरता तस्मिंश्च तद्वीरजा ।
याधिष्ठानवती गुणत्रयमयी सन्नामरूपात्मिका
सा पायाद्भवमोचनी भगवती भद्रा भवानी कदा ॥

\+ + + + +

नान्द्यन्तेसूत्रधारः । पुरोवलोक्य । ससन्तोषं । अहो अतिरमणीयोऽयं वसन्तसमयः — — — — अस्ति च दक्षिणपारावारतीरे सकलपापक्षय-दक्षक्षामण्डलमण्डन — — — — — श्रीपुरुषोत्तमाभिधं पुण्यक्षेत्रं । तत्र च सुकुसुमवृन्दे विगलितमन्देतरमकरन्दे — — — — — नवरससंसत् । तदत्र प्रिये ।

सहृदि परितोषणं सकलकार्य्यतो यत् सतां
ततो रचय चातुरीं चतुरनर्त्तने नन्दने ।
सभा गजपतेरियं भजति कौतुकं दर्शने
त्वमच भरतोत्तमा भवसि सर्व्वभूमण्डले ॥

अपिच । अयमर्थोऽपि भवत्या विदितमेव । यत् खलु सकलशास्त्रार्थसारज्ञान-
चिन्तननिराकृताशेषविपदः ... ... सङ्गीतकलाकौशलविलोकनचञ्चला-
धराधुराः शोभन्ते । तदेतेषां हर्षोत्पादननिमित्तं कापि नवीना नाटिका
अभिनेतव्या भवत्या ।

सूत्र । आकर्णय प्रिय । पृथ्वीयं नवखण्डिनी सुविचिरस्तत्राप्ययं भारतः
खण्डोऽप्युत्कलदेश एव रुचिरस्तत्रापि सम्भ्रमा ।
तस्यामप्युपमाविधानरहितं कैन्दुभरीराष्ट्रकं
यत्रायं वसुधाधिपः शिवपुरो नारायणः शोभते ॥

सूत्र । प्रिय । तदीयोक्तिचन्द्रोदया नाटिकेयं धरित्री भविची तदेवाभिनीता ।
समचारुपद्मा सदा धीरहृद्या क्वचिद्भूरिगद्या प्रबन्धानवद्या ॥ अपिच ।
शिवचन्द्रोदयनाटिकायामभिनीतायां कस्य न भवति चेतः पीयूषसिन्धौ
निमग्नं वा ॥ इत्यादि ।

End प्रव्वीं श्रीवल्लभद्रदेवस्पति शाठं प्रशास्तु स्वयं
विप्रा वेदविदो भवन्तु गुणिनः सम्पत्तिमन्तो भुवि ।
भूयात् कृष्णपदारविन्दयुगले भक्तिश्चिरं स्थायिनी
जीयाच्छ्रीनरसिंहमिश्रकविता यावच्चन्द्रमण्डलं ॥
इति यथार्थमाराध्य । एवमस्त्विति परिक्रम्य यथोचितस्थान प्रति ।
इति निष्क्रान्ताः सर्व्वे ।

Colophon इति श्रीनरसिंहमिश्रविरचितायां श्रीशिवनारायणभञ्जमहोदयनाटिकायां
जीवन्मुक्तिप्रतिपादनं नाम पञ्चमोऽङ्कः समाप्तः । समाप्तेयं नाटिका ।
श्रीशाम्बशिवाय नमः ।

विषयः । इति—१ । २ । ३ इति विवेचनादर्शनोद्योगोनाम । ४ । जीवन्मुक्तिप्रतिपा-
दनंनाम । ५ ।

No. 197. **भरद्वाजसंहिता (सटीका)।** Substance, palm-leaf, 16×1½ inches. Folia, 106. Lines, 6 on a page. Extent 4000 ślokas. Character, Nāgara. Date ? Place of deposit, Puri, Rājgoāpl Maṭha Mohānta, Mahārāj Raghunandan Rāmānuj Dās. Appearance, old. Prose and verse. Generally correct.

Beginning.

मूलस्य श्रुत्वा तु सकलान् धर्म्मान् सिद्धिमेधाश्च शाश्वतीं ।
भूय एव मुनिश्रेष्ठमिदमूचुर्महर्षयः ॥
केनोपायेन भगवन्निह सर्व्वेऽपि जन्तवः ।
प्राप्नुयुः परमां सिद्धिं सद्यो विगतकल्मषाः ॥
तेषां तद्वचनं श्रुत्वा भरद्वाजो महामुनिः ।
सस्मार परमं गुह्यं पुनस्तेदमभाषत । इत्यादि ।

श्रीमते रामानुजाय नमः ।

टीकाया अथ तत्रभगवान् भरद्वाजो महामुनिः संसाराग्निविदीपनव्यपगतप्राणात्मसञ्जीवनेच्छया सकलवेदान्तेषु प्रतिपन्नं न्यासाख्यं योगं सकलधर्म्मोपदेशानन्तरमुपनिषत्कल्पेन संहिताशेषेणोपादिशत् । तत्र सम्यगुपसन्नानां शिष्याणां महर्षीणां प्रश्नकलिप्रतीक्षाणां तादृशोपायश्रवणकौतूहलवतां प्रश्नस्तोकोऽयं श्रुत्वेत्याद्यस्तोकः । इत्यादि ।

End.

मुलस्य वैराग्यं वर्ज्जनं तेषां लज्जामानभयादिभिः ॥
हत्तिर्हि जीवितं गुप्तिः सारो वैराग्यमुच्यते ।
वैराग्ययुक्ता—... ... ... ॥
इत्थं किलात्मनो न्यासः जातो ह्यत्यच्यपादपः ।
असौ फलमयः सेव्यस्तन्न चोत्पद्यते विना ॥
हत्तिं सन्तोऽनुभूयेमामनुरूपामिहात्मनः ।
परत्र चानुमोदन्ते परमेण विपश्चिता ॥ (१)

Colophon. इति श्रीभरद्वाजसंहितायां परिशिष्टे चतुर्थोऽध्यायः ।

टीकायाः अन्योपासकानामपि चेतनानां तत्तद्देवतान्तर्यामितयावस्थापितैराराधितः स एव भगवान् न तदपेक्षितानि प्रयच्छति । श्रीरामानुजाय नमः ।

विषयः । इति श्रीभरद्वाजसंहितायां न्यासोपदेशः । १ । २ । ३ । ४ । इति—परिशिष्टे । १ । २ । ३ । ४ ।

No. 198. भारतामृतकाव्य By दिवाकर । Substance, palm-leaf, 13 × 1½ inches. Folia, 88. Lines, 4 on a page. Extent, 1760 slokas. Character, Uriā. Date ? Place of deposit, Dāmodarpur Sāsana, Zilla Puri, late Paṇḍit Gopināth Misra. Appearance, old. Verse. Generally correct.

Beginning. सरस्वत्यै नमः ।

प्रवेतुमाम्नायविधीननेकधा
दधार यः सत्यवतीतनूजतां ।
प्रदर्शिताद्वैतपथो विरच्यतां
स रच्यतां मय्यनुकम्पया हरिः ।
महानय यद्यपि दुस्तरः परैः
कवीश्वरैःकौरवकीर्त्तिसागरः ।
तथापि पाराशरपादचिन्तना
तरीमुरीकृत्य तरीतुमुत्सहे ।
इयं मदीया कविता न तादृशी
तथापि सन्तः परिशीलनेन वः
अवश्य सायास्यति साधुतां वने
परिघट्टाद्भूतिरिव स्मरद्विषः । इत्यादि ।

End. हरितामवलोक्य चक्रवाल हरिचाङ्गद्युतिहारितान्धकार ।
हरिमङ्गतो दधे युवीधः सवधूको मधुपारणाभिलाषं ।
य प्रासूत पतिव्रता गुणवती सुश्री विसुश्रात्मनः
श्रीवैद्येश्वरतो विभूषितभरद्वाजान्वयादात्मजं ।
यो देवाःस्तुतिमविभाषदुचितुः श्लोकैःशतेनाकरोत्
तत्काव्ये शुचिना रसेन सुभगः सर्गोगमद् द्वादशः ।

Colophon. इति श्रीभारतामृतकाव्ये मायचन्द्रवर्णनं नाम द्वादशसर्गः ।

(अतः परं न दृश्यते)

यं प्रासूत पतिव्रता गुणवती मुक्ता विमुक्तात्मनः
श्रीवैद्देश्वरतो विभूषितभरद्वाजन्वयाद्दात्मजं ।
काव्ये तस्य दिवाकरस्य कृतिनो बालाधरस्याद्गुनि
श्रव्ये भव्यपदोयमादिगदितः सर्गः समाप्तोभवत् ॥

विषयः। इति श्रीकविचन्द्ररायकृते भारतामृते महाकाव्ये वंशावतारसूचना पुरुरवः-प्रभृतिसप्तदशराजवर्णना नाम प्रथमःसर्गः। इति ऋचप्रभृतिनवराजवर्णनं नाम द्वितीयः सर्गः। इति तृतीयः। इति शान्तनुवंशप्ररोहो नाम चतुर्थः सर्गः। इति कुरुपाण्डवसम्भवो नाम पञ्चमः सर्गः। इति निस्तीर्णजतुगृहो नाम षष्ठः सर्गः। इति द्रौपदीस्वयम्बरप्रस्तावो नाम सप्तमः सर्गः। इति इन्द्रप्रस्थनिवासो नामाष्टमः सर्गः। इति सुभद्राहरणो नाम नवमः सर्गः। इति खाण्डववनवर्णने ऋतुवर्णनं।१०। इति पुष्पावचयजलक्रीड़ावर्णनं।११। इति सायं-चन्द्रवर्णनं नाम।१२।

No. 199. भार्गवोपपुराणं। (चत्वारिंशदध्यायपर्य्यन्तं उत्तरखण्डं)। Substance, country-made paper, $11 \times 6\frac{1}{2}$ inches. Folia, 83. Lines, 12 on a page. Extent, 2000 ślokas. Character, Nāgara. Date ? Place of deposit, Puri, Rájgopāl Maṭha Mohānta, Mahārāj Śrī Raghunandan Rāmānuj Dās. Appearance, fresh. Verse. Generally incorrect.

Beginning. श्रीमते रामानुजाय नमः। श्रीकृष्णगुरवे नमः।
यस्य द्विरदवक्ताद्याः पारिषाद्याः परश्शतं ।
विघ्नं निघ्नन्ति भजतां विष्वक्सेनं तमाश्रये ॥
श्रीशौनकादय ऊचुः।
सर्व्वधर्म्मार्थतत्त्वज्ञ सर्व्वशास्त्रविशारद ।
तत्त्वार्थविदुषां श्रेष्ठ सूत द्वैपायनप्रिय ॥
यानि कर्म्माणि लोकेषु चरित्राण्यपि शार्ङ्गिणः ।
× × × × × इस्माभिः श्रुतश्च वदताम्बर ॥
कृतकृत्या वयं स्यामः पवित्रीकृतचेतसः ।
योगिनां तु चरित्राणि भगवद्दास्यभोगिनां ॥
नोक्तान्यमृतकल्पानि त्वया धर्म्मोपदेशिना ।
न तृप्तिं यान्ति चेतांसि तस्मात्तानि वदस्व नः ॥

सूत उवाच ।

साधु पृष्टोऽस्मि मुनयो भवद्भिर्मोक्षकाङ्क्षिभिः ।
चिरकालादिदं वक्तुं भवतां वष्टि मे मनः ॥
भवन्त एव पृच्छन्ति मामिदं मुनिपुङ्गवाः ।
आसीत् परमहर्षोयमधुना मम चेतसि ।
वक्ष्यामि सर्व्वमेतद्वः शृणुध्वं तत्समाधिना ॥ इत्यादि ॥

End. वैराग्यज्ञान × × × स्वपर्य्ययः प्रदायकं ।
महायोगीशमाहात्म्यमिदं मुक्तिप्रदं नृणां ॥
आयुष्यं श्रीकरं भद्रं यशस्यं विजयावहं ।
धर्म्म्यं पवित्रं पापघ्नमारोग्यकरमुत्तमं ॥
यः श्रावयेत् सदा नृणां × × × × × सः ॥
... ...
इत्येतदाख्यानमनुत्तमं शुभं योगीश्वराणां महतां मनोहरं ।
भक्त्या नरो यः शृणुयात् × × × सौभाग्यवान् गच्छति तत् परंपदं ॥

Colophon. इति श्रीभार्गवे उपपुराणे उत्तरखण्डे नरनारायणसम्वादे महायोगिमाहात्म्ये चत्वारिंशोऽध्यायः । श्रीमते रामानुजाय नमः ॥ हस्त अक्षर-बापुजिव × × दश पाण्डेय सुत हैदराबाद आगवरथ्यावाय डिस्त्रि दर्भङ्गा-सन ॥ (?) ॥

विषय । इति श्रीमद्भार्गवीयपुराणे (भार्गवोपपुराणे) उत्तरखण्डे नरनारायणसम्वादे महायोगिमाहात्म्ये प्रथमोऽध्यायः । (एवं सर्व्वत्र द्वित्र्यादिभेदेन) महायोगीतिपदवाच्योऽत्र रामानुज एव तमेव नारायणावतारत्वेन वर्णितवान् अत्र तस्य जन्मारभ्य चरितवर्णनादिना ।

No. 200. भावचूड़ामणि । Substance, country-made paper, 12×4 inches. Folia, 12. Lines, 6 on a page. Extent, 200 slokas. Character, Bengali. Date ? Place of deposit, Cakradhā *via* Nārāyanaganj, Pandit Mahendra Candra Bhaṭṭacāryya. Appearance, fresh. Verse. Generally correct.

Beginning. ॐनमो गणेशाय ।
अथ दिव्यवीरपशुभावसङ्केतान् तद्भेदांश्चाह भावचूड़ामणौ ।

श्रीशिव उवाच ।

समयाचारसङ्केतं भावसङ्केतमेव च ।

सूचितन्तु महादेवि कथयस्वानुकम्पया ॥

रहस्यानां हि मन्त्राणां यदि भावो न जायते ।

सिद्धिर्न जायते देवि सत्यं सत्यं हि शैलजे ॥

सर्व्वमन्त्रेषु विद्यासु भावसङ्केतमेव च ।

तथापि शक्तिमन्त्रेषु विशेषात् सर्व्वसिद्धिदं ॥ इत्यादि ।

End. तथापि प्रकृतेर्योगात् चिप्रं प्रत्यचतां लभेत् ॥

सांयात्रिकः कुदेशात्तु यथा नावं प्रगृह्य च ।

नानादेशं समुत्तीर्य्य समुद्रं विशते चिरात् ॥

Colophon. इति भावचूड़ामणौ पश्वभावनिर्णयः समाप्तः ।

विषयः । अधिकारिभेदेन दिव्यवीरपश्वक्रमात् ब्रह्मप्राप्तिविधायकानां भावानां लक्षण-कथनं ॥

No. 201. भावदीपिका । By अच्युतवीर । Substance, country-made paper, 16×6 inches. Folia, 14. Lines, 7 on a page. Extent, 400 slokas. Character, Bengali. Date ? Place of deposit, Zilla Mayamansimha, Parganā Aliyá, post Jāmurki, grām Háláliyá, Paṇdit Gurudās Vidyāratna. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐनमो गणेशाय ।

श्रीमद्गुरुपदोल्लासिनखचन्द्रमरीचिका ।

करोति सेविता नित्यमज्ञानध्वान्तसंचयं ॥

निःशेषागमसन्दोह मकरन्दमधुव्रतः ।

श्रीयुताच्युतधीरोयं चकार भावदीपिकां ॥

सकलसाधने भावस्यावश्यकत्वं तमज्ञात्वा कस्मिंश्चित् कर्म्मणि कस्याधिकार इत्यनिर्णीय सर्व्वे भ्रष्टा इव जातिधनं सकलं लोके वेदविरुद्धमाचरन्ति तदर्थं परमप्रणिधानेन भावो निरूप्यते । इत्यादि ।

End. कुम्भयित्वा ततो वायुं कुण्डली मुखवर्त्मणि ।

योजयित्वा ततो वीजं नीत्वा नादावमानकं ॥

गमागमं कारयित्वा सिद्धो भवति नापरः ॥
इत्यस्यार्थो गुरुपादाद्‌वगन्तव्यः ।
पुष्कराख्यस्य पौत्रेण जनार्दनतनूभुवा ।
श्रीयुताच्युतधीरेण कृतेयं भावदीपिका ॥

Colophon. इति भावदीपिका समाप्ता ॥

विषयः । दिव्यवीरपश्चक्रमात् भावस्तु त्रिविधस्तत्र तेषां यथाक्रमेणोत्तममध्यमाधम-जात्यन्तर्गतत्वनिरूपणं । एवं भावनिर्णयनादेव सिद्धो भवतीति विचारपूर्व्वकं ब्रह्मणः स्त्री-पुम्भावात्मकस्य सम्यग् ज्ञानेनैव स्वाभीष्टसिद्धिरित्यादि कथनं ॥

No. 202. भावसारः । Substance, palm-leaf, 11 × 1 inches. Folia, 25. Lines, 4 on a page. Extent, 300 slokas. Character, Uriya. Date ? Place of deposit, Puri Saṇkaramaṭha, Paṇḍit Madhusūdana Tirthasvāmi. Appearance, fresh. Verse. Generally correct.

Beginning. ॐनमः परमात्मने ।
नत्वा सिद्धेश्वरीं देवीं सच्चिदानन्दविनोदिनीं ।
अनाद्यविद्यासिद्ध्यर्थं भावसारं तनोम्यहं ॥
क्रियाकलापबहुलं शिवोक्तं त्रिपदाङ्कितं ।
तत्प्रकर्त्तुरकर्त्तुर्वा द्वयोरपि शिवाय च ॥
कर्त्ता भवेत्कन्त्रयोगी कर्म्ममार्गविशारदः ।
अकर्त्ता कर्म्मसन्न्यासी ब्रह्मानन्दपरायणः ॥
कुर्य्याद्धर्म्मसिद्ध्यर्थेन कामायार्थं सिद्धाजयेत् ॥ इत्यादि ।

End. इत्येवं योगमार्गे च ध्यात्वाच्छदेहमण्डले ।
विरमेद्ध्यानतो मूलं बाह्यपूजाञ्चरेत् ततः ॥
इत्येवं ध्यानतो वापि धारणात् पाठनादपि ।
लभेत् सौख्यञ्च मोक्षञ्च राज्यसिद्धिं शिवाज्ञया ॥

Colophon. इति भावसारे प्रथमाभिप्रायः ।

विषयः । पराविद्यासाधनविधिकथनं ।

No. 203. भाष्यभावप्रकाशः By श्रीनिवासः। Substance, palm-leaf, $14 \times 1\frac{1}{2}$ inches. Folia, 109. Lines, 5 on a page. Extent, 3500 ślokas. Character, Uria. Date ? Place of deposit, Jagannātha Vidyādharpur, parganā Ráhán, district Purī, Paṇḍit Rāmācandra Miśra. Appearance, tolerable. Prose. Generally correct.

Beginning. क्षीराम्भोधिप्रमथनविधौ वीक्ष्य लक्ष्मीं मनोज्ञां
मध्ये तोयं विकचवदनाम्भोजमाविर्भवन्तीं ।
औत्सुक्येन स्थितमथितयाव्याश्रुतेः शार्ङ्गपाणे
र्लीलापाङ्गस्फुरितममितं मङ्गलं नस्तनोतु ॥
यद्बुद्धिवैषम्यमपेतमोहं शास्त्रेषु तत्त्वं विषयीकरोति ।
नारायणो यः परया स्वभक्त्या तन्नातमीशं प्रणमामि नित्यं ॥
दीक्षिताशेषशास्त्रज्ञजगन्नाथप्रसादतः ।
भाष्यभावप्रकाशोऽयं गोपीनाथेन तन्यते ॥
तत्र चिकीर्षितस्य ग्रन्थस्य आरम्भाव्यवहितपूर्व्वकाले नियमतः क्रियमाणस्य दृष्टसाधनतांशे अमशून्यानामविगीतलौकिकाचारविषयत्वेन अनुमितकर्त्तव्यताकस्य नमस्कारस्य परिशेषानुमानात् समाप्तिफलकत्वसिद्धौ तत्कामनाया कृतस्य परापरगुरुनमस्काररूपस्य शिष्यशिक्षार्थं निबध्नन्नं कुर्व्वन्नेव प्रयोजनाभिधेये दर्शयति प्रणम्येत्यादि ।

End. नानाशाखासु पाठ्यमानसम्बादिन्यः श्रुतयः अनुकूलतर्क इति कृतमप्रयोजकत्वशङ्कयेति निष्प्रत्यूहेश्वरसिद्धिरिति संक्षेपः ।
दिव्यादिसिंहनरपालशिवाङ्कतोऽयं
ग्रन्थः समाप्ति शिवपत्कमलप्रसादात् ।
सच्छ्रीनिवासविदुषा नभसाद्भाव
भाष्यप्रकाश इनवारसिताष्टमीतः ॥

विषयः। प्रशस्तपादविरचितभाष्यस्याख्यानं ।

No. 204. भास्करनिर्णयः। Substance, country-made paper, 9×4 inches. Folia, 28. Lines, 10 on a page. Extent, 560 ślokas. Character, Nāgara. Date, Saṃvat 1859. Place of deposit, District Chāprā, P. O. Gopālganj Harapurā, Jagadeo Paṇḍit. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।

नमश्चण्डिरचन्द्र चारुचन्दनभूषणे ।

यत्प्रभावात् लिखाम्यद्य ग्रन्थं निर्णयभास्करं ।

प्रणम्य लम्बोदरविघ्नराजं समस्तदेवैरभिवन्द्यमानं ।

बुद्धिप्रदं लोकहिताय यत्नं करोम्यहं निर्णयभास्कराख्यं ॥

अथ एकभक्ततिथिनिर्णयः । यथाहाङ्गिराः ।

मध्याह्नव्यापिनीग्राह्या एकभक्तव्रततिथिरिति ॥ इत्यादि ।

End. अन्यच सुर × × × × × ×

कर्पूरमांसी सचचन्दनञ्च ।

सशर्करा निर × × × दशाङ्गञ्च

× × × × प्रवदन्ति सन्तः ॥

Colophon. इति भास्करनिर्णयः समाप्तः ॥ सम्वत १८५९ ।

विषयः । एकभक्तादितिथिनिर्णयः । प्रतिपदादिसकलतिथिनिर्णयः ॥ तत्कर्म्मादिव्यवस्था-कथनञ्च । मलमासनिर्णयः । पर्व्वादिनिर्णयः । नदीरजोदोषकथनं । अशौचव्यवस्थादिकथनं ॥

No. 205. भैषज्यरसामृतसंहिता By उपेन्द्र । Substance, country-made paper, 13×5 inches. Folia, 32. Lines, 9 on a page. Extent, 550 slokas. Character, Nāgara. Date ? Place of deposit, District Chāpra, Sisoyā, Paṇḍit Rāghavaprasād Misra. Appearance, old. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।

भैषज्येषु रसायणास्तु फलदा माचात्मकाः शम्भुना

निर्दिष्टाः कथयामि तानचमपि श्लाघ्योपदेशं गुरोः ।

भैषज्यं विविधं रसायनमिदं दैवं तथा मानुषं

प्रोक्तं यच रसादिभिर्यदपरं शस्त्रादिकर्म्मा (अथ) ॥

End. जातीफलं लवङ्गन्तु विड़ङ्गोशीररेणुका । (अतःपरं खण्डितं) ॥

विषयः । रसकर्पूरादिकथनं । वज्रशोधनमारणादिकथनं । रसादिशोधनकथनं । सूचिकाभरणरसादिकथनं । मृतसञ्जीवनमहाज्वराङ्कुशादिरसकथनं । कामेश्वररसादिकथनं ॥

No. 206. **मणिप्रदीप** By **रघुनाथ** । Substance, country-made paper, 10×5 inches. Folia, 10. Lines, 11 on a page. Extent, 250 slokas. Character, Nāgara. Date ? Place of deposit, District Chāpra, P. O. Gopālganj, Harapurā, Jagadeo Paṇḍit. Appearance, very old. Verse. Incorrect.

Beginning. यद्‌लसचलितैः कृपाकटाक्षै-
ईद्विनदिनेशवशिष्ठलोमशाद्याः ।
ग्रहगणित महाब्धिपारभीयु-
स्तद्दहसुमाईवपुर्महः श्रयामि ॥
आलोक्य भास्करकृतानखिलप्रबन्धान्
पूर्व्वैः कृतानपि च सूर्य्यमतेन खेटान ।
वक्ष्ये स्फुटान् श्रीरघुनाथशर्म्मा
संक्षेपतो ग्रहविदां श्रमनोदनाय ॥

End. लग्ने न रजन्या द्युनिशितपरिमितैर्वा विशुद्धिः क्षपायां ।
लग्नं षड्भान्वितार्कात् समयकृतिरपि स्याद्युताद्ायनांशैः ॥

Colophon इति सोमभट्टात्मजरघुनाथभट्टविरचिते मणिप्रदीपके त्रिप्रश्नाधिकारः ॥

विषयः । ग्रहानां भोग्यवर्षफलादिकथनमुखेन त्रिप्रश्नाधिकारनिरूपणं ।

No. 207. **मथुरानिरुद्धं नाटकं** By **चन्द्रशेखरराजगुरु** । Substance, palm-leaf, 16×1½ inches. Folia, 58. Lines, 3 on a page. Extent, 1000 slokas. Character, Uriá. Date ? Place of deposit, Grām Vīranarasiṃhapur śāsan, parganā Rohan, zilla Puri, Paṇḍit Mṛtyunjaya Miśra. Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।
भद्राय स्मितकौमुदीमधुरमास्येन्दुं दधद्दासुके
रालोकादिविलीयमानपवनानालीढ़नासापुटं ।
तेजः किञ्चिदमन्दमैन्दवमहःसन्दोहनिस्यन्दना
वस्कन्दादिव जातनिद्रनयनव्याजाम्बुजं जायते ॥
नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण भो सभासदः जटापटलकैतवोदित-
निखिलनेत्रदहनार्चिरदञ्चितस्य सकलकलुषकरिबलदलनसार्थकीकृतपञ्च-

बद्नाभिधानस्य............हरियाह्वचूडामणे र्याचाया सुपस्थापनीयान् वो विज्ञापयामि । अमी चास्मदीयाः कुशीलवाः किमप्यभिनेतुमुत्-कण्ठन्ते । ....तदाज्ञापयत किंनाम रूपकमभिनेतव्यमिति । (आकाशे-कर्णं दत्वा) किमाज्ञापयन्ति भवन्तः मधुरानिरुद्धं नाम रूपकमभिनेतव्य-मिति । सदैश्चयं । कतमः पुनरस्य रूपकस्य रचयितेति न स्मरामि (पुनराकाशे)

देवोऽजायत रामचन्द्रधरणीभर्त्तुः स मर्त्योत्तमान्
स्वेच्छोत्पादनकर्म्मणि प्रथमतः कल्पकप्रथां विभ्रतः ।
चौणीन्द्रगणमौलिदत्तचरणः हत्वा वनैकस्थितिं
धीरः स्वात्मनि वीरकेशरिपदं यः स्वान्वयं मन्यते ॥
तद्देशनित्यवास्तव्यः सद्यः सत्कविकोविदैः ।
अस्य कर्णाप्रबन्धस्य चयनीचन्द्रशेखरः ॥ अनिरुद्ध । ....इत्यादि ।

End. यावत् कैरवरोचिषीरमणयोर्यावच्च पद्मेश्वर-
च्छायानायकयोरुदञ्चति मिथः प्रेमानुबन्धप्रथा ।
यावत्स्थावरजङ्गमात्मकतया द्वैतञ्च लोकत्रये
तावद्भावबतीर्विधेरिव कवेर्वाचो जनः श्लाघतां ॥
पार्व्वती । एवमस्तु । इति निष्क्रान्ताः सर्व्वे ।
अनिरुद्धानन्दोनामाष्टमोऽङ्कः ।

Colophon. इति श्रीकविकोविदावतंसचयनीचन्द्रशेखररायगुरुविरचितं मधुरानिरुद्ध नाम नाटकं समाप्तं ॥

विषयः । उपायोपन्यासो नाम प्रथमोऽङ्कः । वसन्तर्त्तुप्रवर्त्तनो नाम द्वितीयोऽङ्कः । नायक-विप्रलम्भो नाम तृतीयोऽङ्कः । ध्वजभङ्गो नाम चतुर्थोऽङ्कः । खेचरमिद्धिर्नाम पञ्चमोऽङ्कः । नायकनिर्णयोनाम षष्ठोऽङ्कः । प्रियतमासमागमो नाम सप्तमोऽङ्कः । अनिरुद्धानन्दो नामा ष्टमोऽङ्कः ।

No. 208. मननग्रन्थः । Substance, country-made paper, 12 × 5 inches. Folia, 80. Lines, 14 on a page. Extent, 2400 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance old. Prose. Correct.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमें ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् । १ ।
बोधानन्दघनं निरस्तसकलं कारुण्यपूर्णेक्षणं ।
मूढ़ानामुपदेशकं च सततं पापात्मनां पापहं ।
वैराग्यं च हि रागिणां सुखकरं सम्पादकं सर्व्वदा ।
श्रीमद्देशिकवासुदेवयतिनं मूढ़ात्मकोऽहं भजे । २ ।

End. अतस्तवसुकृतमस्तीति तं प्रस्तुत्य पलायितः. दार्ष्टान्तिके तु कर्मठकाः शास्त्रपाठकाः ज्ञानिनं भ्रंशयन्ति ।

Colophon. इति मननग्रन्थे षोड़शवर्णकं समाप्तं ।

विषयः । ब्रह्मविद्योपासनाकथनं ।

No. 209. मन्त्रार्थदीपिका By गोविन्दन्यायवागीशः। Substance, palm-leaf, 11 × 1½ inches. Folia, 214. Lines, 4 on a page. Extent, 2400 slokas. Character, Uriá. Date ? Place of deposit, Puri, Uriá Maṭha Mohanta, Śrī Adhikārī Rāmkṛiṣṇa. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीगणेशाय ।
देव श्रीगुरुनाथपादयुगलं ध्यानामृतामोदिना
मन्त्राणामखिलार्थदुर्घटतया संक्षेपतो यत्नतः ।
मन्त्रोद्धारकुलोपचाररचनै र्नत्वा गुरूनादरात्
गोविन्देन विविच्यते सुगमतोमन्त्रार्थसन्दीपिका ॥
गोविन्दन्यायवागीशभट्टाचार्य्यविनिर्म्मितां ।
मन्त्रार्थदीपिकां धीरा भावयध्वं सुनिर्म्मलां ॥
सन्ति यद्यपि भूयांसो मन्त्रार्थानां प्रकाशिका ।
तथापि शीघ्रबोधाय किञ्चिदत्राभिधीयते ॥
स चारराशिकोष्ठानामनुकूलान् भवेन्मनून् ।
इति सारदाधृतवचनात् कोष्ठं हरचक्रं । इत्यादि ।

End. अथ किरीटि मन्त्रः ।

किरीटकेयूरहारमकरकुण्डलशङ्खचक्रगदाम्भोजहस्तः पीताम्बरधरः श्री-वत्साङ्कितवक्षःस्थलश्रीभूश्रीभूमिसहितामतिस्वयदीपकरायसहस्रादित्याभे नमः । (?)

Colophon. इति श्रीन्यायवागीशभट्टाचार्य्यविरचिता मन्त्रार्थदीपिका समाप्ता ॥

विषयः । कतिचिन्मन्त्राणां व्याख्यानं ।

No. 210. मलमासविचारः By भगीरथमिश्र । Substance, English paper, 18 × 4 inches. Folia, 1. Lines, 7 on a page. Extent, 28 slokas. Character, Bengali. Date ? Place of deposit, Elangā *via* Tangāil. Babu Nilakamala Bhaṭṭācārya, zemindar. Appearance, fresh. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

अथ प्रकृतमासमलमासक्षयमासानां साधारणं लक्षणं । तत्र मेषस्थरव्यना-रब्ध इषस्थरविसंक्रमणाभावविशिष्टा ये ये तद्भिन्नशुक्लप्रतिपदादिदर्शान्तत्व चान्द्रवैशाखत्वं । एवं मासान्तरेष्वुन्नेयं । इत्यादि ।

End. यद्वा स्वाव्यवहितपूर्व्वक्षणावच्छिन्नरविभुज्यमानराशिसंयोगविशिष्टक्रान्ति-मत्त्वको मलमासः ।

Colophon. इति श्रीभगीरथमिश्रविरचिते विचारदर्पणे मलमासविचारः ॥
ॐ तारिण्यै नमः ।

विषयः । प्रमाणपूर्व्वकं मलमासनिरूपणं ॥

No. 211. महाप्रवरभाष्यम् । Substance, country-made paper, 11 × 4½ inches. Folia, 5. Lines 14 on a page. Extent, 200 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

श्रियमुरसि दधानं कुक्षिकोटौ त्रिलोकीं
हृदि निजपरतत्त्वं स्वस्तिके स्वं शरीरं ।

मनसि करणसंघं नासिकाग्रे स्वदृष्टिं
प्रणवमपि मुखे स्वे योगमूर्त्तिं नमामि ॥
अनेन श्लोकेन इष्टदेवतानमस्कारं करोति, योगेन उपलम्भिता मूर्त्तिः
शरीरं यस्य स योगमूर्त्तिः तं नमामि वन्दे । इत्यादि ।

End. आम्नायानां गम्भीराः अगाधा मार्गा पन्थानो येन स तथोक्तः ।
त्रीणि काण्डानि कर्मकाण्ड देवताकाण्ड ज्ञानकाण्डानि भूषणं यस्य स तथोक्तः ।
प्रवरं समग्रं सकलं संक्षेपतो भास्करसूरिराह ।

Colophon. इति भास्करसूरिविरचितं महाप्रवरभाष्यं समाप्तं ।

विषयः । प्रवराध्यायस्यगोत्राणां प्रकृष्टरूपेण व्याख्या ।

No. 212. **महामुण्डमालातन्त्रं ।** Substance, country-made paper, 10 × 4 inches. Folia, 20. Lines, 9 on a page. Extent, 720 ślokas. Character, Bengali. Date ? Place of deposit, Sirpur *via* Tangāil, Paṇḍit Bhabānīnāth Bhaṭṭācāryya. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमः शिवाय ।

कैलासशिखरे रम्ये गन्धर्व्वगणसेविते ।
हरवक्षःस्थिता देवी पप्रच्छ सुरसुन्दरी ॥
श्रीपार्व्वत्युवाच ।
देवदेव महादेव सृष्टिस्थित्यन्तकारक ।
नीलकण्ठ जगद्वन्द्यो प्रभो शङ्कर भो हर ॥
नमस्तुभ्यं जगन्नाथ मम नाथ मम प्रभो ।
शरणागतदीनार्त्त परित्राणपरायण ॥
सर्व्वाधार निराधार साधारधरणीधर ।
वेदविद्याधराधार गङ्गाधर नमोऽस्तुते ॥
श्रुतं परममन्त्रं वै सारात्सारं परात्परं ।
यं श्रुत्वा शीघ्रमायान्ति शिवलोकमनामयं ॥
इदानीं श्रोतुमिच्छामि गुह्याद्गुह्यतरं परं ।

सारात्सारतरं देव पावनं सर्व्वदेहिनां ॥
श्रुत्वा जीवः शिवत्वञ्च लभते नात्र संशयः ॥ इत्यादि ।

End. जवां द्रोणं तथा कृष्णां मालूरं करवीरकं ।
साक्षात् ब्रह्मस्वरूपञ्च महादेव्यै निवेदयेत् ॥
श्वेतचन्दनसंयुक्तं रक्तचन्दनलेपितं ।
यो दद्यात् भक्तिभावेन स विशेषो न संशयः ॥

Colophon. इति श्रीमहामुण्डमालातन्त्रे पार्व्वतीशिवसम्वादे द्वादशः पटलः ।

विषयः । इति श्रीमहामुण्डमालातन्त्रे पार्व्वतीश्वरसम्वादे प्रथमः पटलः (एवं सर्व्वत्र) दिव्यवीरपशुनामाचारभावसाधनसमयाचारादिनिरूपणं । दुर्गामाहात्म्यकीर्त्तनं । शाक्तप्रशंसाकथनं । दुर्गापूजाविधानकथनं तस्या एव पूजनेन सर्व्वेषामेव सिद्धिर्भविष्यतीति कथनं । पुष्पादीनां माहात्म्यकीर्त्तनं । पुष्पविशेषेण पूजाविशेषकथनं ॥

No. 213. महालक्ष्मीमाहात्म्यम् । Substance, country-made paper, 10 × 4 inches. Folia, 51. Lines, 14 on a page. Extent, 714, slokas. Character, Nāgara. Date, Saṃvat 1845. Place of deposit, Benares City, late Babu Hariścandra. Appearance new. Verse. Correct.

Beginning. स्वस्ति श्रीगणेशाय नमः . श्रीमहालक्ष्म्यै नमः .
शाम्भव उवाच ।
आसीत् कोल्हापुरे पुर्व्वं कोल्हाख्योदानवोत्तमः
गयाख्यो लवणाख्यश्च कनिष्ठो तस्य भ्रातरौ ।

End. पितरस्तर्पितास्तेन यश्चरेतमुत्तम (?) ।
धार्मिकास्तु महीपालाः प्रजाः सन्तु निरामयाः ।
मही सस्यवतीयास्तु कालेवर्षन्तु वारिदाः ।

Colophon. इति श्रीमहालक्ष्मीमाहात्म्ये व्रतव्याख्यानसमुच्चये षोडशाध्यायः समाप्तः ।
संवत् १८४५ ।

विषयः । महालक्ष्मीव्रतादिकथनम् ।

No. 214. महालक्ष्मीहृदयस्तोत्रं (आथर्व्वणरहस्यीयं)। Substance, country-made paper, 11×4 inches. Folia, 8. Lines, 10 on a page. Extent, 160 ślokas. Character, Bengali. Date ? Place of deposit, Puri, Sankaramaṭha. Appearance, old. Verse. Generally correct.

Beginning. श्रीगुरुचरणेभ्यो नमः। श्रीमहालक्ष्म्यै नमः।

ॐ अस्य श्री आद्यादिमहालक्ष्मीस्तोत्रस्य भार्गवऋषिः त्रिष्टुभादीनि-च्छन्दांसि श्री आद्यादिमहालक्ष्मीर्देवता श्रीँ वीजं ह्रीँ शक्तिः ऐँ कीलकं मम आद्यादिमहालक्ष्मीप्रसादसिद्ध्यर्थं विनियोगः। इत्यादि।

End. ध्यायेन्नित्यं प्रहसितमुखीं कोटिबालार्कभासां
विद्युद्वर्णाम्बरवरधरां भूषणाद्यैः सुशोभां।
वीजापूरं सरसिजयुगं विभ्रतीं स्वर्णपात्रं
भर्त्रा युक्तां × × × × भयदा मह्यमप्यच्युत श्रीः॥ (?)

Colophon. इत्याथर्व्वणे महारहस्ये श्रीमहालक्ष्मीहृदयस्तोत्रं सम्पूर्णं॥

No. 215. महावाक्यनिर्णयः। Substance, country-made paper, 11×4 inches. Folia, 34. Lines, 9 on a page. Character, Nāgara. Date, Sáka 1748. Place of deposit, District Chāprā, P. O. Samaria, Sisoya, Paṇḍit Raghavāprasād. Appearance, tolerable. Prose. Incorrect.

Beginning. चिन्तामणिविनायकाय नमः। अथ महावाक्यविवरणम्।
समस्तविषयवासनाविनिर्मुक्तः स परमहंसः। किं करोति। केवलं द्वादश-महावाक्यविवरणं करोति विवरणं नाम विचारः। तन्महावाक्यं कीदृक, तत्रौपनिषदानि वाक्यानि॥ इत्यादि

End. शब्दस्वरूपेण आत्मनामभिव्यक्तिं करोति (अथर्व्वणो) वेदात् मोक्षदर्शनं पातञ्जलदर्शनं उपदर्शनं मन्त्रशास्त्राणि इति संक्षेपेण ब्रह्मस्वरूपकथनं॥

Colophon. इति अथर्व्ववेदस्य ब्रह्मशब्दनिर्णयो द्वादशः सिद्धान्तः॥
शाके श्रीशालिवाहनक्षितिपतिजनितोनन्दवेदागभूमि...। १७४८॥

विषयः। प्रज्ञानमानन्दोब्रह्म। अहं ब्रह्मास्मि। तत् त्वमसि इत्यादि द्वादशमहावाक्यै-र्ब्रह्मविचारकथनं।

No. 216. महाविद्यावृत्तिटिप्पनम् । Substance, country-made paper. 12×4 inches. Folia, 8. Lines, 18 on a page. Extent, 870 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, old. Prose. Correct.

Beginning. नमो वीतरागाय ।

श्रियोधाम श्रीमज्जिनवरपदाम्भोजयुगलं ।
गिरं देवीं चेतोभिमतफलदाने सुरमणीं ।
नमस्कृत्यानन्दाद्गुरुचरणयुग्मञ्च विधिना ।
महाविद्यावृत्तेः किमपि करवै टिप्पनमहम् ॥

End. तथापि वाचयितृविनेयजन्मनः स्थिरीकरणायार्थं (...) मिकामन्त्र कृतमस्तीति ज्ञेयम् । इति षोड़शोपाख्यानं समाप्तम् ।

Colophon. इति महाविद्याटिप्पणं समाप्तं श्रीभुवनसुन्दरसुरिकृतम् ।

विषयः । महाविद्यावृत्तेर्व्याख्यानम् ।

No. 217. मालाविधानतन्त्रम् । Substance, country-made paper, 9×3½ inches. Folia, 71. Lines, 16 on a page. Extent, 1000 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, late Babu Hariścandra. Appearance, old. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः ।

अथ श्रीशक्तियुक्तमालामन्त्रस्य उपस्थेन्द्रियाधिष्ठायिवरुणादित्यऋषिः गायत्रीच्छन्दः मात्रिक (...) भट्टारकपीठस्थितकामेश्वराङ्कनिलया कामेश्वरी ललिता महाभट्टारिका देवता चतुर्मिद्धौ विनियोगः ।

End. मन्त्राष्टसंख्यामालाभिर्मन्त्रयित्वा घटोदकं मन्त्रारः सेवनं कुर्यात् वन्ध्या पुत्रवती भवेत् ।

Colophon. इति मालामन्त्रविधान इति मालाविधानं समाप्तम् ।

नानाविधप्रकारेण मालामन्त्रजपादिकथनं ।

No. 218. मीनराजजतकं By यवनाचार्य्यः। Substance, country-made paper, 11 × 6 inches. Folia, 107. Lines, 17 on a page. Extent, 12000 slokas. Character, Maithili. Date ? Place of deposit, District Chāpra, P. O. Ramkala, Bagihi, Paṇḍit Tārādatta Ojhā. Appearance, tolerable. Verse. Correct.

Beginning. श्रीगणेशाय नमः॥

अष्टौविधाः त्रिजगतां शिवाय
संहारकाले स्थितयेऽच्युताय
तुभ्यं नमः सर्व्वगताय नित्यं
त्रयीमयायामलभास्कराय।
यदुक्तवानपूर्व्वमुनिस्तु शास्त्रं होरामयं यच्चति तं जयाय।
तं मीनराजोनिपुणं स्वबुद्ध्या विचिन्त्य चक्रे सहस्रमात्रं।
अथ द्वादशराशेर्विहारभूमिकथनं॥
अद्यः सूतोमेष समानमूर्त्तिः कालस्यमूर्द्धां गदितः पुराणैः
सोजा विकाशं श्रीचरकन्दराचिस्तेनाग्निधात्वाकररत्नभूमिः॥ इत्यादिः॥

End. युग्मं प्रसूता निजगोपनाशं प्राप्नोति धत्ते विषमं तदेव।
द्वारेण सार्द्धं म्रियते यदा वा करोति राष्ट्रस्य पुरस्य नाशं।
तत् सर्गता स्यात् यदि गोपुरस्तादुक्ताविशेषात् शुभचेष्टितास्य।
पातुर्विधत्ते विजयं प्रतापं
सुवित्तलाभं त्वरिसंक्षयश्च
इतिश्रीवृद्धयवने गोविचेष्टितं॥

Colophon. इति श्रीयवनाचार्य्यविरचितं मीनराजजातकं समाप्तं॥

विषयः। राशिप्रभेदादिकथनं॥ ग्रहयोनिभेदादिकथनं॥ जन्मफलादिकथणं॥ अष्टवर्गफलादिकथनं॥ ग्रहचारादिकथनं॥ नक्षत्रचारादिकथनं॥ योगादिकथनं॥ रश्मिचिन्ताकथनं॥ जातकाद्यध्यायः॥ शकुनाद्यध्यायः॥

No. 219. मुक्ताचरित्रम्। By कृष्णकविः। Substance, country-made paper, 14 × 6 inches. Folia, 100. Lines, 10 on a page. Extent, 1200 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, late Babu Hariścandra. Appearance, new. Verse. Correct.

Beginning. कन्दर्पकोटिरम्याय स्फुरदिन्दीवरत्विषे ।
जगन्मोहनलीलाय नमो गोपेन्द्रसूनवे ॥
क्रयविक्रयखेलाभ्यो मुक्तानां सविदतात्मनोः ।
मिथोजयार्थिनोर्वन्दे राधामाधवयोर्युगम् ॥

End. मुक्ताचरित्रपुष्पाद्यैर्गुम्फं गुम्फितमद्भुतं ।
वतंसयतु मत्स्नेहात् श्रीमद्रूपगणोहरः ।
यस्य सद्रवल्लतोद्भूता मया
मौक्तिकोत्तम कथा प्रचारिता ।
तस्य कृष्णकविभूपतेर्व्रजे
संगतिर्भवतु मे भवे भवे ॥

विषयः । श्रीकृष्णचैतन्यस्तुतिः ।

No. 220. मुहूर्त्तचिन्तामणि टीका By रामदैवज्ञः । Substance, country-made paper, 13 × 5 inches. Folia, 211. Lines, 9 on a page. Extent, 5300 slokas. Character, Nāgara. Dated ? Place of deposit, District Chāpra, P. O. Samariya, Sisoyā, Paṇḍit Rāmnāth Misra. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।
गौरीशङ्कोत्तकपत्रभङ्गमाकृष्यरस्तेन ददन्मुखाय । इत्यादि अस्य टीका मुहूर्त्तचिन्तामणिसंज्ञकस्य स्वयं कृतस्य प्रमिताक्षराख्यां ।
रामोविश्वनेविहर्तिप्रणम्य विघ्नार्कनुदान् पितरौ गुरून् ।
गौरी शिव इति । द्विपस्य गजस्यास्यंयस्येति सद्विपास्यः गणेशः विघ्नं हन्तु नाशयतु युष्माकं इतिशेष इत्यादि ॥

End. पुनःकीदृशः कृतीकुशलः ग्रन्थकरणसमर्थ इति शेषः । ग्रन्थकर्त्तृत्वमेव उत्तरार्द्धेन प्रकाशयति । योरम्यामिति योरम्यां जनपद्धतिं जातकपद्धतिं-दुष्टाशयध्वंसिनीं दुष्टा जन्मपद्धतिमार्गसम्प्रदायानभिज्ञा स्तेषामाशयंरभिप्रायं ध्वंसयति इति दुष्टाशयध्वंसिनी तां समकरोत् तथा उत्तमे ब्रह्म-पक्षार्थपक्षप्रतिपादके कामधेनुगणिते ग्रन्थविशेषे टीकाञ्च सतां प्रीतये-ऽकार्षीत् कृतवानित्यर्थः । मूलं । तदात्मज उदारधीर्विबुधनीलकण्ठानु-जोगणेशपदपङ्कजं हृदि निधाय रामाभिधः गिरीशनगरे वरे भुजभुजेषचन्द्रे-

मिते शके विनिरमादिमं खलु मुहूर्त्तचिन्तामणिं ॥ अथ स्वनामकथनपूर्व्वकं-ग्रन्थसमाप्तिं कन्दसाह । तदात्मज इति तस्यानन्तस्यात्मजोरामाभिधः गिरीशनगरे वाराणस्यां मुहूर्त्तचिन्तामणिं नामधेयं ग्रन्थं भुजभुजेषुचन्द्र-१५२२ शाके द्वाविंशत्यधिकपञ्चदशमिते निरमात् अकार्षीत् शेषं स्फुटं ॥

Colophon. इति दैवज्ञानन्तसुतदैवज्ञरामविरचितायां स्वकृतमुहूर्त्तचिन्तामणिटीकायां प्रमिताक्षरायां गृहप्रवेशप्रकरणं समाप्तं॥

No. 221. मुहूर्त्तभूषणम् By रामसेवकत्रिवेदी । Substance, country-made paper, 9×3 inches. Folia, 25. Lines, 7 on a page. Extent, 356 ślokas. Character, Nāgara. Date, Saṃvat 1830. Place of deposit, District Chāpra, P. O. Gopālganj, Harapurā, Jagadeo Paṇḍit. Appearance, very old. Verse. Incorrect.

Beginning. श्रीगणेशाय नमः ।

श्रीकृष्णचरणाम्भोजे केवल्यमधुपूरिते ।
भृङ्गायते मनोरत्नं रामसेवकशर्म्मणां ॥
वैशाखे श्रावणे मार्गे पौषे फाल्गुनिके तथा ।
कन्यायुग्मधनुर्मीन भिन्नराशौ रवौ स्थिते ।
गृहारम्भः प्रशस्तःस्याचन्द्रे पार्श्वद्वयं गते ॥

End. सादितीन्द्रवसुपुषके क्षयक्रिया । अश्विपुष्यकरमित्रकोत्तरा चित्रहरिपुङ्गन्दपेक्षणे ॥

Colophon. इति मिश्रप्रकरणं ॥ इति श्रीमन्त्रवेदिदेवीदत्तात्मजरामसेवककृतिर्मुहूर्त्त-भूषणोनाम ग्रन्थः समाप्तः ॥ गजागाश्वचन्द्रोन्मिते विक्रमाब्दे १७७८ वैष्णवाह्वे श्रीमत्तस्य सेवकस्य प्रपूर्णा ॥ गुरुप्रसादेनालेखि संवत १८३० ॥

विषयः । गृहप्रकरणादिकथनं । कृषिप्रकरणादिकथनं । विवाहादिप्रकरणादिकथनं ।

No. 222. मुहूर्त्तमुक्तावली । By हरीशाचार्य्य । Substance, country-made paper, 10×3 inches. Folia, 10. Lines, 16 on a page. Extent, 120 ślokas. Character, Nāgara. Date, Saṃvat 1735. Place of deposit, Benares City, late Babu Hariścandra. Appearance, old. Verse. Correct

Beginning. श्रीगणेशाय नमः .

श्रीशं श्रीहरिशारदां गणपतिं ब्रह्मेन्दुनाकौ (...) कं ।
श्रीसूर्य्यप्रमुखान् ग्रहान् ऋषिगणान् भक्त्यानमः (...) तान् ।
नानाग्रन्थसमस्तसारमखिलं व्यालोक्य सम्यक्धिया ।
चक्रेऽहं शिशुबोधनाय वरदां मुहूर्त्तमुक्तावलीम् ॥

End. पूर्वाजयातिथिगुरुस्तगुवासरेषु व्यारामपादपलतौषधिरोपणञ्च ॥

Colophon. इति श्रीहरीशाचार्य्यविरचिता मुहूर्त्तमुक्तावली समाप्ता । सम्वत् १७२५ ।

विषयः । शुभाशुभसूचकसमयनिर्णयः ।

No. 223. मृत्तिकास्नानप्रयोगः । By अनङ्ग । Substance, country-made paper, 12×5 inches. Folia, 4. Lines, 16 on a page. Extent, 72 ślokas. Character, Nāgara. Date, Saṁvat 1845. Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, new. Prose. Incorrect.

Beginning. श्रावण्यां पौर्णमास्यां आचार्य्य शिष्यैः सह महानद्यादौ विधिवत् स्नात्वाचम्य प्राणानायम्य देशकालौ संकीर्त्य उत्सर्जनं उपाकर्माङ्गभूतं शिष्यैःसह सर्व्वं प्रायश्चित्तं करिष्ये इति संकल्प्य तदादौ भस्मस्नानं करिष्ये ।

End. अष्टशतगायत्रीजपाद्ब्रह्मणः पूतो भवति सहस्रगायत्रीजपाद्ब्रह्महत्या-गोवधगुरुतल्पगमनसुरापानसुवर्णस्तेयानामन्येषां च पापानां प्रणाशयतीति-विज्ञायते छित्वा देवं नारायणं प्रविशतीत्याह भगवान् बोधायनः ।

Colophon. इति बौधायनसूत्रोक्तमृत्तिकास्नानप्रयोगः । संवत् १८४५ कार्त्तिक वदि-तृतीया शनैश्चरवारे समाप्तः । वसुधान्वसम्वत्सरे सहितेकर अनङ्गेन लिखितम् ।

विषयः बौधायनोक्तोपाकर्माङ्गभूतमृत्तिकास्नानविधानम् .

No. 224. ब्रह्मप्रकाशिका (मेघदूतटीका) । By नरहरि । Substance, palm leaf, 14×1½ inches. Folia, 105. Lines, 4 on a page. Extent, 1680 ślokas. Character, Uriá. Date ? Place of deposit, Gopīnāthapur, Pargana Rahan, District Puri, Paṇḍit Nilkaṇṭha Miśra. Appearance, tolerable. Prose. Generally correct.

Beginning. नमो नीलाम्बरोत्सङ्गवासिने चञ्चलात्मते ।
नीलाद्रिचरमेधाय चतुर्वर्गाम्बुवासिने ॥

इह खलु सर्व्वानेव जीवान् संसारसागरतलोपप्लुतानवेच्य तन्मध्यवर्त्तिसकल-पुरुषार्थसाधकनीलाद्रिभुवमारोपयितुं कविर्मेघदूताख्यं काव्यं प्रणिनाय । मेघवाक्यं श्रुत्वा गुण्डिचार्थं सर्व्वेषां विश्वजनानामागमनात् दूतइव दूतो मेघो-ऽस्मिन्निति ग्रन्थनाम न तु मेघो यस्य दूतो भवितुमर्हति, शापे दातव्ये वर्षभोग्यत्वे कोहेतुः को वा तस्यापराधः कथञ्च ग्रन्थनिबन्धः तद्वर्णने वा किं प्रयोजनं मूलञ्च नास्ति तस्मात् तत्सर्व्वमयुक्ततरं श्रीजगन्नाथोपवर्ण-नमतीवपुरुषार्थः श्रोतृश्रावकयोः तत्र जगन्नाथप्रतिमैव विष्णुः नीलाद्रिरेव वैकुण्ठस्थानं दर्शयति कश्चिदिति । कश्चित् अनिर्व्वचनीयः "सुखशीर्षजलेषु कं" इति तन्त्रान्तरं । "कं सुखं त्रिषु द्रव्ये पापं पुण्यं सुखादि च" इति पुंस्त्वं कः सुखस्वरूपः चित् ज्ञानस्वरूप इति वा कान्तः इष्टः अविर्नीलाद्रिर्यस्य "अवयः शैलमेषार्का" इत्यमरः इर्लक्ष्मीः तस्याः अच्चिणी यस्मिन् स यत्तः अत्यन्तकमनीयत्वेन त्रियस्तद्दर्शने नित्यं स्पृहा "इर्विषादेऽनुकम्पायां लक्ष्म्याञ्च पुनरव्ययं" इति नानार्थकोषः स श्रीकृष्णः अहशब्दस्तु पूजार्थोपीति केचिदिति वर्द्धमानः । इत्यादि ।

End. तां सरस्वतीं किम्भूतां × × × तस्यां ब्रह्मादीनामिति तां कथां विद्युतः-कम्पइव स्तनितं नयनं यस्याःसा ॥

Colophon. इति श्रीमहामहोपाध्यायनरहरिकृतमेघदूतटीकायां ब्रह्मप्रकाशिकाया-मुत्तरपञ्चाशिकाव्याख्यानम् ।

विषयः । इति जगन्नाथस्तुतिरेव अस्य काव्यस्याभिमतोर्थ इति ।

No. 225. बोधवती (मेघदूतटीका) By वृहस्पतिः । Substance, country-made paper, 20×4 inches. Folia, 39. Lines, 9 on a page. Extent, 2200 ślokas. Character, Bengali. Date ? Place of deposit, Elangā *via* Tangail, Babu Nilakamala Bhaṭṭācāryya, zemindar. Appearance, old. Prose. Generally correct.

Beginning. ॐनमो गणेशाय ।

कश्चिदित्यादि । कश्चिद् यक्षो देवयोनिः रामगिर्य्याश्रमेषु वासञ्चक्रे इति ।

दः कामो ऽत्ययो यस्य इति यत्तः पृषोदरादिः इत्युक्त्या कामीति प्रतिपादितं इत्यादि ॥

End. एवं यथा मम साम्प्रतं कान्तया वियोगस्तथा विद्युता कलत्रेण सह तव क्षणमपि क्षणमात्रमपि वियोगो विश्लेषो माभूत् न भविष्यति सौहार्द्दादिति। सुहृद्भावे हायनान्तयुवादिभ्योऽण् हृद्भावेत्युभयपदवृद्धिः। अनुक्रोशवृत्तोति। अनुक्रोशोऽस्यास्तीति अर्शाद्यच्। "विधुरं तु प्रविश्लेषे विधुरो-विकलेऽन्यवत्" इति विश्वः। "कृपादयानुकंपास्यादनुक्रोशोप्यथोहम" इत्यमरः।

काव्यलिङ्गमलङ्कारः। ११५।

काव्यप्रकाशविषयार्थविवेकदक्षाम्।

यःपञ्चिकाहृतपुञ्जितमञ्जुपत्ताम्।

सोऽयं बृहस्पतिकविः कविवृन्दसंख्यो

टीकामिमां व्यभित बोधवतीत्यभिख्यां।

Colophon. इति श्रीमन्नैमापनीयकविचक्रवर्त्तिराज्यधराचार्य्यश्रीबृहस्पतिविरचिता मेघदूतटीका बोधवती समाप्ता।

विषयः। कालिदासकृतमेघदूतस्य व्याख्यानं ॥

No. 226. यूपविधिविवेकः By कृष्णरामसार्व्वभौम। Substance, country-made paper, 18×4 inches. Folia, 3. Lines, 6 on a page. Extent, 100 ślokas. Character, Bengali. Date ? Place of deposit, Binnāpher grām, post Sākrāil via Tāngāil. Paṇḍita Kṛṣṇanātha Nyāyaratna. Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीहरिः।

नत्वा श्रीमद्धनूमन्तमकुण्ठाखण्डविक्रमम्।

श्रीकृष्णरामस्तनुते यूपानां विधिमुत्तमम् ॥

तत्रस्मृतिः। चतुरस्रो भवेद्यूपो यज्ञकाष्ठसमुद्भवः।

वर्त्तुलः शोभनः स्थूलः कर्त्तव्यो हयमौलिकः ॥ इत्यादि।

End. अत्र च "वारणा वै यज्ञा वरुव" इति श्रुतेर्वरणोऽपि यज्ञीयः। स्मृतेरपि वादिरं वारणं वाटवोडुम्बरविकङ्कतं।

विल्वं पलाशं चूतञ्च यूपं कुर्य्याद् यथेप्सितम्॥

Colophon. इति भट्टाचार्य्यसार्व्वभौमश्रीकृष्णरामशर्म्मविरचितयूपविधिविवेकः समाप्तः। श्रीदुर्गा ॥

विषयः। यज्ञीययूपकरणविधिकथनम् ॥

No. 227. योगावली। Substance, country-made paper, 14×3 inches. Folia, 12. Lines, 7 on a page. Extent, 280 ślokas. Character, Bengali. Date ? Place of deposit, Śivapur *via* Tāngāil, Paṇḍita Bhavānīnātha Bhaṭṭācaryya. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐनमो गणेशाय।

ॐसिद्धिः। पिङ्गलायोगिनीकथितं निर्गुण्डीमूलचूर्णं अष्टपलं गृहीत्वा षोड़शपलमधु मिश्रीकृत्य घृतभाण्डे कृत्वा शरावेण निवितं लेपनं दत्वा मासमेकं धान्यराशौ स्थापयेत्। तन्मासमेकं भक्षितमात्रेण नवः कनकवर्णो गृध्रशृगालदृष्टिः सर्व्वरोगविवर्ज्जितः बलीपलितहीनः; संवत्सरं खादिते चन्द्रार्कं यावज्जीवति वज्रशुक्रो भवति। स्त्रीशतं कामयितुं क्षमः। किन्तु योजनान्तरे तासां परिहारः। शाकाम्लं परित्यज्य यथेच्छया भोजनीयं तत्र चूर्णं गोमूत्रेण सह यः पिवति हन्त्याष्टादशकुष्ठानि ॥ इत्यादि ॥

End. माहिषं नवनीतञ्च स्थूलीकरणमुत्तमम्।
कुर्य्यादादौ मृदुस्वेदं मर्द्दनञ्च प्रयत्नतः ॥

Colophon. इति योगावली समाप्ता ॥
ग्रन्थमेतं समालोक्य यो न कुर्य्यात् प्रयत्नतः।
निष्फलं जीवनं तस्य अजागलस्तनं यथा ॥

विषयः। कतिपयरोगाणामौषधकथनं। तत्र निम्बकल्प, प्रथमकल्प ईश्वरभाषित हस्तिकर्णकल्प, ब्रह्मवृक्षकल्प, देवदानीकल्प, पटपलिकल्प, त्रिफलाकल्प, ईश्वरभाषितमुसलीकल्प, शाल्मलीकल्प, बोधिसत्वगुटिका, भृङ्गराजकल्पैर्विभक्तोयं ग्रन्थः।

No. 228. रत्नसारः By मुरारि। Substance, palm-leaf, 12×1 inches. Folia, 102. Lines, 4 on a page. Extent, 2000 ślokas. Character, Uria. Date ? Place of deposit, Purī, Uriā Maṭha, Mohānta Mahārāja Śrī Adhikārī Rāmakṛṣṇa. Appearance, old. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।

प्रणम्य श्रीरमानाथं वर्द्धमानसुधाम्बुधेः ।
बालकण्ठालङ्कृतये रत्नसारं समुद्धरे ॥

सिद्धोवर्णसमाम्नायः सूत्रं । प्रसिद्धःवर्णानामकारादीना समाम्नायः पाठक्रमो वेदितव्यः । इत्यादि ।

End. नत्वेकवचनं म च त्वं पचथः त्वयाहं पचावः म च त्वयाहञ्च पचामः ।

Colophon. इति श्रीरत्नसारे समासः समाप्तः ।

हरिद्राख्यावनीनाथसुतपाठाय निर्म्मितः ।
ग्रन्थोऽयं रत्नसाराख्यः श्रीवियेण मुरारिणा ।
असाधुवर्त्मे त्मलदुत्मुकानि निक्षिप्य सन्तः श्रमभ्रमविज्ञाः ।
ग्रन्थे मुरारिद्विजनिर्म्मितेऽस्मिन् दोषं गुणं वा परिशीलयन्तु ॥
वर्द्धमानात्समुद्धृत्य बालानां प्रीतिसम्पदे ।
यन्मया लिखितं किञ्चिद् विद्वांसः शोधयन्तु तत् ॥
लिङ्गधातुनिपातानामर्थान् कार्त्स्न्येन भाषितुम् ।
को हि नाम समर्थः स्याद् दिङ्मात्रन्तु प्रदर्शितम् ॥

विषयः । सन्धिप्रभृत्यात्मकं व्याकरणमिदम् ।

No. 229. रत्नावली By गौरमोहनभट्ट । Substance, country-made paper, 14 × 3 inches. Folia, 30 Lines, 6 on a page. Extent, 750 slokas. Character, Bengali. Date ? Place of deposit, zilla Midnapur, post Gaḍvetâ, grāma Media, Babu Pārvati Caraṇa Bhaṭṭācāryya. Appearance, tolerable. Verse. Correct.

Beginning. श्रीश्रीहरिः ।

लिङ्गादयो विभक्त्यर्थो लिङ्गाद्यर्थो विभक्तयः ।
मतद्वयं फलैकत्वात् सिद्धमन्यैर्विदाम्वरैः ॥
क्वणः श्रीज्ञानमित्यादौ विभक्तिर्लिङ्गबोधिका ।
एकःद्वौ वहवः संख्या प्रकृत्यर्थो विभक्तयः ॥
क्रोषः खारी चाढ़कश्च तेषु ता मानबोधिकाः ।
गव्या नियतलिङ्गाश्च पाकः प्रकृति × × × ॥ इत्यादि ।

End. कतेःकतिपयात् यस् स्यात् कतिथः पुरुषोयथा ।
संख्याशब्दादवयवे तयटायट्च युज्यते ।
यथा द्वाऽवयवौ यस्य द्वितयचितयं तथा ।
टित्वादौ चितयी ज्ञेया इयं चयमुदाहृतं ।
तथा शेषा निपात्यास्ते यथागममुदाहृताः ॥

Colophon. इति रत्नावल्यां तद्धितप्रक्रिया समाप्ता ।

विषयः । संक्षिप्तसारात् समाकृष्य सारं संक्षिप्तं पद्यात्मकमिदं व्याकरणं। तत्र सन्धयच कारकसमासतद्धितपादाः ॥

No. 230. रत्नावली । Substance, country-made paper, 14×4 inches. Folia, 150. Lines, 9 on a page. Extent, 6000 slokas. Character, Bengalī. Date ? Place of deposit, Santoṣ *via* Tangail, Babu Bhuvana Candra Sena, Kavirāja. Appearance, fresh. Prose and verse. Generally correct.

Beginning. अथ ज्वरचिकित्सा ।
नागरं देवकाष्ठञ्च धन्याकं हहतीद्वयं ।
दद्यात् पाचनकं पूर्व्वं ज्वरितानां ज्वरापहं ॥
नागरादिसर्व्वजेषु ।
शतावरीगुड़ूचीभ्यां स्वरसोयन्त्रपीड़ितं ।
गुड़प्रगाढ़ः शमयेत् सद्योऽनिलकृतं ज्वरं ॥
विल्वादिपञ्चमूलस्य क्वाथः स्याद्वातिकज्वरे ॥

End. आयुःकामो नवस्त्रीभिः संयोगं गन्तुमर्हति ॥
स्नानानुलेपनहिमानिलखण्डकाम्बु
शीताम्बुदुग्धरसमूषसुराप्रपन्नाः ।
सेवेत चानुशमनं विरतौ रतस्य
तस्यैवमाशु वपुषः पुनरेति कामः ॥

Colophon. इति रत्नावल्यां वशीकरणाद्यधिकारगुम्फनं ॥ समाप्तोयं ग्रन्थः ॥

विषयः । इति रत्नावल्यां ज्वराधिकारगुम्फनं । इति ज्वरातिसारगुम्फनं । इति अतीसारचिकित्सागुम्फनं । इति ग्रहणीसङ्ग्रहग्रहण्यधिकारगुम्फनं । इति अर्शोऽधिकारगुम्फनं । इति-अग्निमान्द्याजीर्णाद्यधिकारगुम्फनं । इति क्रिमिचिकित्सागुम्फनं । इति पाण्डुकामलाहलीम

काधिकारगुम्फनं। इति रक्तपित्ताधिकारगुम्फनं । इति राजयक्ष्माधिकारगुम्फनं । इति कासाधिकारगुम्फनं । इति हिक्काश्वासाधिकारगुम्फनं । इति स्वरभेदाधिकारगुम्फनं । इति तृष्णाधिकारगुम्फनं । इति मूर्च्छाधिकारगुम्फनं । मदात्य × परमदपानाजीर्णपानविभ्रमाधिकारगुम्फनं । इति दाहाधिकारगुम्फनं । इति उन्मादाधिकारगुम्फनं । इति अपस्माराधिकारगुम्फनं । इति वातरोगाधिकारगुम्फनं । इति वातरक्ताधिकारगुम्फनं । इति उरुस्तम्भाधिकारगुम्फनं । इति आमवाताधिकारगुम्फनं । इति शूलाधिकारगुम्फनं। इति उदावर्त्तगुल्म-हृद्रोग उदरोग्रह-मूत्रकृच्छ्र-मूत्राघात- मूत्रातिसार अश्मरी- प्रमेह- स्थौल्य-दौर्गन्ध्य- पाणिपादस्वेदश्लीहयकृत्- शोथ-मुष्कहृद्विव्रध- गलगण्ड - गण्डमाला- ग्रन्थ्यर्ब्बुदापची- श्लीपद- विद्रधी- व्रणशोथ- शारीरागण्डुवणाद्यधिकारगुम्फनं। इति भग्नाधिकार-समाप्तः। इति-भगन्दर, नाडीव्रण, उपदंश शूकदोष, कुष्ठ, शीतपित्त, अम्लपित्त, विसर्प, स्नायुरोग, मसूरिका, क्षुद्ररोग, मुखरोग. कर्णरोग, नासारोग, नेत्ररोग, शिरोरोग, असृग्दर, सोमरोग, स्त्रीरोगाद्यधिकारगुम्फनं। अथ बालाधिकारः । इति बालरोगाधिकारगुम्फनं । इति विषाधिकारगुम्फनं । इति रसायनाधिकारगुम्फनं । इति दृष्याधिकारगुम्फनं । इति ध्वजभङ्गाधिकारगुम्फनं । इति एतावन्त्यां वशीकरणाद्यधिकारगुम्फनं ॥ इति ॥

No. 231. रमलनवरत्नम् By परमसुखोपाध्यायः। Substance, country-made paper, 13×6 inches. Folia, 27. Lines, 15 on a page. Extent, 1250 slokas. Character, Nāgara. Date, Samvat 1875. Place of deposit, District Chāpra, P. O. Gopālganj, Harapurā, Jagadeo Paṇḍita. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ॥

लम्बोदरं विघ्नविनाशनश्च नत्वा भवानीतनयं गजास्यम् ।
यस्य प्रसादेन सुराः समस्तास्तिष्ठन्ति स्वे स्वे च पदे सदैव ॥
नत्वा श्रीरमलाचार्य्यान् परमाद्यसुखाभिधैः ।
उद्धृतं रमलाम्भोधेः नवरत्नं सुशोभनं ॥ इत्यादि ।

End. अन्नादीनां समर्घ्यस्याज्जनानां द्रव्यलाभकृत् ।
भूमिकम्पो भवेच्चापि काष्ठकानाश्च दद्भिकृत् ॥
फलं वायव्यदिग्भागे विशेषेण प्रजायते ।
यद्यच्च कुकृतं वाक्याद्धिकं यच्च कुत्रचित ।
रागमुत्सृज्य तत् सर्व्वं निर्मलं कुरु सादरात् ।

Colophon. इति श्रीसनाद्यकुलावतंसपरमसुखोपाध्यायकृते रमलनवरत्ने वर्षफलं नाम नवमं रत्नं समाप्तं ॥ संवत १८७५ ।

विषयः । १ रत्ने संज्ञादिकथनं । २ बलाबलविचारकथनं । ३ प्रश्नोपकरणकथनं । ४ प्रश्नादिकथनं । ५ प्रश्नावध्यादिकथनं । ६ मुष्टिप्रश्नकथनं । ७ मूकप्रश्नकथनं । ८ चौरादि-नामकथनं । ९ वर्षफलकथनं ॥

No. 232. रवीन्द्वोर्ग्रहणोपायः। By रामचन्द्रशर्म्मा। Substance, country-made paper, 15 × 3 inches. Folia, 4. Lines, 10 on a page. Extent, 120 ślokas. Character, Bengalī. Date ? Place of deposit, zilla Medinipur, post Gaḍvetā, grāma Khunverā, Babu Vaikuṇṭhanātha Cakravartī. Appearance, old. Prose and verse. Correct.

Beginning. श्रीरामः ।

श्रीरामचन्द्रशर्म्मेमं वक्ति पण्डिततुष्टये ।
रवीन्द्वोर्ग्रहणोपायं सुगमं सुपरिस्फुटं ॥
स्वाङ्काल्पा भुजभागाः स्युस्तद्दूर्द्धाः खघ्नतिच्युताः ।
तद्दूर्द्धाः + खघ्नत्यूनाः खभोद्धास्वकृतस्युताः ॥ इत्यादि ॥

End. एवमानीतत्रासक्रमात् पूर्व्वं लिखेत् स्थित्यर्द्दग्रहणान्तेन पूर्व्ववत् स्पर्शादि-कालनिर्णयः । सूर्य्या × × न्यूनत्रासः कदाचिदपि न दृश्यो मध्याह्ने चा-ष्टमांशन्यूनोपि प्रायेणादृश्य इति निष्कर्षः ।

Colophon. इति श्रीरामचन्द्रभट्टाचार्य्यविरचितो रवीन्द्वोर्ग्रहणोपायः समाप्तः ।

विषयः । चन्द्रसूर्य्यग्रहणगणना ।

No. 233. रसकल्पद्रुमः। By जगन्नाथमिश्र। Substance, palm-leaf 16 × 1 inches. Folia, 189. Lines, 5 on a page. Extent, 5800 ślokas. Character, Uriā. Date ? Place of deposit, zilla Puri, parganā Rāhān, grāma Jagannātha Vidyādharapura, Paṇḍita Rāmacandra Miśra. Appearance, old. Prose and verse. Generally correct.

Beginning. श्रीगणेशायनमः ।

वामे कोदण्डदण्डं भुजगसमभुजे दक्षिणे चण्डकाण्डम्
स्कन्धे तूणीरवन्धं सुपटकटितटे स्वर्णपूर्णाह्वियस्मि
मौलौ कोटीररत्नं खचितमणिगणं नू[त्न]रत्नं दधानम्
युद्धे वद्धावधानं रघुकुलतिलकं नौम्यहं प्रत्यहं तम् ॥
गुरूपदेशाद् विज्ञातं श्रुतं यत्किञ्चिदेव च ।
संप्रदायमुखेनेदं सुखेन प्रोच्यते मया ॥
ग्रन्थादौ मङ्गलं कृत्वा नम्यते तत्प्रवर्त्तकः ।
कीर्त्तिकामेन कविना कीर्त्त्यते स्वस्य नाम च ॥
आत्मापकर्षो विनयस्तथैवेहापि वर्ण्यते ।
साधूनां स्तवनं निन्दा खलानामपि वर्ण्यते ॥ इति संप्रदायः ।
तत्र ग्रन्थप्र[व]र्त्तकनमस्कारो यथा
मुनिं प्रणम्य भरतं जगन्नाथेन धीमता ।
क्रियते रसिकप्रीत्यै रसकल्पद्रुमोऽधुना ॥
कल्पद्रुमत्वकथनं यथा ।
विभावाद्यैर्दलैरेभिः पञ्चभिः पल्लवः स्मृतः । (?)
सर्व्वेष्वपि रसेष्वेव कल्पद्रुत्वं प्रकल्प्यते ॥ इत्यादि ।

End. सायं दीपविधिं वितन्वति शिशौ मन्दं हसन्त्या तया
किञ्चित् किञ्चिदपाङ्गभङ्गकुटिला दृष्टिः समारोपिता ॥

Colophon. इति हास्यरसशाखायां सञ्चारिनिरूपणं नाम तृतीयदलः ।

(अतः परं खण्डितं)

विषयः । इति जगन्नाथमिश्रविरचिते रसकल्पद्रुमे रौद्ररसशाखायां विभावनिरूपणं नाम प्रथमदलः । इति वीररसशाखायां अनुभावनिरूपणं नाम द्वितीयदलः । इति रौद्ररसशाखायां रौद्रनिरूपणं नाम पञ्चमदलमिति पञ्चमः पल्लवः । इति करुणरसशाखायां अनुभावनिरूपणं नाम द्वितीयदलः । इति करुणरसशाखायां सात्त्विकनिरूपणं नाम चतुर्थदलः । इति शृङ्गाररसशाखायां भावनिरूपणं नाम प्रथमदलः । इति शृङ्गाररसशाखायां अनुभावनिरूपणं नाम द्वितीयदलः । इत्यादि । रसनिरूपणमुखेन रसानामनुभावादिनिरूपणमितिसिद्धान्तः ।

No. 234. रसरत्नाकरः। By नित्यनाथसिद्धः। Substance, country-made paper, 11 × 4½ inches. Folia, 26. Lines, 10 on a page. Character, Nāgarī. Date ? Place of deposit, Śisoyā, district Chāprā, Paṇḍita Rāmanātha Miśra. Appearance, old. Verse. Generally correct.

Beginning. सिद्धिः श्रीगणेशाय नमः।

अथ स्थावरविषनिवारणं।

पुत्रजीवफलान् (प्रज्ञां) शीततोयेन पेषयेत्।

तामेव चाञ्जने पाने लेपे सर्व्वविषापहः। इत्यादि

End. भोजनान्ते सदाखादेद्वृद्धणीश्वासकासजित्।

यदुक्तं तज्जयन्त्याशु वटी ज्वालाप्रभावती॥

Colophon. इति श्रीपार्व्वतीयपुत्रनित्यनाथसिद्धविरचिते रसरत्नाकरे अर्शादिनिवारणोनाम सप्तमोपदेशः॥

विषयः। १ उपदेशे स्थावरविषशल्यनिवारणरसशोधनमारणादिकथनम्॥ २ स्वर्णलौहादिशोधनमारणकथनं। ३ ज्वरादिपाण्डुरोगनिवारणकथनं। ४ रसादिनिरूपणं। ५ गुल्मशूलादिनिवारणं। ६ भगन्दरादिनिवारणं। ७ उपदेशे अर्शादिनिवारणं।

No. 235. रसाब्धिः (वल्लभमतानुगः) कीटदष्टः। Substance, country-made paper, 12 × 5 inches. Folia, 89. Lines, 7 on a page. Extent, 1246 ślokas. Character, Nāgarī. Date ? Place of deposit, Benares City. Late Hariś Candra Babu. Appearance, very old. Verse. Correct.

Beginning. श्रीगोपीजनवल्लभाय नमः.

नौमि श्रीकृष्णदेवं नमतिमतिमतो (.) ल्पसंकल्पजल्पाद्व्याप्त (...) प्रलयघनक्ष (...) वर्षात्मघोनः (इतः अतीवास्पष्टलात् कीटदष्टत्वाच्चापठनीयं.

End. वंशे श्रीवल्लभस्य स्वयमखिलजनानुद्धरिष्यन् कृपातो-

य (...) विभूय लोके जयति स विदितो विट्ठलेशाख्यकृष्णः।

जानक्यागर्भे(...)स्मिन् जनिजनिरतोरघुनाथेनेचिचं
किम्बाहद्यादितर्कैः कथयत सुधियः सम्भवत्यच इष्ट ॥

Colophon. [श्री][श्री]वल्लभदीक्षितादजनि यः श्रीविट्ठलस्सुता[त्]
जातः श्रीरघुनाथतः सुकृतिनः श्रीदेवकीनन्दनः ।
तेनाकारि रसाब्धिसप्तकमिदं काव्यं नरत्नायितं ॥
तत्रायं च चवर्द्दश (रतोनास्ति .

विषयः । महाकाव्यम् .

No. 236. रामरत्नाकरटीका । By महामुद्गल । Substance, country-made paper, 10 × 3 inches. Folia, 88. Lines, 11 on a page. Extent, 1000 slokas. Character, Nāgarī. Date 1773 Saṃvat. Place of deposit, Bibihāṭī, Benares City, Paṇḍita Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीविट्ठलाय नमः . श्रीमच्छंकराचार्य्यगुरुभ्यो नमः .
सत्यं विज्ञानमानन्दमसङ्गं (...) वर्जितम् ।
अनादिमम्बुदश्यामं श्रीरामं भावयाम्यहम् ॥
व्यासशंकरपर्य्यायमहाकृष्णपदोदितम् ।
(...) अज्ञान विनाशाय (...) एनं समाश्रये ॥

End. अखण्डैकरसः सिद्धोयम्महामुद्गलाभिधः ।
तस्मात् रामोऽहमित्युक्ता भावना नास्ति (...) गता ।
समूला ज्ञाननाशाय मम (...) पतिसुन्दरी ।
ब्रह्माहमस्मीह नित्यं सच्चिदानन्दविग्रहः ॥

Colophon. इति श्रीरामरत्नाकरटीकायां महामुद्गलकृतायां (...) उल्लेदः । समाप्तश्चायं ग्रन्थः ।

विषयः । रामरत्नाकरव्याख्या .

No. 237. रामसारसंग्रहः । Substance, country-made paper, 13 × 5½ inches. Folia, 22. Lines, 7 on a page. Extent, 320 ślokas. Character, Nāgarā. Date ? Place of deposit, Purī, Śaṅkara Māṭha. Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीमते रामानुजाय नमः ।

ऐश्वर्य्यमानं पुरुषं भजेत् । इति सामवेदे ।

ॐ प्रकाशो रामचन्द्रस्य परं ब्रह्म प्रकाशितं ।

भास्करस्य यथा धर्म्मश्चन्द्रस्य चन्द्रिकोज्ज्वलं ॥

रामस्यातिप्रियं नाम आदिमूलं सनातनं ।

सहस्रनामसह × विष्णोर्नारायणस्य च ॥

निर्गुणं सगुणश्चैव परमात्मा तथैव च ।

एते चांशा हि रामस्य पूर्व्वं चान्ते च मध्यमः । इत्यादि ।

End. आदिकाव्यमिदं राम त्वयि सर्व्वं प्रतिष्ठितं ।

न × नोऽइतिकाव्यानां यशोभाग्याद्यवाहते ॥ (?)

Colophon. इति श्रीरामसारसंग्रहः सम्पूर्णः ॥ श्रीरामचन्द्रार्पणमस्तु

श्रीरस्तु । यदक्षरं पदं भ्रष्टं मात्राहीनं च यद्भवेत् ।

तत् सर्व्वं क्षमतां देव प्रसीद परमेश्वर ॥

श्रीराम ।

विषयः । श्रीरामचन्द्रस्य परब्रह्मत्वज्ञापककतिपयप्रमापकवचनसङ्ग्रहः ।

No. 238. रामाद्धारः । Substance, country-made paper, 12 × 5 inches. Folia, 224. Lines, 10 on a page. Extent, 4,800 ślokas. Character, Nāgara. Date, 1874 Saṃvat. Place of deposit, Benares, Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. नमस्त्रैलोक्यनिर्माणत्रासंसंहृतिकर्मणे ।

चित्सदानन्दरूपाय विष्णवे परमात्मने ॥ १ ॥

श्रपत्नत्वं नमस्कृत्य धूर्त्तस्वामिप्रसादतः

तद्भाष्यवृत्तिः क्रियते यथाशक्ति निरूपिता ॥ २ ॥

न व्यवस्थाप्यते वस्तु स्वबुद्धिस्तु नियम्यते
को वा समर्थो वेदार्थनिर्णयेत्यन्तगह्वरे ॥ ३ ॥

End. नित्यकर्त्तव्येषु दर्शपूर्णमासादिषु पक्ते कामोपदेशोपि कामनादुक्ता मुमुक्षोः श्रोत्रियस्य चाकामहतस्य इति मुमुक्षोः श्रवणात् । अष्टमः पटलः ।

Colophon. इति श्रीकौशिकेन रामेणाग्निचिता कृतायां धूर्त्तस्वामिभाष्यवृत्तौ षष्ठः प्रश्नः । सम्वत् १८७४ ॥

विषयः । दर्शपौर्णमासादिहविर्यज्ञसूत्रभाष्यवृत्तिः ॥

No. 239. रामाण्डारे दशम-द्वादश-त्रयोदश-चतुर्दश-प्रश्नाः । Substance, country-made paper, 12×5 inches. Folia, 223. Lines, 9 on a page. Extent, 4014 slokas. Character, Nāgara. Date, 1773 Saṃvat. Place of deposit, Benares City, Paṇḍita Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. आदौ तावत् परिभाषायां एकविंशतिर्यज्ञाः व्याख्येयतराः प्रतिज्ञाताः तेषु पाकयज्ञाः सप्त गृह्ये व्याख्याताः शेषेषु हविर्यज्ञाः सप्तकर्माणि अथातो-दर्शपूर्णमासौ ।

End. अचेष्ट्यानन्तरमेवाग्निहोत्रारम्भार्थमवश्यं सायमग्निहोत्रं इति वक्तव्यं संतिष्ठत इति अस्य न्यायप्राप्तानुवादत्वात् तन्निर्देशक्रमो विवक्षित इति ।

Colophon. समाप्तः प्रश्नः संवत् १७७३ ।

विषयः । सोमसूत्रभाष्यवृत्तिः ।

No. 240. रामाण्डारे सप्तमाष्टमप्रश्नाः । Substance, country-made paper, 10×5 inches. Folia, 137. Lines, 10 on a page. Extent, 2740 slokas. Character, Nāgara. Date ? Place of deposit, Benares, Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. पशुर्वध्यते यज्ञार्थं यस्मिन् कर्मणि पशुबन्धः तेनेष्टवान् पशुबन्धयाजी स सर्वान् लोकान् अभिजयति नास्य लोकेषु प्राप्तेः प्रतिघातो भवति इत्यादि ।

End. अन्यदैन्द्रदेववत् वायोर्निर्गुणस्यापि सगुण एव वायोरनुवाक्ये यस्मान्निर्गुण-स्यापि वायव्यस्य श्वेतवत्यः परिपठिताः ।

Colophon. समाप्तं चातुर्मास्यहौत्रम् ।

विषयः । पशुबन्धचातुर्मास्यसूत्रभाष्यवृत्तिः ।

No. 241. रामाण्डारभाष्यम् । Substance, country-made paper, 14×6 inches. Folia, 140. Lines, 10 on a page. Extent, 3,080 ślokas. Character, Nāgara. Date, 1844 Saṃvat. Place of deposit, Benares, Gobinda Bhaṭṭa. Appearance, old. Prose. Incorrect.

Beginning. ॐ श्रीगणेशाय नमः .

आदौ तावत् परिभाषायामेकविंशतिर्यज्ञा व्याख्येयतया प्रतिज्ञाताः [प्रति]ज्ञातेषु पाकयज्ञाः सप्त गृह्ये व्याख्याताः शेषेषु हविर्यज्ञाः सप्त कर्माणि, अथातो दर्शपूर्णमासौ व्याख्यास्याम इत्यारभ्य यथान्वारम्भणीयेत्येवमन्ते स्वोक्तानि दर्शपूर्णमासादीनि, पिण्डपितृयज्ञाधानाग्निहोत्राग्रयणपशुबन्ध-न्चात्तर्मास्यानीत्यादीनि अकरणे प्रत्यवायाः भवन्ति ।

End. केचित् प्रथमाधाने निशायामतीतायां सना । तस्माल्लिङ्गात् अग्निहोत्रमारब्धव्यमिति वदन्ति । अन्ये तु होमकाले अग्न्यसम्पत्तेरनधिकारात् वचनाभावाच्चापरेद्युः सोमे वारब्धव्यमिति । अचेष्ट्यनन्तरमेवाग्निहोत्रारम्भार्थं अवश्यं सायमग्निहोत्रमिति वक्तव्यं संतिष्ठत इत्यस्य न्यायप्राप्तानुवादत्वात् न तन्निर्देशक्रमो विवक्षित इति ।

Colophon. सप्तमः पटलः । समाप्तःप्रश्नः । सोमे रामाण्डारभाष्यम् सम्वत् १८४४ ।

विषयः । आपस्तम्बश्रौतसूत्रभाष्यव्याख्या ।

No. 242. रामायणटीका मुक्ताहारः । Substance, palm-leaf, 14×1½ inches. Folia, 178. Lines, 5 on a page. Extent, 4250 ślokas. Character, Uriā. Date ? Place of deposit, district Purī, pargaṇa Rāhan, grāma Jagannātha, Vidyādharapura, Paṇḍit Rāmacandra Miśra. Appearance, old. Prose and verse. Generally correct.

Beginning. स जयति रघुवंशतिलकः कौशल्याहृदयनन्दनो रामः ।
दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः ॥

कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥
क्वाहं मन्दमतिर्गभीरमधुरं रामायणं तत् क्व च
व्याख्यानेऽस्य परिश्रमन्नयमहो हास्यास्पदं धीमताम् ।
को भारोऽत्र मम स्वयं कुलगुरुः कोदण्डपाणिः कृपा
कूपारो रचयत्यदः सपदि मल्लिकाग्रसिंहासनम् ॥
एवं पूर्व्वस्मिन् काण्डे दीनसंरक्षणरूपो धर्म्मोऽनुष्ठितः
अथ किष्किन्ध्याकाण्डे मित्रसंरक्षणधर्म्मो ऽनुष्ठाप्यते ॥ इत्यादि ॥

End. ते वयं कपिराजस्य सर्व्वे वचन कारिणः ।
कर्त्तां × × × मुपारब्धे
क्रुद्धे तस्मिंश्च काकुत्स्थे सुग्रीवे च सलक्ष्मणे ।
गतानामपि सर्व्वेषां तत्र नो नास्ति जीवितं ॥

Colophon. इति श्रीमत्किष्किन्ध्याव्याख्याने मुक्ताहारे सप्तपञ्चाशत्सर्गः ।

विषयः । रामायणस्य व्याख्यानम् ॥

No. 243. रामायणटीका पीताम्बरः (अयोध्याकाण्डस्य द्वादशसर्गपर्य्यन्तः) By गोविन्दराजः। Substance, country-made paper, 12×6 inches, Folia, 39. Lines, 24 on a page. Extent, 2300 slokas. Character, Nāgara. Date ? Place of deposit, Purā, Rājgopāl Maṭha, Mohanta Śri Raghunandana Rāmānuja Dāsa. Appearance, tolerable. Prose. Correct.

Beginning. श्रीमते रामानुजाय नमः ।
श्रावं श्रावं शठारेः शमदमवपुषः कृष्णवक्त्रारविन्दा
दालोच्यालोच्य वाचा प्रकृतिमधुरया प्रोच्य विद्वज्जनेभ्यः ।
गोविन्दार्य्यः सुधीशः कुशिककुलमणिर्गूढगाढाशयाद्यं
सम्यक् साकेतकाण्डं सरसजनमुदे सादरं व्याकरोति ।
प्रथमे काण्डे एतस्मिन्नन्तरे विष्णुरित्यादिना यतो वा इमानीत्यादिश्रुति-
प्रतिपादितं जगत्कारणत्वं ... ... प्राप्तजीवस्वरूपमत्र निरूप्यते
इत्यादि ।

इति श्रीकुशिककुलतिलकगोविन्दराजविरचिते श्रीरामायणभूषणे अयोध्याकाण्डव्याख्याने पीताम्बराख्याने प्रथमःसर्गः ।

End. यवीयसी कनिष्ठमहिषी नते वा मध्यमाजातेत्यत्र मध्यमासर्व्वराजपत्न्यपेक्षया देवाभिपन्ना देवाभीष्टा तथा प्रभावं तादृशप्रभावयुक्तं अप्रतिहतप्रभावमित्यर्थः ।

Colophon. इति श्रीपीताम्बरे द्वादशः सर्गः ।

विषयः । रामायणस्य व्याख्यानम् ।

No. 244. रामोत्तरतापनीटीका, सुधा । By भट्टमहासुकुलसूरि । Substance, country-made paper, 1 × 5 inches. Folia, 18. Lines, 20 on a page. Extent, 1080 ślokas. Character, Bengali. Date ? Place of deposit, Rājguru's Maṭha, Ganeśamahalla, Benares City. Appearance, very old. Prose. Correct.

Beginning. ॐ रामाय नमः ।

अन्तर्यामिणमात्मानमक्षतं ब्रह्म निर्मलं ।

यत्साक्षादपरोक्षाच्च तं श्रीरामं भजे (...) सा ।

वृहस्पतिरुवाच : याज्ञवल्क्यमित्याद्याथर्वणरहस्याख्या श्रीरामोत्तरतापनीयोपनिषत् तस्यायमल्पाक्षरव्याख्या प्र(...)यते ।

End. यो विमुक्तमितीति, एतत् चेत्दर्शनेनापि यदा जन्मान्तरिता इति जन्मभिरन्तरिता अनेकजन्मकृता दोषा न स्पृशन्ति, तदा किं वक्तव्यं उपासनायां कृतायामिति . इतिशब्दो ब्रह्मज्ञानोपदेशसमाप्तौ ।

यद्व्याख्यातं मया किञ्चित् स्वीयबोधानुसारतः ।

तं चन्तव्यं बुधैः शुद्धैरेष बद्धोञ्जलिर्मया ॥

Colophon. श्रीमद्वत्सभवद्भट्टमहासुकुलसूरिकृतायां श्रीरामोत्तरतापनीटीकायां सुधाख्यायां चतुर्थकण्डिका समाप्ता ।

विषयः । श्रीरामोत्तर-तापनी-व्याख्या .

No. 245. रुद्रदेवी सोमप्रयोगः। Substance, country-made paper, 13×5 inches. Folia, 148. Lines, 10 on a page. Extent, 3250 slokas. Character, Nāgari. Date ? Place of deposit, Venares, Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. यस्य ज्ञानमनन्तं तद्दानं तस्य चानन्तं। भक्तिर्यस्यानन्ता तमनन्तं गुरुं नौमि॥ आश्वलायनशाखिनो यजमानस्य बौधायनीयेन सोमप्रयोगः तत्राधनिपूर्व्वकसोमेन ऋतुनक्षत्रादिनियमः।

End. अतएव शांखायनेन सोमाङ्गत्वेन उक्तोपि सायमग्निहोत्रे अस्त्येषामनधिकारः॥

Colophon.

विषयः। सोमाध्वर्य्यवः प्रयोगः।

No. 246. रुद्राग्निप्रमाणं। Substance, country-made paper, 20×3 inches. Folia, 5. Lines, 7 on a page. Extent, 110 slokas. Character, Beṅgalī. Date ? Place of deposit, zilla Mymansing, pargaṇa Aṭiyā, post Jāmurki, grām Hālāliya, Paṇḍita Harinātha Vidyāvāgīśa. Appearance, old. Verse. Generally correct.

Beginning. नमो गणेशाय।

अथ रुद्राग्निप्रमाणवचनानि लिख्यन्ते। रुद्राग्निविधौ विशेषमाह लिङ्गक्रियासारयोः।

करोमीति विनिश्चित्य यागमण्डपमारभेत्।

भूमिं कृत्वा तु निःशल्यां मण्डपं रचयेत् सुधीः॥ इत्यादि।

End. भोज्यादिकं यथाशक्त्या विप्रेभ्यः प्रतिपादयेत्।

पिङ्गलामते विशेषमाह।

शिवलिङ्गे रुद्रभूर्त्तौ वासुदेवे × × × × ×

गणेशे सूर्य्यभूर्त्तौ च नृसिंहे वरुणे तथा॥

Colophon. इति लिङ्गक्रियासारे रुद्राग्निप्रमाणम्॥

विषयः। रुद्राग्नियागविधायकप्रमाणसङ्ग्रहः।

No. 247. रुद्राग्निप्रयोगः। Substance, country-made paper, 20×3 inches. Folia, 18. Lines, 6 on a page. Extent, 324 ślokas. Character, Bengali. Date ? Place of deposit, zilla Mayamansing, Parganā Aṭiyā, post Jāmurki, grāma Hālāliā, Paṇḍita Harinātha Vidyāvāgīśa Appearance, old. Prose and verse. Generally correct.

Beginning. नमः शङ्कराय।

अथ रुद्राग्निप्रयोगः। तत्र यागपूर्व्वस्मिन् नवमे सप्तमे पञ्चमे तृतीये सद्यो-वा कर्त्रनुकूले चन्द्रतारान्विते शुभसमये अङ्कुरारोपणं यागमण्डपे × × मण्डपे कुर्य्यात् ॥

तत्र मङ्गलतूर्य्यब्रह्म × × पुरःसरमुदङ्मुखं ब्राह्मणत्रयमुपवेश्य वस्त्रालङ्कार-गन्धमाल्याद्यैः समभ्यर्च्य ॐमद्य मत्कर्त्तव्यहयशीर्षपञ्चरात्रोक्तरुद्राग्निविधिना अचलशिवलिङ्गप्रतिष्ठाप्राक्कर्त्तव्यमङ्गलाङ्कुरारोपणकर्म्मणि ॐ पुण्याहं भवन्तो ब्रुवन्तु इति त्रिः श्रावयेत् इत्यादि ॥

End. ततो दीनादिभ्योऽन्नादिकं दत्वा ब्राह्मणेभ्यो यथाशक्ति भोज्यादिकं दद्यात्।

Colophon. इति हयशीर्षपञ्चरात्रोक्तरुद्राग्निविधिना अचलशिवप्रतिष्ठाप्रयोगः समाप्तः।

No. 248. लघुवार्त्तिकम् By उत्तमश्लोक-यति। Substance, country-made paper, 10×4 inches. Folia, 3. Lines, 16 on a page. Extent, 100 ślokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi Benares City, Paṇḍita Vāmanācārya. Appearance, old. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः।

अथातो ब्रह्मजिज्ञासा जगद्धेतुः सदादि तत्।
वेदहेतुरपि ब्रह्म तद्वेदादेव मीयते ॥
न प्रतीचि ब्रह्मदृष्टिं विधत्त तत्त्वमादिगीः .

End. इत्थं जैमिनिबादरायणकृते तन्त्रद्वये × × ×।
पूर्व्वाचार्य्यवरैः × शब्दनिबद्धैः स्पष्टीकृता विस्तरम् ॥
ते संक्षिप्य यथामतीह सुगमैः शब्दैः प्रकाशीकृताः।
श्रीमद्विश्वपतेर्विशालनयनानाथस्य तुष्ट्यै सदा ॥

Colophon. इति श्रीमत्सुखानन्दमुनिकिङ्करेण उत्तमश्लोकयतिना विरचिते लघुबालिके चतुर्थस्य चतुर्थः ।

विषयः । संक्षिप्तशब्दसूत्रविवरणम् .

No. 249. लघुशब्देन्दुशेखरव्याख्या By भैरव । Substance, country-made paper, 10 x 4 inches. Folia, 203 Lines, 9 on a page. Character, Nāgara. Date ? Place of deposit, Patna City, Saṃskṛta-Sañjivanī, Paṇḍita Jayanārāyaṇa Vājapeyī Appearance, new. Prose. Incorrect.

Beginning. श्रीगणेशाय नमः ।

सीताचर्चितपाद × × युगलं ध्यात्वा द्वितीयं × × ।
× × ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि ।
कुर्वे चन्द्रकलां शिवां शिरसि स्थितां × × × × ×
× × × × × × × ।
शब्देन्दुशेखरस्येयं टीका चन्द्रकलाभिधा
रच्यते भैरवेणाथ × × × × यथा बुधाः ।

End. चर्चितं ।

विषय । लघुशब्देन्दुशेखरस्य व्याख्यानं ।

No. 250. ललितत्रिभङ्गस्तोत्रम् By विठ्ठल । Substance, country-made paper, 10 x 5 inches. Folia, 4. Lines, 11 on a page. Extent, 83 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, late Bābu Hariścandra. Appearance, new. Verse Correct.

Beginning. श्रीगोपीजनवल्लभाय नमः ।

नमः पितृपदाम्भोजरेणुभ्यो यन्निवेदनात् ।
यस्मत्कुलनिष्कलङ्कं श्रीकृष्णात्मसात्कृतं ।

End. अयं मदीय स्तोत्रा महार्घा रचिता परं ।
तेन प्रसन्नो भवतु दासं व्याकुले प्रभुः ।

Colophon. इति श्रीगोस्वामिश्रीमत्विट्ठलनाथविरचितं ललितत्रिभङ्गं समाप्तम् ।

विषयः । श्रीकृष्णस्तुतिः ।

No. 251. ललिताख्यपरिभाषा By पुरुषोत्तम । Substance, palm-leaf, 15 × 1½ inches. Folia, 26. Lines, 6 on a page. Extent, 1240 ślokas. Character, Uria. Date ? Place of deposit, Purī, Bramhacārimaṭha, Paṇḍita Valadeva Bramhacārī. Appearance, old. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।

परिव्याप्तता भाषा परिभाषा सा हि एकदेशस्था सकलशास्त्रमभिज्वलयति यथा वेश्मप्रदीप इति । सैव द्विधा, लिङ्गवती विध्यङ्गशेषभूता च । यत्र शब्द एव लिङ्गमुपादीयते सा लिङ्गवती परिभाषा, यथा इको गुणवृद्धी इति ॥ इत्यादि ।

End. एवमनया दिशा अन्यत्रापि शब्दप्रयोगो यद्देशन्यायवाक्यानि लिङ्गोदाहरणानि अवगन्तव्यानि ।

Colophon. इति वैयाकरणगजपञ्चाननपुरुषोत्तमविरचिता ललिताख्यपरिभाषा समाप्ता ॥

स्वाधीनपति(भर्तृ)काचेष्टा वनविहारादिमदनोत्सवमदाहङ्कारादिमनोरथव्याप्तप्रभृतयः । इदं पुस्तकं रामप्रसादब्रह्मचारिणः ।

ज्येष्ठशुक्लस्य पञ्चम्यां भूपुत्रस्य च वासरे ।
लिखितं परकार्य्यार्थे रामाङ्कब्रह्मचारिणा ॥
हरये नमः ।

विषयः । वैयाकरणपरिभाषादिविवेचनं ।

No. 252. लीलारमणम् By बालकृष्ण । Substance, country-made paper, 13 × 4 inches. Folia, 16. Lines, 8 on a page. Extent, 384 ślokas. Character, Maithil. Date ? Place of deposit, District Chāprā, P. O. Rāmkalā, Bagihi, Paṇḍita Tārādatta Ojhā. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

अव्यक्तमव्ययं सत्यमचिन्त्यं निर्गुणं गुणं ।
आद्यं वदन्ति यं देवं महात्मो जयतीश्वरः ॥
श्रीदेवश्च हरं गुरुं गणपतिं भागीरथीं भास्करं
स्वां देवीमपरां प्रणम्य पितरौ भाहंच मूर्द्धानिशं ।
प्रत्यक्षं [प्र]करोति कौतुककरं हारं जनानां मतां
श्रीलीलारमणं मनोविहरणं श्रीबालकृष्णो वरं ॥
उच्चोच्चौ खलु स्मृतौ शृणु सखे तुङ्गौ प्रणीचौ स्मृतौ ।
पुष्यावुच्चमितौ कुपू प्रकथितौ नीचौ गजे चार्य्यकैः ॥

End. मतृस्थाने च सुगन्धदुग्धसहितां सच्छक्करां पिवेत् ।
तस्मिन्नेव रतिं वरां सुगमयेत् कुर्य्यात् तदा गर्भिणीं ॥

Colophon. इतिश्रीमतृपण्डितवेदहस्तकुलोद्भवश्रीज्योतिःस्वरूपात्मजश्रीबालकृष्णविरचिते लीलारमणे गर्भनिरूपणं नाम षोड़शकौतुकं ॥

विषयः । १ । २ । कौतुके संज्ञानिरूपणं । ३ कौ, संज्ञाफलकथनं ॥ ४ कौ, जीवधातुमूलनिरूपणं । ५ कौ, जीवभेदकथनं ॥ ६ धातुभेदकथनं ॥ ७ मूलभेदकथनं । ८ अतीतपुरुषायुर्निरूपणं ॥ ९ कौ, वस्तुनामकथनं ॥ १० कौ, कार्य्यविधिनिरूपणं । ११ कौ, स्वरनिरूपणं । १२ पञ्चपक्षिनिरूपणं । १३ सुभिक्षादिनिरूपणं ॥ १४ युद्धादिनिरूपणं । १५ कौ, निधिस्वरूपनिरूपणं । १६ कौतुके, गर्भनिरूपणं ॥

No. 253. लीलावत्युदाहरणम् By वीरेश्वरदैवज्ञ । Substance, country-made paper, 10×5 inches. Folia, 27. Lines, 16 on a page. Character, Maithil. Date ? Place of deposit, District Chāprā, P. O. Rāmkalā, Bagihi, Paṇḍita Rāmadatta Ojhā. Appearance, new. Prose. Generally correct.

Beginning. नमो विश्वनाथाय ॥

आदित्यं जगदुद्भवस्थितिविभुं नानानिधिं योगिनां ।
ध्येयं ब्रह्मषड़ोर्म्मिदोषरहितं पश्यन्ति यं हृद्गतं
भक्तानाञ्च मनोरथार्थफलदं क्लेशत्रयच्छेदकं ।
गीतं सत्कृतिभिः महोदयमहं वन्दे जगद्भास्करं ।

अव्यक्तं बीजभूतत्वात् गणितं बीजसंज्ञितं ।
व्यक्तञ्च पाटीगणितं प्राङ्गणितविक्तमाः ॥

End. केचित्तु जीवामुखं व्यासो भूमिलवेन निघ्नमित्यादिना फलमानीय हृत्तफलार्द्धं ग्रोध्यं फलमित्याहुः ॥
आसीत् पार्थपुरे विनायक इति ख्यातो महीमण्डले
तर्के नाल्पमतिर्गरिष्ठगणकः प्रौढ़स्तदीयोक्तिभिः ।
तस्मात् यो जनितास्तवान् सुगणको गोपालसंज्ञो बुधः
तत्पुत्रेण विवेचितं सुगणितं श्रीभास्करीयन्त्विदं ॥
शाके षट्पञ्चमहीप्रमाणे गताब्दपिण्डे द्विघनस्य (नः स)माने ।
तर्कांम्रधीमन्मतितारतम्याल्लीलावतीयं विवृता समासात् ॥

Colophon. इति भास्कराचार्य्यविरचितायाः लीलावत्याः श्रीवीरेश्वरदैवज्ञकृतसुदाहरणं समाप्तं ॥

विषयः । संक्षिप्तलीलावतीव्याख्यानं ॥

No. 254. लोकतत्त्वनिर्णयः By हरिभद्रसूरिः । Substance, country-made paper, 12×4 inches. Folia, 10. Lines, 10 on a page. Extent, 210 slokas. Character, Nāgara. Date ? Place of deposit, Dīnmaṇḍalācārya Mahārāja Bālacandra Sūri, Benares City. Appearance, new. Verse. Correct.

Beginning. प्रणिपत्यैकमनेकं केवलरूपं जिनोत्तमं भक्त्या ।
भव्यजनबोधनार्थं न्वतत्त्वनिगमं प्रवक्ष्यामि ॥
भव्याभव्यविचारो न हि युक्तोऽनुग्रहप्रवृत्तानां ।
कामं तथापि पूर्व्वं परीक्षितव्या बुधैः परिषत् ॥

End. तस्मादनाद्यनिधनं व्यसनोरुभीमं
जन्मा × × × दोष दृढ़नेम्यतिरागतुम्बं ।
घोरं स्वकर्मपवनेरितलोकचक्रं
भ्राम्यत्यनायतमिदं हि किमीश्वरेण ॥

Colophon. इति श्रीहरिभद्रसूरिकृतो लोकतत्त्वनिर्णयः सम्पूर्णः .

विषयः । मनुष्यतत्त्वनिरूपणम् .

No. 255. ज्योमग्रजातकम् । Substance, country-made paper, 11 × 4½ inches. Folia, 16. Lines, 10 on a page. Extent, 320 slokas. Character, Nāgara. Date Saṁvat 1878. Place of deposit, District Chāprā, Harapurā, Paṇḍita Jagadeo. Appearance, tolerable. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

सुजन्मा नाम विप्रोऽसौ मनीषी शीलवान् सुधीः ।
स्वधर्म्मनिरतो नित्यं ब्रह्मज्ञानेषु तत्परः ॥
एकदा जन्मलग्नेन फलज्ञानं चिकीर्षुः सः ।
फलज्ञानस्य हेत्वर्थं गत्वा बदरिकाश्रमे ॥
तत्र दृष्ट्वा शुभस्थानं ज्योमगस्याश्रमं शुभं ।
गत्वा तु निकटे तस्य निर्लोभः शुद्धचेतनः ।
कृताञ्जलिपुटो भूत्वा उवाच विप्र तं प्रति ॥

End. विप्राणां भोजनं दानं सङ्कल्पं विधिपूर्व्वकं ।
ग्रहपीड़ाप्रशान्त्यर्थं कारयेद्विधिवत् सुधीः ॥
भो विप्र त्वया श्रुता कथिता स्वत्तरा मया ।
अतःपरं प्रच्छसि किं तद्वदस्व ममाग्रतः ॥

Colophon. इति श्रीज्योमगजातके ग्रहदानजपपूजाकथनं नामाष्टमोऽध्यायः ॥
इति ज्योमगजातकं समाप्तं ॥ संवत १८७८ ।

विषयः । अत्र ४ पत्रं यावत् ज्योमगसंहिता, ततःपरं ज्योमगजातकं ॥ तत्र १ अध्याये आयुर्दायारिष्टारिष्टभङ्गनं । २ अः दशान्तर्दशाफलकथनं । ३ अः कुटुम्बकथनं ॥ ४ अः द्वादशयोगकथनं । ५ ग्रहषड्वर्गादिनिर्णयः ॥ ६ अः कुम्भलौफलाफलादिकथनं । ७ अः गोचरफलादिकथनं । ८ अः ग्रहदानपूजादिकथनं ॥

No. 256. वनप्रतिष्ठाविधिः । Substance, country-made paper, 10 × 3 inches. Folia, 19. Lines, 10 on a page. Extent, 380 slokas. Character, Nāgara. Date ? Place of deposit, Harapurā, Post Gopālagañja, District Chāprā, Paṇḍita Jagadeo. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।

अथ वनप्रतिष्ठाविधिः । वनपूर्व्वदिशि मध्ये यजमानहस्तेन षोड़शहस्तपरिमितं मण्डपं विधाय इत्यादि ।

End. अपरेभ्यः स्वस्तिवचनादिभ्यो दक्षिणा दातव्या भूरिदक्षिणया ब्राह्मणसन्तोषञ्च कुर्य्यात् ब्राह्मणाश्च यजमानाशिषं दद्युः ॥

Colophon. इति वनोत्सर्गविधिः ॥

विषयः । वनप्रतिष्ठाविधिप्रयोगादिकथनं ॥

No. 257. वर्षपद्धतिटीका By भट्टजयानन्द । Substance, country-made paper, 11 × 5 inches. Folia, 10. Lines, 19 on a page. Extent, 150 ślokas. Character, Nāgara. Date Sambat 1833. Place of deposit, late Bābu Hariścandra, Benares City. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

अथ केशवीवर्षकरणपद्धतिः तस्या इयं टीका लिख्यते ।

शशिकलाकलिताधिकमेकतः क्षितिविभूतिविभूतिविभूषितं ।

शिवशिवायुगलं युगलं घनं द्रुतविलम्बितगामि नमामि तत् ॥

End. अन्यथा न शुभं मिश्रेण मिश्रं फलं वदेत्, एतद्भावफलादिकं स्फूतं ताजिकोक्तं ज्ञेयं ।

Colophon. इति श्रीकेशवविरचिता वर्षपद्धतिः ताजिकमतानुकूला टीका भट्टजयानन्देन पुत्रयोरध्यापनार्थं लिखिता समाप्ता । संवत्—१८३३ ।

विषयः । केशवीवर्षपद्धतिव्याख्या ।

No. 258. वल्लभगीतकाव्यम् । Substance, country-made paper, 8 × 5 inches. Folia, 15. Lines, 14 on a page. Extent, 380 ślokas. Character, Nāgara. Date ? Place of deposit, late Bābu Hariścandra, Benares City. Appearance, old. Verse. Correct.

Beginning. श्रीगोकुलेशो जयति ।

श्रीमद्गोकुलमण्डनं वरतनुं कल्याणपाथोनिधिं

विघ्नौघोन्मदनागकुम्भदलनाति × सिंह × × क्रमं ।

भक्तापत्तितमःसमूहहरणश्रीसूर्य्यकोटिप्रभं

वन्देऽहं कमलाकरं द्विजवरं श्रीवल्लभं सत्प्रियं ॥

End. विद्यानिधिः कामकलानिधिश्च दयानिधिर्वागमृतोदधिश्च ।

तेजोनिधिः सत्गुणकोदधिश्च विराजते वल्लभ एष घोषे ॥ (इतो नास्ति)

विषयः । संगीतेन वल्लभाचार्य्यस्तुतिः ।

No. 259. वल्लभाचार्य्यवंशावली By निर्भय । Substance, country-made paper, 6×5 inches. Folia, 30. Lines, 14 on a page. Extent, 300 slokas. Character, Nāgara. Date Saṃvat 1859. Place of deposit, late Bābu Hariścandra, Benares City. Appearance, new. Verse. Correct.

Beginning. श्रीविट्ठलवरजो ।

जयति श्रीमदाचार्य्यवंशो येन वशीकृतः ।

ब्रह्मादिदुर्लभः कृष्णो योगिनां पारदो यथा ॥

तन्नामानि प्रवक्ष्यन्ते चिन्तामणिसमानि हि ।

कल्पद्रुमं समालोक्य, प्रकृत्या भाषया कृतं ।

End. गुणरत्नसुधासिन्धुगोस्वामिव्रजभूषणो ।

स्वीकृतनिर्भयाख्योऽयं कृतवान्कल्पपादपं ॥

Post Colophon. संवत् १८४१ । ज्येष्ठशुक्लद्वितीयायां रचितोऽयं कल्पद्रुमः ।

योबीजवापमारभ्य फलपाकावधि स्वयं ।

पोषितस्तं व्रजतरुं नाथो नापि जिहासति ॥

उपाध्यायजयकृष्णदीक्षितेन आत्मावलोकार्थं लिखितं काकयोली-

ग्रामे । संवत् १८५९ मिति फाल्गुणवदि रविवासरे समाप्तम् ।

विषयः । वल्लभाचार्य्यवंशकथनं ।

No. 260. वल्लभाष्टकविवृतिः By वल्लभः। Substance, country-made paper, 13×5 inches. Folia, 10. Lines, 9 on a page. Extent, 200 slokas. Character, Nāgari. Date ? Place of deposit, late Bābu Hariscandra, Benares City. Appearance, new. Prose. Incorrect.

Beginning. श्रीकृष्णाय नमः।
यत्पादरजसागत्य मनो मे चञ्चलीकृतं।
तत्कृताचार्य्यपद्यानां विवृतौ यत् प्रवर्त्तते॥
विवृतेः सफलत्वाय नत्वा पितृपदाम्बुजं।
विवृतिः कर्त्तुमारब्धा नतिविश्वासतो मया॥

End. पितृपादाब्जकृपया विवृतं वल्लभाष्टकं।
कृपयन्तु सदाचार्या भृत्ये श्रीविट्ठले मयि॥

Colophon. इति श्रीपितृपादाब्जपरागारक्तचेतसा।
श्रीवल्लभेन विवृतमखिलं वल्लभाष्टकं॥
इति पितृचरणैकान्ता श्रीवल्लभविरचिता श्रीवल्लभाष्टकविवृतिः सम्पूर्णा।

विषयः। वल्लभाष्टकव्याख्या।

No. 261. वसन्तराजशाकुनम्। Substance, country-made paper, 12×5 inches. Folia, 134. Lines, 9 on a page. Extent, 2680 slokas. Character, Nāgara. Date Saṃvat 1874. Place of deposit, Benares City-Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः। निर्विघ्नमस्तु।
विरञ्चिनारायणशंकरेभ्यः शचीपतिस्कन्दविनायकेभ्यः।
लक्ष्मीभवानीपतिदेवताभ्यः सदा नवभ्योपि नमो ग्रहेभ्यः।

End. वसन्तराजशाकुने सदागमार्थशोभने।
समस्तसत्यकौतुके विचारितः शिवारुतं।

Colophon. इति वसन्तराजशाकुने शिवारुतं नाम एकोनविंशतितमो वर्गः।
सम्वत् १८७८ श्रावणे मासि।

विषयः। पद्मपत्रिमगादीनां शुभाशुभसूचकस्वरज्ञानकथनम्।

No. 262. वाक्यवृत्तिटीका। Substance, palm-leaf, 22×2 inches. Folia, 7. Lines, 5 on a page. Extent, 175 ślokas. Character, Bengali. Date ? Place of deposit, Rājaguru's Maṭha, Gaṇeśamahallā, Benares City. Appearance, very old. Prose. Correct.

Beginning. पारम्पर्य्येण वेदान्ता यद्वदन्ति परं पदं।
तदहं ब्रह्मनिर्भेदं × × दिपदलच्चितम्
मुमुक्षुजनानुजिघृक्षया वाक्यवृत्ति × × × प्रकरणं प्रारभमाणो विघ्नोपशमपरमादिप्रयोजनसंसिद्धये परदेवताप्रणामलक्षणमङ्गलाचरणं × ×
× ख्तः सम्पादयन् प्रकरणप्रारम्भापेक्षितमनुबन्धचयञ्च विषयसम्बन्धप्रयोजनलक्षणं संक्षिप्य प्रतिपत्तिसौकर्य्यार्थं कथयति, स्वर्गेति।

End. वाक्यवृत्तेरियं वृत्ती रुचिरा रचिता मया।
पूर्णा × × वर्ता जाता संगतापुरुषोत्तमे॥

Colophon. इति परमहंसपरिव्राजकाचार्य्यशङ्करभगवता विरचितायां वाक्यवृत्तेः टीका समाप्ता।

विषयः। वाक्यवृत्तिव्याख्या।

No. 263. वात्स्यायनभाष्यानुव्याख्या By गङ्गाधर। Substance, country-made paper, 20×5 inches. Folia, 238. Lines, 12 on a page. Extent, 17,850 ślokas. Character, Bengali. Date, 1292 Sana. Place of deposit, Benares City. Bābu Pareśa Nātha Rāya, Kavirāja. Appearance, new. Prose. Incorrect.

Beginning. ॐ नमः शिवाय।
गायत्रीं नामवर्णाम्नु दुर्गां वाग्देवतां भजे।
यां विमृश्यां रजगयामयशत्नवतां भजेद्द्विजः॥

यान्येवान्वीक्षिकीविद्याशासने तु महर्षिणा ।
गौतमेणाक्षपादेन सूत्राण्युक्तान्यशेषतः ॥
व्याख्यातानि च सूत्राणि तानि कृत्या महर्षिणा ।
वात्स्यायनेन भाष्येण व्याख्यातं तत्र वार्त्तिकम् ॥
वात्स्यायनकृतं भाष्यं मया व्याख्यायते पुनः ।
असद्वाद्यन्यथाव्याख्यानिवृत्त्यर्थं स्फुटार्थवत् ॥
पीतं यैरिह सार्षपं मधुधिया तैलं मधु स्वादितं ।
नार्थिभ्यो यदि दीयते मधु तदैवेदं न मक्षित्यमी ॥ इत्यादि ।

End. अस्मिन् शास्त्रे ये प्रमाणप्रमेय इत्यादिसूत्रेण पदार्था उद्दिष्टास्त एव क्रमेण लक्षणैर्लक्षिता वादप्रतिवादाभ्यां परीक्षितास्च स्वयमेवाचार्येणाक्षपादगौतमेन महर्षिणेति समाप्तमिदं शास्त्रं उद्दिष्टार्थानवशेषात् ।

Colophon. इत्यक्षपादगौतमप्रणीते न्यायशास्त्रे पञ्चमाध्यायस्य द्वितीयाह्निकस्य वात्स्यायनभाष्ये द्वितीयाह्निकस्य वैद्यगङ्गाधरेणानुव्याख्यातस्य द्वितीयमाह्निकं समाप्तम् ।

समाप्तः पञ्चमोध्यायः । समाप्तश्चेदं न्यायशास्त्रमिति . गङ्गाधरकृतं वात्स्यायनकृतस्य गौतमन्यायभाष्यस्यानुव्याख्यानं समाप्तमिति . सन १२९१ . १८-वैशाख .

विषयः । वात्स्यायनभाष्यव्याख्या ।

No. 264. वारुण्युपनिषद्भाष्यम् । Substance country-made paper, 12 × 5 inches. Folia, 199. Lines, 7 on a page. Extent, 3184 ślokas. Character, Nāgara. Date, Śakābda 1726. Place of deposit, Benares. Appearance, old. Prose. Correct.

Beginning. यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरः ॥ १ ॥
साधनं ब्रह्मविद्यायाः सांक्षित्यामीरितं स्फुटं ।
वारुण्युपनिषद्योतद्ब्रह्मतत्वं विविच्यते ।

End. ब्रह्मविदाप्नोति परमित्यादि य एवं वेद इत्यन्तेन ग्रन्थेन या प्रतिपादिता सेयं इति शब्देन परामृश्यते सा च उपनिषत् रहस्यविद्या उपनिषत् नाम यस्यां परं श्रेय इति व्युत्पत्तेः तादृशी विद्याभिहितेति शेषः ।

Colophon. इति माधवीयवेदार्थप्रकाशे यजुरारण्यके वारुण्यामुपनिषदि ब्रह्मवल्ल्याख्यो द्वितीयोऽनुवाकः । शकाब्दा १७२९ ।

विषयः । यजुरारण्यकान्तर्गतवारुण्युपनिषदि ब्रह्मवल्ल्याख्यानुवाकव्याख्या ।

No. 265. विजयप्रदीपिकाटीका By विजयगणि । Substance, country-made paper, 13 × 5 inches. Folia, 280. Lines, 13 on a page. Extent, 10,000 ślokas. Character, Nāgara Date, Saṃvat 1692. Place of deposit, Benares City. Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, old. Prose. Incorrect.

Beginning. अस्य प्रथमपत्रं नास्ति ।

निर्मलजलप्रवाहपटलप्रक्षालितकैलासगिरिगौरतागर्व्वं सर्व्वं क (...)-
यशःपुञ्जजगत्मनोहारि निरतिचारं यं चचार विचारचारुसमाचारि-
महारि भूर्भुवस्स्वस्त्रयीविदितसुविहितपरम्परा प्रादुरभूत् । (?)

End. श्रियः स्फूर्त्तर्यस्य मूर्त्तेः पुरस्तादेषा टीका पूरिता दुरितापत् ।
भूयात् सोऽयं सद्भवश्रेयि × सि श्रीरापल्लीपार्श्वनाथप्रसिद्धैः ॥ (?)

Colophon. इति श्रीविजयप्रशस्तिकाव्यवृत्तिः (...) श्रीर्भूयात् ।
यस्य काव्यस्य टीकायां सङ्ख्यायामनुष्टुभां ।
सहस्रदश संजाता साधिका (......) ॥
महोपाध्यायश्रीविजयगणिविनिर्मितोऽयं ग्रन्थः ।

विषयः । विजयप्रदीपिकानामालङ्कारशास्त्रव्याख्या ।

No. 266. विनायकमाहात्म्यम् । Substance, country-made paper, 14 × 6 inches. Folia, 50. Lines, 12 on a page. Extent, 1500 ślokas. Character, Nāgara. Date, Saṃvat 1848. Place of deposit, Benares City, late Babu Hariścandra. Appearance, old. Prose. Incorrect.

Beginning. श्रीगणेशाय नमः । स्कन्द उवाच ।
शिव शम्भो महेशान सर्व्वज्ञ सुखदायक ।
श्राख्यानानि सुपुण्यानि श्रुतानि त्वन्मुखाम्बुजात् ॥

End. अयं गोप्यतमः स्कन्दमहिमा ते मयेरितः ।
यस्मात् संगोपनीयश्च गुरोरपि पुरः प्रिये ॥
व्यास उवाच ।
शिवेन गदितो विप्राः स्कन्दाय इच्छते खिलः ।
वैनायकोऽयं महिमा भवद्भ्योयोनिवेदितः ।

Colophon. इति स्कन्दपुराणे चतुर्विंशतितमोऽध्यायः ।

विषयः । गणेशमाहात्म्यादिकथनम् .

No. 267. विपाकश्रुतसूत्रम् । Substance, country-made paper. 12×4 inches. Folia, 74. Lines, 9 on a page. Extent, 1332 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City. Diṅmaṇḍalācārya, Mahāṛāja Bālacandra Sūri. Appearance, old. Prose. Correct.

Beginning. पञ्चावागरसानं एगोसूय अन्भोदसभयण एक्कारसगा चउदसमुखेव उद्दिसिज्जन्ति. एक्कं तर ए सू आयं विलेसु आउ त पासेणं अइजवा आयारस्स ।

End. तत्तो महाविदेहे देवाददृम्पत्तिओ जाव सिज्झिहिन्ति एवं जम्बुसमणेणं जावसम्पत्तेणं सुहविवागोणं दसमस्स अभ्भयणस्स अयमठे पञ्चत्ते. सेवं भन्ते सुहविवागो एकारसमं अङ्गं सम्मत्तं ।

Colophon. नमः श्रुतदेवताये विवागसुयस्स दोसुयखन्धादुहविवागसुहविवागाय तत्थ-दुहविवागदसअभ्भयणा एक्कारसगदसमुचवदिव समुउद्दिसन्ति एवं सूह विवागाविसे संजहा आयारस्स विपाकश्रुतसूत्रं समाप्तम् .

विषयः । प्राक्कर्मकथनं (कर्मविपाकोयम् .)

No. 268. विवरणतत्त्वदीपनम् । By अखण्डमुनि । Substance, country-made paper, 15 × 3 inches. Folia, 180. Lines, 7 on a page. Extent, 5400 ślokas. Character, Bengali. Date ? Place of deposit, Benares City. Rājaguru's Maṭha. Ganeśamahallā. Appearance, new. Verse. Correct.

Beginning. कृष्णाय नमः .

"अस्य प्रथमतः कतिपयपत्राणि न सन्ति"

विचारविध्यपेक्षितविषयफलाधिकार्य्यनुबन्धानां मध्ये विषयफले तावत्-प्रतिपादिते चार्थादधिकार्य्यपि सिद्धः ... इति किं सिद्धैव ननु ब्रह्म-जिज्ञासेत्यादिना. न च विषयप्रदर्शनार्थं वर्णकान्तरप्रारम्भ इति शंक्यम्, असन्दिग्धतया प्रतिपाद्यत्वात् गतार्थत्वागतार्थत्वाभ्यां सन्देहेऽप्येतत्विचार-प्राथम्यं किं तस्मादित्याशङ्क्य तात्पर्य्यमाह, तत्रेति ।

End. ज्ञाने सत्यपि प्रमाकत्वादिकं दृष्टमित्याशङ्क्य तात्पर्य्यमाह, अद्वितीयेति सकलशास्त्रार्थसाभिन्नत्वं सोपाधिकं निरुपाधिकञ्च रूपमनुदितमिति द्रष्टव्यं .

तत्त्वदीपनमालेयं भवपादसमर्पिता ।
विदुषां प्रीणनार्थाय तर्कमौक्तिकभास्वरा ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्याखण्डानुभूतिपूज्यपादशिष्येणाखण्डमुनिना विरचिते विवरणतत्त्वदीपने समन्वयसूत्रं समाप्तम् ।

No. 269. विविधलिङ्गपूजनम् । Substance, country-made paper, 10 × 3½ inches. Folia, 5. Lines, 11 on a page. Extent, 120 ślokas. Character, Nāgara. Date, Saṃvat 1716. Place of deposit, Benares City. Late Babu Hariścandra. Appearance, old. Prose and verse. Incorrect.

Beginning. श्रीगणेशाय नमः ।

अस्य श्रीपार्थिवेश्वरचिन्तामणिमन्त्रस्य सिप्रवानुपचकर्त्ता ब्रह्मर्षिः कामदेवो देवता गायत्री छन्दः श्रीअघवरदास्वरूपिणी श्रीपार्थिवेश्वरचिन्तामणिर्देवता

ओं ह्रीं बीजं क्लीं शक्तिः नमः कीलकं ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

End. बाणेषु चार्पितं लिङ्गं बाणलिङ्गं ततः स्मृतं ।
तस्मिंस्तु पूजिते विश्वं सर्व्वं संपूजितं भवेत् ॥

Colophon. इति श्रीरुद्रयामले कालिकोड्डामरतन्त्रसारे विविधलिङ्गपूजनम् ।

विषयः । विविधशिवलिङ्गपूजाकथनम् .

No. 270. विशिष्टाद्वैतविजयवादः By नरहरि । Substance, country-made paper, 13 × 5 inches. Folia, 6. Lines, 9 on a page. Extent, 162 slokas. Character, Nāgara. Date ? Place of deposit, Purī, Rāja-gopāla Maṭha, Mohānta Śrī Raghunandana Rāmānuja Dāsa. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीमते रामानुजाय नमः ।
पायात् स वः स्वव्यतिरिक्तसर्व्वविभुश्च योन्तर्बहिर्व्याप्य(?)मः पुमान् ।
यस्मात् कटाक्षायतभाग्यदृष्ट्या सुनिर्गुणो भव्यगुणाकरोभूत् ॥
अत्र खलु अखिलहेयप्रत्यनीककल्याणगुणैकतानस्वेतरसमस्तवस्तुविलक्षण-
विशिष्टाद्वैतं ब्रह्म सर्व्वश्रुतिस्मृतीतिहासपुराणवेद्यमिति श्रीमद्रामानुजा-
चार्य्यै र्भाषितमतं अत्र केचित्कुमतयस्त्वाहुः ।
भेदाभेदविरुद्धं हि विशिष्टाद्वैतकल्पनं ।
न युक्तं बुद्धिकुशलैः श्रौतयौक्तिकबाधतः ॥ इत्यादि ॥

End. तदुक्तं । अन्यथाज्ञातधर्म्माणामारोपो नैव सिध्यति ।
यदि सिद्ध्येत् तदासिद्ध्येत् कूर्म्मरोमादिविभ्रमः ॥
इत्यादिकं तु भाष्यादावेव सुस्पष्टमित्युक्तमितिविस्तरभयान्नेह लिख्यते ।
यतीश्वरसरस्वतीसुरभिताशयानां मुदे
प्रसङ्गश × मण्डले विजयनाथमेतन्मया ।
कृतं सुमतिना सतां स्वगणयाशनालं (?)
सुधत्यविजयं शुभं भगवते प्रप × तु वै ॥ १

Colophon. इति श्रीनैध्रुवकाश्यपगोत्रपवित्रेण श्रीमद्राघवस्नुना सकलविद्वच्चूडामणिना
नरहरिनाम्ना विरचितो विशिष्टाद्वैतविजयवादः ।

विषयः । विशिष्टाद्वैतवादसमर्थनं ।

No. 271. विश्वैकाक्षरनाममाला । Substance, country-made paper, 11 × 4½ inches. Folia, 3. Lines, 17 on a page. Extent, 120 slokas. Character, Nāgara. Date ? Place of deposit, Benares City. Diṅmaṇḍalācārya, Mahārāja Bālacandra Sūri. Appearance, old. Verse. Correct.

Beginning. ध्यात्वा नत्वा निरीक्ष्यान्तःकरणं कर्मसाक्षिणं ।
क्रियते नूतननाममालिकाक्षरवाचिका ॥

End. खं स्वर्गेच हिंसायां खरे खारे खरौ च खः ।
खोष्याने खरवे व्याधौ खं च खेचे खरे गटे ॥

Colophon. इति विश्वशम्भुमुनिप्रणीतानेकार्थे अक्षरनाममालिका समाप्ता ।

विषयः । एकाक्षराभिधानम् .

No. 272 A. विष्णुपदावली (वल्लभमतानुयायिनी) असम्पूर्णयं । Substance, country-made paper, 12 × 5 inches. Folia, 48. Lines, 16 on a page. Extent, 768 slokas. Character, Nāgara. Date ? Place of deposit, Benares City. Late Bābu Hariścandra. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः । अथ विष्णुपदानि लिख्यन्ते .
गौडीरागेण । सखि विपिनाद्धुनैवायाति श्रूयते रावमुरलिकानादो वदनामोदवायुनाद्गो वाति . (ध्रु) भंकृतिरपि वनमालामधुपहता कुरुते हृदि मोदं गोझंकृतिरतिशयमधुरा विदधाति विशेषविनोदं .

End. पिबति विमलपानीयं यमुनायामञ्जलिबन्धेन ।
प्रतिबिम्बं पश्यति सुचिरं निजलोचनसम्बन्धेन ॥

Colophon.

विषयः । संस्कृतसंगीतेन विष्णुस्तुति ।

No. 272. विष्णुसहस्रनामभाष्यविवृतिः। By तारकब्रह्मसरस्वती। Substance, country-made paper, 15×5 inches. Folia, 151. Lines, 13 on a page. Extent, 7,550 ślokas. Character, Bengali. Date Śāka 1701. Place of deposit, Benares City. Rājaguru's Maṭha. Ganeśamahallā. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः .

श्रीमाधवोमाधवविघ्नराजान् वाग्देवतां व्यासमुनिं महान्तं
श्रीशङ्करं भाष्यकृतश्च भक्त्या नमाम्यहं लोकहितावतारम्।
श्रीगोपालनन्दयतीन् गुरून् विद्यागुरूनपि
प्रणम्य श्रीमदद्वैतानन्दान् शमदमालयान्॥
भाष्यं तैरुपदिष्टार्थं भगवत्पादनिर्मितं
विष्णोर्नामसहस्रस्य यथामति विविच्यते॥

End. प्रक्षेपकालस्य निरासहेतोर्व्याख्याहरेर्नामसहस्रभाष्ये
या तारकब्रह्मयतिप्रणीता समर्पिता सा हरिपादयुग्मे।
श्रीगोपालसरस्वती × × × यतिरन्तेवासिना॥
श्रीतारकब्रह्मसरस्वती × शक्त्यनुरूपा कृता।?
विष्णोर्नामसहस्रभाष्यविवृतिर्या तत्र विद्वज्जनैः।
हन्तव्यं हतमुत्तमैर्भगवतो नामैकनिष्ठा यतः॥

Colophon. इति सहस्रनामभाष्यव्याख्यानं समाप्तम् . ॐ नमो भगवते वासुदेवाय।
शुभमस्तु शकाब्दा—१७०१ . वैशाखस्येयमिति।

विषयः। विष्णुसहस्रनामभाष्यव्याख्या .

No. 273. वीरचिन्तामणिः। Substance, country-made paper, 13×5 inches. Folia, 7. Lines, 16 on a page. Extent, 700 ślokas. Character, Nāgara. Date ? Place of deposit, District Chāprā, P. O. Gopālagañja, Harapura, Jagadeo Paṇḍita. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः।

रौद्रनक्षत्रगावेतौ यदि सूर्य्यमहीसुतौ।
माषा महार्घतां यान्ति धान्यानि सस्ततां पुनः। इत्यादि।

End. न च व्योमाचितं चैत्रे घनैर्न पतनं खलु ।
कर्कावाश्च वैशाखे शुक्रे चण्डातपो न हि ।
सदातितुच्छा वृष्टिः स्यात् प्राइट्काले न संशयः ॥

Colophon. इति वीरचिन्तामणौ दुर्भिक्षसुभिक्षविचारः ।
अतःपरं खण्डितं ।

विषयः । चैत्रवैशाखादिमासफलकथनं । दुर्भिक्षसुभिक्षादिविचारश्च ॥ अतःपरं खण्डितं

No. 274. वृत्तचिन्तामणिः । By शुकदेव पण्डित । Substance, country-made paper, 12 × 5 inches. Folia, 19. Lines, 8 on a page. Extent, 342 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City. Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
अज्ञानं घनमपि तूलराशिकल्पं
अल्पाग्निर्भवतितरां यदीयनाम्नः ।
विघ्नाली विलयमुपैति चिन्तयैव
स्पष्टं स वितरतु वा × × गजास्यः ।

End. नारायणस्य पदजप्सराणौ रवि × × × मचहति परिहृतकामिः ।
बल्लवल्लदेवमरिदिक्षिचिवा भुवि स्फुरति तव मत्तापविवा ॥

Colophon. इति श्रीविद्दुपाध्यायपण्डितशुकदेवदर्शिते श्रीमन्नृपतिशार्दूलवल्लवल्लकिंच-कण्ठाभरणे वृत्तचिन्तामणौ मात्रासमकपरिच्छेदः षष्ठो मरीचिः पूर्णार्थम् ।

विषयः । प्रथममरीचौ गणपरिच्छेदः । द्वितीयमरीचौ विविधार्य्यादिपरिच्छेदः । तृतीयमरीचौ षदो × × × । द्विपादवृत्तपरिच्छेदः । चतुर्थमरीचौ प्रकीर्णकमात्रावृत्त परिच्छेदः । पञ्चममरीचौ सभेदवैतालीयपरिच्छेदः । षष्ठमरीचौ मात्रासमकपरिच्छेदः ।

No. 275. वृत्तरत्नाकरटीका by चिन्तामणि । Substance, country-made paper, 9 × 3 inches. Folia, 27. Lines, 13 on a page. Extent, 680 ślokas. Character, Nāgara. Date ? Place of deposit, District Chāprā, P. O. Sisoyā, Paṇḍita Rāmanātha Miśra. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।

श्रीमद्गणेशं शिवमुख्यदेवैः स्वकार्य्यसिद्धाश्रितपादपद्मं ।

सिन्दूरपूरारुणगण्डयुग्मं नमामि गौरीहृदयाम्बुजार्कं ॥

दैवज्ञवर्य्यगणसेवितपादपद्मं गोविन्दतातमहिनाथगवीप्रवीणं ।

चिन्तामणिः प्रकुरुते प्रणिपत्य वृत्तरत्नाकरस्य विवृतिं सुलभां सुधाख्यां ॥

End. एवञ्च, अक्षरप्रस्तारसंख्या षोड़शरूपा ॥

× × × श्रीविद्वद्दैवज्ञमुकुटभूषणगोविन्दज्योतिर्वित्सूनुचिन्तामणिदैवज्ञविरचितायां वृत्तरत्नाकरटीकायां सुधाख्यायां प्रस्ताराद्यध्यायः ॥

विषयः । केदारभट्टकृतवृत्तरत्नाकरस्य व्याख्यानं ॥

No. 276. वृत्तरत्नाकरसुगमवृत्तिः By समयसुन्दरगणि । Substance, country-made paper, 12 × 4½ inches. Folia, 18. Lines, 17 on a page. Extent, 1300 slokas. Character, Nāgara. Date Samvat 1835. Place of deposit, Benares City. Dinmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, new. Prose. Correct.

Beginning. (श्री)पार्श्वनाथं जिनं नत्वा गणिसमयसुन्दरः

वृत्तरत्नाकरच्छन्दोव्याख्यानं कुरुते स्फुटम् ।

वृत्तयो बहवः सन्ति छन्दसोऽस्य पुरातनाः

परं मयातिसुगमा व्याख्या तस्य विधीयते ॥

End. श्रीमत्खरतरगच्छे श्रीजिनचन्द्रसूरयः ।

तेषां सकलचन्द्राख्यो विनेयः प्रथमोऽभवत् ॥

तच्छिष्यः समयसुन्दर एतां वृत्तिं चकार सुगमतरां ।

श्रीजिनसागरसूरि प्रवरे गच्छाधिराजे ॥

यः कोऽपिमत्सरी मूढ़ः प्रशस्तिं न लिखिष्यति,

स लोके लप्स्यते निन्दां × × भावी परत्र च ॥

Colophon. इति वृत्तरत्नाकराख्यच्छन्दसि श्रीसमयसुन्दरगणिविरचितायां वृत्तरत्नाकरे सुगमवृत्तौ षष्ठाध्यायः सम्पूर्णः । ग्रंथसंख्या—१३०० संवत्—१८३५ .

विषयः । वृत्तरत्नाकरव्याख्या ।

No. 277. वृषोत्सर्गकौमुदी by सिद्धान्तवागीशभट्टाचार्य्य। Substance, country-made paper, 14 × 4 inches. Folia, 97. Lines, 6 on a page. Extent, 1740 slokas. Character, Bengali. Date ? Place of deposit, Zilla Mayamansiñg, Parganā Atiya, Post Jāmurki, Grāma Hālāliyā, Paṇḍita Gurudāsa Vidyāratna. Appearance, tolerable. Prose and Verse. Generally correct.

Beginning. ॐ नमो गणेशाय।

छन्दमातृस्थं अविच्छ्य पारस्करागमादिकं।
मात्वा करोति वागीशो वृषोत्सर्गस्य कौमुदीं॥

अथ वृषलक्षणं। तत्र मात्स्ये।

धेनुमादौ परीक्षेत सुशीलां लक्षणान्वितां।
अव्यङ्गामपरिक्लिष्टां जीववत्सामरोगिणीं॥
तस्याः सुतं परीक्षेत वृषभं लक्षणान्वितं।
उन्नतस्कन्धककुदमृजुलाङ्गूलभूषितं॥ इत्यादि।

End. कपिलाया अभावे अन्यापि धेनुर्देया।

तत्र एतद्गोरोमसम्मितवत्सरावच्छिन्नस्वर्गप्राप्तिः फलं। सर्व्वमन्यत् समानं। साक्षात्स्वाम्यभावे कुशब्राह्मण एवोत्सृज्य दद्यात्। ततः सूर्य्यार्घ्यदानमच्छिद्रावधारणञ्चेति।

सर्व्वशास्त्रसकलेतरविद्या-पारगो गुणसमो गुणगद्यः।
ग्रन्थमेनमनिशं शिवार्थकः कामरूपपतिपण्डितोऽकरोत्॥

Colophon. इति श्रीमहामहोपाध्यायजगद्गुरुश्रीसिद्धान्तवागीशभट्टाचार्य्यविरचिता वृषोत्सर्गकौमुदी समाप्ता॥

ॐ शिवाय नमः।

विषयः। वृषोत्सर्गकर्त्तव्यकर्म्मनिरूपणं। तत्र वृषलक्षणवत्समतरीलक्षणयूपलक्षणकथनं। वृषोत्सर्गस्थवर्त्तमानवृषोत्सर्गदेशनिरूपणं। वृषोत्सर्गव्यवस्थानिरूपणं। वृषोत्सर्गाधिकारिनिरूपणं। मण्डपलक्षणवृषाधिवासादिनिरूपणं। अथ वृषोत्सर्गप्रणालीकथनं॥ वृषोत्सर्गस्यायं पन्था अन्यप्रकार एव बङ्गदेशीयात् प्रचलितश्चायं कामरूपप्रदेशे (आसामे)। पारस्करादिनानाप्राचीनतमग्रन्थमवलम्ब्य विनिर्म्मितोऽयं ग्रन्थः। पाश्चात्यपद्धतिनामकप्राचीनेतरग्रन्थश्चावलम्बितोऽत्र।

No. 278. चिन्तामणिटीका। Substance, country-made paper, 14 × 4½ inches. Folia, 27. Lines, 7 on a page. Extent, 540 slokas. Character, Nâgara. Date ? Place of deposit, Benares City, late Babu Hariscandra. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः।

ओम् नन्दालये विलसितं श्रुतिभिर्विमृग्यं ब्रह्मादिवन्द्यचरणं नवमेघवर्णं।
संसारतापशमनं सुपुमर्थमाद्यं कृष्णं श्रये दलितमोहमयान्धकारं॥

End. तत्राप्यात्मनि अहंकाराध्यासवति तस्मिन्नखिलं देहमुख्यं देहेन्द्रियप्राणमनोबुद्धिरूपं कल्पितमज्ञानेनाद्दतमनिर्वाच्यमित्यर्थः (इतोनास्ति)।

Colophon. ... ...

विषयः। वेदान्तचिन्तामणिव्याख्या।

No. 279. वेदान्तमननम् By संक्षेपकाचार्य्य। Substance, palm-leaf, 13 × 2 inches. Folia, 69. Lines, 7 on a page. Extent, 2520 slokas. Character, Uriyā. Date ? Place of deposit, District Purī, Pratāpa Puruṣa Gottampaya, Parganā Raban, Paṇḍita Viśvanātha Mahāpātra Kāvyatīrtha. Appearance, old. Prose. Correct.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं॥
बोधानन्दघनं निरस्तसकलं कारुण्यपूर्णेक्षणं।
मूढ़ानामुपदेशकं च सततं पापात्मनां पापहं॥
वैराग्यस्य विरागिणां सुखकरं सम्पादकं सर्व्वदा।
श्रीमद्देशिकवासुदेवयतिनं मूढ़ात्मकोहं भजे॥
यस्यात्मभूतस्य गुरोः प्रसादात्
अहं विमुक्तोऽस्मि शरीरबन्धात्।
सर्व्वोपदेष्टुः पुरुषोत्तमस्य
तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यं॥
मूढ़ान् विवेकिनः कृत्वा लोके सर्व्वोपदेशकः।
यस्तिष्ठति च तं श्रीमद्वासुदेवगुरुं भजे॥

अध्यारोपापवादाभ्यां ब्रह्म सम्पद्येदिति सकलशास्त्रेषु विनिर्दिष्टितोऽर्थः। तत्र अध्यारोपं प्रथमतो निरूपयामः। इत्यादि।

End. तस्मात् कोटिसंख्या अश्वमेधादियज्ञा अपि अस्य ज्ञानयज्ञस्य वेदान्तविचारात्मकमुख्ययज्ञस्य षोडशीं कलामपि नार्हन्ति यत्र करस्थो मोक्षः तस्मात् मुमुक्षूणां सर्व्वथेदं न त्याज्यमिति सिद्धान्तः।

इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीमद्बुद्धदेवेन्द्रशिष्येण रङ्गदेवकाचार्य्येण विरचितं षोडशवर्षकं समाप्तं।

विषयः। अध्यारोपादिनिरूपणं। साधनचतुष्टयनिरूपणं। दुःखस्वरूपनिरूपणं। रागादिस्वरूपनिरूपणं। तत्कारणनिरूपणं। आत्मानात्मविवेकजज्ञानोत्पत्तिविचारः। आत्मनः शरीरत्रितयादभेदनिरूपणं। आत्मनः अवस्थात्रयसाक्षित्वनिरूपणं। पञ्चकोषादिनिरूपणं। आत्मनः सच्चिदानन्दरूपत्वादिनिरूपणं। आत्मनः अखण्डत्वादिनिरूपणं। बन्धमोक्षकारणज्ञानाज्ञानविचारः। शरीरत्रितयप्रामाण्यादिविचारः मोक्षरूपफलनिरूपणं।

No. 280. वेदान्तरहस्यम् By जगन्नाथानन्दसरस्वती। Substance, palm-leaf, 14 × 1 inches. Folia, 105. Lines, 6 on a page. Extent, 2400 slokas. Character, Bengali. Date ? Place of deposit, Puri, Sañkara Maṭha. Appearance, old. Prose and Verse. Generally correct.

Beginning. श्रीश्रीसिंहलक्ष्मीजगन्नाथाय नमः।

देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः।
विघ्नं हरन्तु हेरम्बचरणाम्बुजरेणवः॥
पूर्णज्ञानघनश्यामं सान्द्रानन्दमनोरमं।
सद्रूपापरतत्त्वोत्थं वन्दे हरिगुरुश्च तं॥
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजं।
प्रसन्नवदनं ध्यायेत् सर्व्वविघ्नोपशान्तये॥
अनादिमध्यान्तमजमद्वितीयमच्युतं।
प्रणतोऽस्मि जगन्नाथं सर्व्वकारणकारणं॥
यदक्षरं ब्रह्म य ईश्वरः पुमान्
गुणोर्म्मिसृष्टिस्थितिकालसंलयः।

प्रधानबुद्ध्यादिजगत्प्रपञ्चसूः
स नोऽस्तु विष्णुर्मतिभूतिमुक्तिदः ॥
यद्ब्रह्मभावितान्तास्व वेदा इ + + तदेवमत्र कारिकार्थे + + + + सम्बन्धप्रयोजनानि शास्त्रारम्भो + + लक्षणानि सूचितानि ॥ इत्यादि ।

End. "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः"
इति श्रीभगवद्गीतावचनात् ।
तद्वेदान्तरहस्यन्तु स्वान्तर्यामिकृतन्त्वदः ।
जगन्नाथानन्दयतेरस्तु तत्त्वनिदर्शनं ॥
अमूल्यधन्यानि दिनान्तराणि हरे त्वदालोकनमन्तरेण ।
अनाथबन्धो करुणैकसिन्धो हा हन्त हा हन्त कथं नयामि ॥

Colophon. इति श्रीजगन्नाथानन्दसरस्वतीनामसन्न्यासि × × न्तर्यामिना प्रकाशितं वेदान्तसारसंग्रहतत्त्वनिर्णयं ब्रह्मभावप्रधानजीवेश्वरब्रह्मैक्यप्रयोजनं वेदान्तरहस्यं नाम वेदान्तप्रकरणं समाप्तं ।
श्रीकृष्णसच्चिदानन्दसान्द्रपादारविन्दतत्त्वविदुपास्यश्रीकृष्णजगन्नाथश्रीचरणार्पणमस्तु । ॐमस्तु तथास्तु ॥

विषयः। ब्रह्मभावप्रधानजीवेश्वरब्रह्मैक्यनिरूपणादिकं ॥

No. 281. वेदान्तव्याख्या (अभिनवचन्द्रिका) By सत्यनाथयति । Substance, country-made paper, 11×3 inches. Folia, 500. Lines, 12 on a page. Character, Nāgara. Date ? Place of deposit, Benares City. Paṇḍit Vāmanācārya Bibihāṭi. Appearance, old. Worm-eaten. Prose. Correct.

Beginning. अस्य प्रथमाध्यायो नास्ति ।

सीतया सहितं मूलं रामं इक्ष्वाकुपूजितं ।
आनन्दतीर्थमुनि × नमामि ज्ञानसिद्धये ॥
यदनुग्रहमात्रेण सद्भिरिष्टमवाप्यते ।
भक्त्या नमामि तं सत्यनिधिं लोकगुरुं मुदे ॥

End. अतो ज्ञानिनां प्रतिबन्धाभावे मोक्षस्यादूरत्वात् उक्तं युक्तमिति मोक्षमार्ग- + + + + चक्रे स्वतोभिः नवचन्द्रिका, + + + + दोषारामचन्द्रस्य तृतीयाध्यायसङ्गता .

Colophon. इति श्रीमत्सत्यनिधितीर्थश्रीचरणाराधकश्रीमत्सत्यनाथयतिविरचितायां अभिनवचन्द्रिकायां तृतीयाध्यायः ।

विषयः । वेदान्तव्याख्या .

No. 282. वेदार्थसंग्रहः By रामानुजाचार्य्य । Substance, country-made paper, 12 × 5 inches. Folia, 40. Lines, 13 on a page. Extent, 1520 slokas. Character, Nāgara. Date ? Place of deposit, Purī, Rājagopāla Maṭha. Mohanta Śrī Raghunandana Rāmānuja Dāsa. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीमते रामानुजाय नमः ।

अशेषचिदचिद्वस्तु-शेषिणे शेषशायिने ।
निर्म्मलानन्तकल्याणनिधये विष्णवे नमः ॥
परं ब्रह्मैवाज्ञं भ्रमपरिगतं संसरति तत्
परोपाध्यालीढं विवशमशुभस्यास्पदमिति ॥
श्रुतिन्यायापेतं जगति विततं मोहनमिदं
तमो येनापास्तं स हि विजयते यामुनमुनिः ॥

अशेषजगद्धितानुशासनश्रुतिनिकरशिरसि समधिगतोयमर्थः । जीवपरमात्म या × याथात्म्यज्ञानपूर्व्वकवर्णाश्रमधर्म्मेतिकर्त्तव्यताकपरमपुरुषचरणयुगल-ध्यानार्चनप्रणामादिरत्यर्थ प्रियस्तत्प्राप्तिफलः । इत्यादि ।

End. भक्त्यात्वनन्यया शक्य इत्यनेनैकार्थ्यात् भक्तिरपि ज्ञानविशेष एवेति सर्व्वमुपपन्नं ।

सारासारविवेकज्ञा गरीयांसो विमत्सराः ।
प्रमाणतन्त्राः सन्तीति कृतो वेदार्थसंग्रहः ॥

Colophon. इति श्रीमद्भगवद्रामानुजाचार्य्यविरचितो वेदार्थसंग्रहः समाप्तः । राम । राम । राम ।

विषयः । उपनिषत्सारसंग्रहणेन विशिष्टाद्वैतमतस्य दृढ़ीकरणं ।

No. 283. वैकुण्ठविजयः By अमरमाणिक्य । Substance, country-made paper, 15×4 inches. Folia, 12. Lines, 5 on a page. Extent, 350 slokas. Character, Bengali. Date ? Place of deposit, Durgāpur, Post Begamganja, *viá* Noākhāli, Paṇḍita Kāśī Candra Nyāyapañcānana. Appearance, old. Prose and verse. Generally correct.

Beginning. नमो दुर्गायै ।

हुङ्कारैर्दानवानां कुलकमलसुखीभूयस्त्यान्ध्वंसः
कल्पान्तस्फूर्जदुग्रद्युमणिशतसमुद्दीप्तनेत्रातिभीमः ।
दीर्णब्रह्माण्डभाण्डः खरतरनखरैः क्षुण्णभूखण्डचण्डः
पातु त्वां दैत्यनाथप्रमथनजनताभीतिहारी नृसिंहः ॥

अपिच । हृत्वैरिपुरं गतं प्रियजनं ज्ञात्वा द्विजेन्द्राननाद्
विक्रान्तैः सह बन्धुभिः प्रसभतस्तत्रैव गत्वा भृशं ।
त्रैलोक्याश्रुतपूर्व्वमद्भुततरं युद्धं विधाय स्वयं
जित्वा रक्षकुलं+ मेत्य मुदितो रामः शिवायास्तु वः ॥
नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण । समन्तादवलोक्य सोल्लासं ।
अहो
इन्दीवरायतविलोचनराजमाना
स्वैरं विकाशिकुमुदस्मितमादधाना ।
सीमन्तिनीव शरदम्बुजसुन्दरास्या
नेत्रोत्सवं वितनुते विमलाम्बरश्रीः ॥
प्रविश्य पारिपार्श्विकः । भाव अद्य खलु तुहिनकरकिशोरशेखरहृदय-क्षमाया देव्या नीराजनमहोत्सवविधानार्थं विहितकेलीसमरसमुद्भूत-परमानन्दकन्दलीभिर्महीपतिमण्डलीभिः सबहुमानं बहुधा व्याहृत्य त्वदन्तिकं प्रेषितोऽस्मि ।
सूत्र । सहर्षोत्कण्ठं । मारिष किमाज्ञप्तं ।
पारि । भाव,
तादृग्विश्रुतवीरविक्रमकथासन्दोहसम्भावितं
काव्यं नव्यमुपास्य नः खलु नवप्रीतेः समुत्पादनात् ।
आसुख्यातिलता तथाहि भवता सम्बर्द्धनीया यथा
स्वैरं विश्वविलक्षणानि बहुशो धातुः फलानि स्फुटं ॥

सूत्र। शिरसि निहितोऽयं राज्ञामादेशः। इति विमृशति। + + +
+ + + मारिष। यादृश एव महीमहेन्द्राणामादेशस्तादृशप्रबन्धस्मृति-
कल्पवल्लरीसन्ततोऽभूत्मे मनःशाखी।
पारि। सहर्षं। कतमस्तावत् + + + भावेन।
सूत्र। सवज्ञमानं। मारिष। मारिष।
लक्ष्मीरूपेव नित्यं त्रिजगदघभया + + + + न्निकासे
वाराणी यत्र देवी सुरगुरुसदृशाः सन्ति सन्तोष्यसंख्याः।
वीराः संग्रामधीरा कलितकुलमनः + + + +
+ + झंकारभूता जगति विजयते भोजुयाराजधानी॥
तस्या हि। आसीदशेषधरणीरमणैकमान माणिक्यतामधिगतः प्रबलप्रतापः।
निःशेषकौशलयुतो गुरुकल्पवीरः श्रीलक्ष्मणः क्षितिपतिर्जगदेकवीरः॥
+ + + तस्य महीमहनीयमहिम्नो महाराजस्य श्रेयान् सूनुः श्रीमान्।
जननयनचकोरानन्दने शीतभानुः प्रतिभटसमुदायारण्यदाहे कृशानुः।
सुजनकमलराजीरञ्जने चण्डधामा जयति धरणिजानिर्धन्यमाणिक्यनामा॥
+ + + + + + + तदनुजन्मना श्रीयुतामरमाणिक्येन विरचितो-
ऽभिनवोऽतिसुभगो वैकुण्ठविजयो नाम प्रबन्धस्तदभिनये नैपुण्यशालिभि-
रस्माभिरनुरञ्जनीया राजान इत्यत्र न संशयः॥ इत्यादि॥

End. तदहमिदानीं कालात्ययेन गच्छ तावत् तूर्णमेव द्वारवतीमासाद्य समुप-
स्थितवृत्तान्तमशेषतो मुकुन्दाय निवेदयामि।
सुनकः। यदादिशति भगवान्। इति निष्क्रान्तौ।

Colophon. इति श्रीयुतामरमाणिक्यविरचिते वैकुण्ठविजयनामनाटके सन्निवद्धानि-
रुद्धो नाम द्वितीयोऽङ्कः। अतः परं नास्ति॥

विषयः। बाणदुहितामुषां कामयमाने प्रद्युम्ने बाणपुरीं गते बाणेन च संरुद्धे माधवस्य बाणजयाय बाणपुरगमनं तस्य पराजयश्च। तत्र प्रथमाङ्के संलक्ष्यसङ्कटप्रादुर्भावो नाम प्रथमोऽङ्कः।

No. 284. वैश्वदेवबलिः। Substance, country-made paper, 8 × 4½ inches. Folia, 9. Lines, 8 on a page. Extent, 90 ślokas. Character, Devanāgara. Date Saṃvat 1834. Place of deposit, Benares City, late Babu Hariścandra. Appearance, old. Prose and verse. Incorrect.

Beginning. श्रीसामवेदगणपतिभ्यां नमः ।

अथ वैश्वदेवबलिविधिः आचमनं, प्राणायामः, अपवित्रद्रत्युचार्य्य वैश्वदेवोपहाराणां पवित्रतास्तु देशकालपाकपात्रद्रव्यशुद्धिसंपदोस्तु, ओम् अद्येति पञ्चाङ्गं कृत्वा + + + + पञ्चसूनाजनितदोषनिवृत्यर्थं वैश्वदेवबलिमहं करिष्ये.

End. प्रमादात् कुरुते कर्म्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव श्रीविष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

Colophon. इति वैश्वदेवबलिः सामवेदस्यकौथुमीशाखायां पञ्चसूनापहयज्ञविधिः. संवत्— १८३४ .

विषयः । सामवेदान्तर्गतवैश्वदेवबलिकथनं .

No. 285. वैष्णवधर्म्मसंग्रहः । Substance, country-made paper, 11 × 4 inches. Folia, 10. Lines, 11 on a page. Extent, 250 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, late Hariscandra Bābu. Appearance, old. Prose and verse. Correct.

Beginning. श्रीगोपीनाथाय नमः ।

अथ तिलककरणम् तत्र ब्रह्माण्डपुराणे दानधर्मे च
जाह्नवीतीरसम्भूतां मृदं मूर्ध्ना बिभर्त्ति यः ।
बिभर्त्ति रूपं + + + तमोनाशाय केवलं ॥
ब्रह्माण्डपुराणे,
पर्व्वताग्रे नदीतीरे समच्चे विशेषतः ।
सिन्धुतीरेऽथ वल्मीके तुलसीमूलमाश्रितं । इत्यादि

End. श्रीभगवान्, नारदं प्रति,
नाहं वसामि वैकुण्ठे योगिनां हृदये न च ।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥
गायते नृत्यतेऽपि वा + + + + + + ।
कुलकोटिसमायुक्तो लभते मामकं पदम् ॥

Colophon. शुभमस्तु श्रीहरये नमः .

विषयः । वैष्णवधर्मव्याख्यानम् .

No. 286. शत्रुञ्जयमाहात्म्यम् by धनेश्वर । Substance, country-made paper, 12×4 inches, Folia, 387. Lines, 12 on a page. Extent, 7,620 slokas. Character, Nāgara. Date Saṃ 1847. Place of deposit, Benares City. Dinmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, old. Verse. Correct.

Beginning. अर्हन्नमो भगवते । श्रीयुगादिजिनेन्द्राय ।
ॐ नमो विश्वनाथाय विश्वस्थितिविधायिने ।
अर्हते ब्रह्मरूपाय युगादीशाय योगिने ॥

End. मिथ्यात्वघनदारुरोरिविजयप्राप्तप्रतापोत्करो
भव्यो बोधकरो दुरन्तदुरितध्वान्तत्रि + तस्करः ।
गोभिः स्वस्य विबोधिताङ्ग्रिकमलः प्रोन्मीलदंशूज्ज्वलः
पायादादिजिनो रविः प्रतिदिनं सिद्धोदयाद्रिस्थितः ॥

Colophon. इत्याचार्यराजमच्छीयश्रीधनेश्वरसूरिविरचिते श्रीशत्रुञ्जयमाहात्म्ये श्रीपार्श्व-
नाथादिमहापुरुषचरित वर्णनं नाम चतुर्दशसर्गः । सम्पूर्णः । संवत्–१८४७
चैत्रे मासि ।

विषयः । जैनशत्रुञ्जयमहातीर्थमाहात्म्यवर्णनम् ।

No. 287. शब्दमणिप्रकाशः by गोपीनाथ हरिहर । Substance, palm leaf, 14×2 inches. Folia, 69. Lines, 6 on a page. Extent, 2890 slokas. Character, Uriyā. Date ? Place of deposit, District Purī, Pargaṇā Rāhān, Grāma Jagannāthavidyādharapura, Paṇḍita Rāmacandra Miśra. Appearance, old. Prose. Generally correct.

नानाकोविदसम्मतानि नितरां प्रागम्य वागम्यता-
न्याधायातितमां हृदि प्रतिपदं नत्वा च नारायणं ।
दीप्तिं भूरिचमत्कृतिं वितिमिरां तुर्य्यस्य चिन्तामणे-
र्गोपीनाथसुधीः प्रबोधजननीमुद्भावयत्यद्भुतं ॥
प्रेक्षावत्प्रवृत्त्यङ्गप्रयोजनज्ञानाय प्रयोजनघटितैकवाक्यताज्ञानार्थं सङ्गतिं
च शब्देन प्रदर्शयन् शिष्यावधानाय शब्दनिरूपणं प्रतिजानीते अथेति ।
इत्यादि ।

End. वस्तुतः प्रमाणमेव नेत्यत्र तात्पर्य्यं ऐतिह्यमिति वटे वटे वपयतीत्यादिस्थले ॥
इति श्रीहरिहरदासभट्टाचार्य्यप्रणीतः शब्दमणिप्रकाशः ।

विषयः । शब्दखण्डटिप्पनं ।

No. 288. शब्दमणिप्रकाशः By हरिदासः न्यायालङ्कारः । Substance, country-made paper, 10×1½ inches. Folia, 125. Lines, 6 on a page. Extent 3750 slokas. Character, Bengali. Date ? Place of deposit, Deopārā, Post Candragaiya *via* Noākhāli, Pandita Hara Mohan Ṭhākur. Appearance, very old. Prose. Generally correct.

Beginning. ॐ नमो दुर्गायै । ॐ नमः सरस्वत्यै ।
नत्वा श्रीजगदानन्दं हृदि कृत्वा गुरोर्गिरः ।
तुरीयमणिसम्बन्धो रहस्यार्थः प्रकाश्यते ॥
शब्दोपजीव्यस्य शक्तिज्ञानस्य शक्तशक्त्योर्पस्थितेश्च प्रत्यक्षादिप्रमाण + + + नन्तरं शब्दनिरूपणं शिष्यावधानाय प्रतिजानीते अथेत्यादि यद्यपि शब्दत्वावच्छेदेनोपजीव्यताविरहवदुपमानत्वावच्छेदेनापि शब्दोपजीव्यत्वविरहः असुकपदशमसुककारणमित्यादौ तादृशप्रत्यक्षानन्तरं जातिविशेषपुरस्कारेण कारणताया उपमानेन ग्रहात् एवमुपमानत्वावच्छेदेन शब्दोपजीवकतायाः । कीदृक् स वय इति प्रश्नानन्तरं चित्रलेखादिना आभिप्रायिकशब्दानुमानेऽपि मानसतादृशज्ञाने सम्भवः ॥ इत्यादि ।

End. अन्वयप्रकारविभक्त्यादेरन्वयप्रकारोपस्थापकविभक्त्यादेः समयादीनप्रावृत्तिकत्वेन शब्दचेष्टयोर्विभागः तथा चेष्टातोऽ × मर्थं प्रत्येमीत्यनुभवति विजातीया प्रमैव चेष्टासहकार्य्यपि विलक्षणं तत्र कल्प्यमिति तु नव्याः न प्रमाणानन्तरमिति प्रमाणान्तरस्याशङ्कितत्वादिदमुक्तं वस्तुतः × × × × तात्पर्य्यं । ऐतिह्यामिति × × × × × इत्यादिस्थले ।

Colophon. इति महामहोपाध्यायन्यायालङ्कार श्रीहरिदासभट्टाचार्य्यविरचितः शब्दमणिप्रकाशः समाप्तः । × × × × ×
भग्नपृष्ठकटिग्रीवास्तब्धदृष्टिरधोमुखः ।
दुःखेन लिखितं ग्रन्थं पुत्रवत् प्रतिपालयेत् ॥
श्रीरामः । यथादृष्टेत्यादि परिहारमात्र ।—

विषयः । शब्दखण्डस्य व्याख्यानं ॥

No. 289. शब्दरत्नाकरः By साधुसुन्दरगणि । Substance, country-made paper, 12×4 inches. Folia, 26. Lines, 15 on a page. Extent, 1040 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, old. Verse. Correct.

Beginning. अथार्हतो गुरून् प्राज्ञान् वाग्देवीमपि भक्तितः ।
शब्दरत्नाकरं कुर्वे शब्दभेदार्थसंग्रहम् ॥

End. अथः मान्तं + + + + एव्वर्थेषु नयोयमी ।
कथिताः संशयारम्भभाषाकल्पे समुच्चये ॥
अनन्तरार्थे च तथा प्रतिज्ञाप्रश्नयोरपि ।
अथादेशेऽधिकारार्थे मङ्गले गंध कं सुखे ॥

Colophon. इति + + श्रीसाधुकीर्त्युपाध्यायशिष्यार्णां शिष्यलेशेन वा + + + + नाचार्यसाधुसुन्दरगणिना विरचितायां शब्दरत्नाकरशब्दप्रभेदनाममालायां सामान्यकाण्डः षष्ठः ।

विषयः । प्रथमः अर्हत्काण्डः, द्वितीयः देवकाण्डः, तृतीयः मानवकाण्डः, चतुर्थः तिर्यक्काण्डः, पञ्चमः नरककाण्डः, षष्ठः सामान्यकाण्डः ।

No. 290. शब्देन्दुशेखरज्योत्स्ना By उदयङ्कर । Substance, country-made paper, 10×3½ inches. Folia, 132. Lines, 10 on a page. Extent, 3960 slokas. Character, Nāgara. Date ? Place of deposit, Patna-City-Cak, Paṇḍita Jayanārāyāṇa Vājapeyi. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।
वाग्देवीं मानसे कृत्वा गङ्गामाध्यानमङ्गलां ।
शब्देन्दुशेखरज्योत्स्नौमातनोत्युदयङ्करः ।
पातञ्जल इति अत्र महाभाष्ये इत्येतावदुक्तौ शारीरकसूत्रभाष्यादावपि-व्याप्तिरतः पातञ्जल इति ।

End. अन्ते चष्टितं ।

विषयः । शब्देन्दुशेखर व्याख्यानम् ।

No. 291. शब्देन्दुशेखरपरिभाषाटीका (त्रिपथगा)। Substance, country-made paper, 10 × 4 inches. Folia, 63. Lines, 10 on a page. Character, Nāgara. Date ? Place of deposit, Patna City, Paṇḍita Jayanārāyāṇa Vajāpeyi. Appearance, new. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ॥

पुरातङ्क्षिसुराधिपप्रमुखसेवितं दैवतं पुरातनगिरा स्तुतं

+ + + सरधराधरप्रवरनीलधराधरं॥

श्रीवेङ्कटेशं पितरं सर्व्वतन्त्रविशारदं ।

सावित्रीं मातरं नौमि गुरून् विद्याप्रदांस्तथा ।

वितन्यते त्रिपथगा विष्णुपादाब्जसङ्गिनी ।

सागरस्य प्रिया चेन्दुशेखराङ्कविहारिणी ॥

प्रारिप्सितग्रन्थसमाप्तिप्रचयात् + + + + + निबध्नाति ।

नलेति नागेश इति ननु आत्मनामेति निषेधाद्युक्तमिदमिति चेत् ॥

End. असति बाधके प्रमाणानां सामान्ये पक्षपातः। शिष्यमाणं लुप्यमाना-र्थाभिधापि प्रयुक्तानां अन्वाख्यानं यथालक्षणमप्रयुक्ते तेन वक्तीत्यादि न प्रयोगः मूलत्वात् व्याकरणस्मृतेर्न्यायमूलैषा। अजहत्स्वार्थाकृतिर्जहत्स्वार्था च जहत्स्वार्था तु तत्रैव यत्र रूढिः अन्यत्र सर्व्वत्र इति त्रिपथगा समाप्ता ॥

श्रीशिवाय नमः ।

विषयः। संक्षेपेण शब्देन्दुशेखरपरिभाषाया व्याख्यानम्।

No. 292. शब्देन्दुशेखरव्याख्या (भावप्रकाशिका)। Substance, country-made paper, 13 × 5 inches. Folia, 87. Lines, 9 on a page. Extent, 2436 slokas. Character, Nāgara. Date ? Place of deposit, District Chāprā, Sisoyā, Paṇḍita Rāghavaprasāda Miśra. Appearance, new. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।

शिवं शिवेशं शिवदं शिवाश्रयं

शिवाङ्गगं शैवशिवोपशोभितं ।

शिवं शिवेच्छारतभीतमङ्गकं

शिवोपदेशारमनन्तकं नुमः ॥

शेषालङ्कारकं दुर्गरभोमाकान्तया युतं ।

गुरुं नत्वा चाश्रयेच शब्दरत्नेन्दुशेखरं ।

भावप्रकाशिकां व्याख्यां कर्तुं बालदयान्वितः ।

[पायगुण्डाख्यया] ख्यातो वैद्यनाथो यथामति ॥

तत्र तावत् ।

ग्रन्थादौ ग्रन्थमध्ये च ग्रन्थान्ते मङ्गलं चरेत् ।

इत्यादिस्मृत्यादिविधितः + + + + + मङ्गलं निबध्नाति । शेष-विभूषणमिति शेष एव विविधं विशिष्टं वा भूषणं यस्य तं शिवमित्यर्थः ॥

End. ज्ञापकानां तरङ्गः परिभाषा नित्यत्वज्ञापकत्वेति निर्मूलमेवेति भावः तदाह + + + परिभाषेन्दुशेखरे इत्यर्थः । इति परिभाषाप्रकरणं । अतःपरं खण्डितं ॥

विषयः । शब्देन्दुशेखरस्य व्याख्यानम् ।

No. 293. शशधरटिप्पनम् By गुणरत्नगणि (कौटदच्छीयं ग्रन्थः) । Substance, country-made paper, 12×5 inches. Folia, 32. Lines, 22 on a page. Extent, 1,600 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri. Appearance, old Prose. Correct.

Beginning. नमो गौतमस्वामिने ॥

पद्मस्य परया प्रीत्या सच्चिदानन्दमुत्तमम् ।

टिप्पनं क्रियते किञ्चित् ग्रन्थे शशधराभिधे ॥

विशिष्टशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं मङ्गलं शिष्यशिक्षायै निबध्नन् अनुबन्धचतुष्टयं सूचयन्नेव चिकीर्षितं प्रतिजानीते ध्वंसितेति ।

End. निदिध्यासनन्तु अनुमितार्थप्रवाहीकरणं पुनःपुनरनुसन्धानं तेन योगप्रत्यासत्तिविशेषलेन साक्षात्कारः ।

Colophon. इति शशधरटिप्पणे + + + गुणरत्नगणिविरचिते शब्दस्यातन्त्रवादः समाप्तः ।

विषयः । शशधरग्रन्थव्याख्या । असम्पूर्णोऽयम् ।

No. 294. शाङ्खायनसूत्रभाष्यम् । Substance, country-made paper, 14×5 inches. Folia 144. Lines, 15 on a page. Extent, 5,760 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa Appearance, very old. Prose. Correct.

Beginning. ॐ नमो गुरुगोविन्दगौरीगणपतिभ्यः ।
व्याख्यातोऽग्निष्टोमः प्रकृतिर्द्वादशाहस्यैकाहानाञ्च ।
योऽयं व्याख्यात ऋत्विग्वरणप्रभृत्युदवसानीयापर्य्यन्त एषोऽग्निष्टोमसंज्ञः स
वा एषोग्निष्टोम इत्येवमादिश्रुतेः प्रथमसोमश्चायं ।

End. अतिशयसुपभोगसम्बद्धमित्येतदाप्नोति य एवं वेदा द्विरभ्यासोध्यायसमाप्तौ
शिष्टाचारस्तदाचरणं चायुष्यमिति ।

Colophon. इति शांख्यायनसूत्रभाष्ये षोड़शोध्यायः समाप्तः ।

विषयः । शांख्यायनसूत्रव्याख्या ।

No. 295. शारीरकन्यायरक्षामणिः By अप्पयदीक्षित । Substance, country-made paper, 11½ × 3 inches. Folia, 290. Lines, 11 on a page. Extent, 7600 ślokas. Character, Bengali. Date ? Place of deposit, Purī, Śāṅkara Maṭha. Appearance, old. Prose. Generally correct.

Beginning. नमोगणेशाय ।
उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥
यस्याङ्करागमविदः परिपूर्णशक्ते-
रंशे कियत्यपि निविष्टममुं प्रपञ्चं ।
तस्मै तमालरुचिभासुरकन्धराय
नारायणीसहचराय नमः शिवाय ॥

End. अथातो ब्रह्मजिज्ञासा । अत्र शास्त्रारम्भोपयोगिब्रह्मा × कलक्षण-
विषयप्रयोजनविरोधिनः कर्तृत्वादिबन्धस्याध्यासात्मकत्वप्रदर्शनेन तदुभयो-
पपादनद्वारा शास्त्रारम्भः समर्थ्यते । इत्यादि ।
मायिकविकाराणां तात्त्विकनिर्विकारत्वप्रतिक्षेपकत्वस्य × × × ×
पाख्यानादिषु लोके च प्रसिद्ध × × स्यात् सिद्धं ब्रह्म जगतो निमित्तमुपा-
दान × ति युक्तं ब्रह्म × उपलक्षणम् । इति न्यायरक्षामणौ चतुर्थः पादः ।

Colophon. इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभ-श्रीमदद्वैतविद्याचार्य्य-श्रीविश्वजिद्-याजि-श्रीरङ्गराजाध्वरिसूनोरप्पयदीक्षितस्य कृतौ शारीरकन्यायरक्षामणौ प्रथमाध्यायस्य तृतीयपादः एवं द्वितीयपादोपि॥

विषयः। शङ्कराचार्य्यकृतस्य शारीरकभाष्यस्य टीकेयं।

No. 296. शिवचूडामणिः By दामोदरसमाधि। Substance, palm-leaf, 11 × 1½ inches. Folia, 62. Lines, 4 on a page. Extent, 732 slokas. Character, Uriā. Date ? Place of deposit, Purī, Śāṅkara Maṭha. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गुरवे।

अम्बाश्लिष्टवामाङ्गं वन्दे चन्द्रक × रकं।
लावण्यमधुराकारं करुणारसवारिधिं॥
ग्रन्थारम्भे शिवं नत्वा दामोदरसमाधिना।
शिवचूडामणिर्नाम बालबोधाय हेतवे॥
नत्वा गुरोः पदद्वन्द्वं ब्रह्मादिसुरवन्दितं।
अज्ञानसिन्धुनाशाय ज्ञानाय गुरवे नमः॥
देव्युवाच।
देवदेव महादेव कृपया वद मे प्रभो।
येन विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः॥
श्रीमहादेव उवाच।
शृणु देवि प्रवक्ष्यामि रहस्यमतिगोपनं।
येन विज्ञानमात्रेण नरो मुच्येत बन्धनात्॥
कैलास-पर्व्वते रम्ये नानावृक्षसमाकुले।
तत्र संस्थं महादेवं दुर्गया सह निश्चितं॥
... ...
रत्नमण्डपसम्भूते सूर्य्याग्निचन्द्रसन्निभे।
तन्मध्ये वेदिका देवि नानावर्णविभूषिते॥
तस्या मध्ये महापद्मं सदसद्दलसंयुतं।
नानावर्णसमायुक्तं शिवस्थान मनोहर। इत्यादि।

End. इदं मन्त्रं बिना ब्रह्मन् ब्रह्मज्ञानी भवेद् यदि ।
तस्य मुक्तिर्न जायेत श्चदीचित्तस्य विप्रवित् ॥ (?)

Colophon. इति शिवचूड़ामणौ द्वादश उल्लासः ।

विषयः । इति शिवचूड़ामणौ प्रथमोल्लासः । इति शिवचूड़ामणौ ब्रह्मनारदसम्वादे द्वितीयोल्लासः । इति शिवचूड़ामणौ तृतीयोल्लासः । इति शिवचूड़ामणौ गोपालस्तोत्रं समाप्तं । इति शिवचूड़ामणौ ब्रह्मनिरूपणे चतुर्थोल्लासः । इति शिवचूड़ामणौ पञ्चमोल्लासः । इति शिवचूड़ामणौ षष्ठोल्लासः । इति शिवचूड़ामणौ सप्तमोल्लासः । इति शिवचूड़ामणौ अष्टमोल्लासः । इति शिवचूड़ामणौ नवमोल्लासः । इति शिवचूड़ामणौ दशमोल्लासः । इति शिवचूड़ामणौ श्रीस्वर्य्यशतमर्थ्यनिरूपणे एकादशोल्लासः । इति शिवचूड़ामणौ द्वादशोल्लासः ।

No. 297. शिवताण्डवटीका By प्रेमनिधिशर्म्मा । Substance, country-made paper, 11 × 5 inches. Folia, 116. Lines, 13 on a page. Character, Nāgara. Date ? Place of deposit, Patna-City-Cak. Paṇḍita Jayanārāyaṇa Vājapeyī. Appearance, tolerable. Prose. Incorrect.

Beginning. श्रीत्रिपुरसुन्दर्य्यै नमः ।

स्वभक्तत्वावेष्य प × सुररक्तत्वविरहात् । (?)
स्वयाल्पत्वं मत्वा रुचिरतमकामाननुजनं ॥ (?)
+ + + + +
मात्त्विमत्याः कमपि भज चेतः प्रतिदिनं ॥ ?
कौबेर्य्यां दिशि नाकमेत्यभिधया ख्यातोऽस्ति कश्चित् गिरिः
गण्डक्याः सविधे हि तत्र नृपतिः श्रीसाहमल्लोऽभवत् ।
यं प्राप्यास्तभानुभानुवल्लभत्कन्दर्पकल्पद्रुता-
सन्देहं वङ्कवेदिनोपि मनुजा श्चाकल्पमापेदिरे ॥
तस्मात् जातः श्रीघनश्याममल्लस्त्यक्त्वा तातं राज्यलक्ष्म्या यदत्र ।
अभ्यायातम् स्वचितं नद्विनाम्नो वासोनास्याः श्रीघनश्यामदेवात् ।
तदीयः सुतः श्रीमल्ले× ×नामा नृपालः स्ववंशावतंसो भवतः । ?
वरेण्यं यमिच्छन्ति सन्तोऽयमीशो जयत्यर्थिसार्थार्थितायुष्टद्भिः ॥
सत्यास्तन्त्वगिरो भवन्ति तदनुध्यानेन तत्स्या गुणा
धातर्य्येवमसौ नृपो भगवतः श्रीरामचन्द्रस्य यत् ।

ध्यानादेककलत्वता सुरवरा वामोन्नसदृत्त्वता
ग्रमुख्यापकतादिनिजगुणानासादयत्युत्तमान् ? ॥
स्वपालिनादिष्टो निजगुरुकृपाप्रापितबलः
प्रभोर्माचिस्मत्याचरणनखशीतांशुकिरणैः ।
गतायातश्चानप्रजनितिमिरशब्दार्थनिकरं
कथं वा नो कुर्य्यादयमपि जनो यत्नममलं ॥
शिवताण्डवयन्त्राणां यन्त्रार्थादर्शतां गतः ।
मन्त्रादर्शः कृतः सोऽयं संरक्षयतु पण्डितान् ।

End. क्वचित् फलव्यतिरेकदर्शनन्तु कर्तृवैगुण्यादितः शक्यमुपपादयितुं तस्माद-वश्यमेव यन्त्रादिप्रयोगैः श्रीगुरुचरणकरुणायाः सम्यक् विदितविधिकैः यथोक्तविधिनानुष्ठितैः साधकः स्वसमीहितं उपलभ्य कृतकृत्यो भवती-त्यलमनल्पजल्पनेन ॥ × × × × ।
शिवताण्डवटीकासौ मन्त्रादर्शाभिधाचोर्वी ।
प्रेमनिधिशर्म्मविहिता पूर्णास्मात्तुष्टिदा विष्णोः ॥

Colophon. इति प्रेमनिधिशर्म्मनिर्म्मितो मन्त्रादर्शःसम्पूर्णः ॥ श्रीशाके १०९८ × × × × × लिखितं गजेन्द्रेण ॥

विषयः । शिवताण्डवस्य व्याख्यानम् ॥

No. 298. शिवपुराणं (पूर्व्वखण्डः) । Substance, palm-leaf, 16 × 1⅛ inches. Folia, 163. Lines, 5 on a page. Extent, 3270 slokas. Character, Nāgara. Date ? Place of deposit, Puri, Mahimprakāsa Brahmacāri-Maṭha, Paṇḍita Valadeva Brahmacārī. Appearance, tolerable. Verse. Generally incorrect.

Beginning. श्रीगणेशाय नमः । स्वविघ्नमस्तु ।
ॐमित्येकाक्षरो यो भवति श्रुतिमतः पञ्चधा पञ्चरूपो-
ऽकाराद् ब्रह्मायुकाराद्धरिरनु च हरो × × मादीश्वरोऽथ ।
बिन्दोर्नादात् सदा × शिव इति च परं ब्रह्म यं वेद वेदः
सोऽयं × × गिरीशो भवभयतिमिरध्वंसनायास्तवंशः ॥

मुनिभिर्नैमिषारण्ये पृष्टः सूतः पुराणवित् ।
पुराणं मुक्तिदं शैवं प्रवक्तुमुपचक्रमे ॥
यः पूर्व्वभागे श्रोतृत्वं प्राप्य ज्ञाननिधिर्मुनिः ।
उत्तरे वक्तृतां याति पाराशर्य्यं नतोऽस्मि तं ॥ इत्यादि ।

End. इदं पुराणं परमं पवित्रं शुचिः पठेद् यः शृणुयाच्च यो नरः ।
स सर्व्वकामान् समवाप्य दुर्लभान् शिवस्य चान्ते पदमुत्तमं व्रजेत् ॥
पितॄणां तृप्तिदं श्राद्धे पठ्यमानमिदं ततः ।
इष्टः स्वप्नादिदुष्कर्म्मकलिकल्मषनाशनं ॥
अध्यायमथ श्लोकं वा श्लोकार्द्धं वास्य यः पठेत् ।
शृणुयाद् भक्तियुक्तो वा तस्य प्रीतो भवेच्छिवः ॥

Colophon. इति श्रीशिवपुराणे पूर्व्वखण्डे द्विपञ्चाशत्तमोऽध्यायः । पूर्व्वखण्डः समाप्तः ।
नन्दिपुराणे ।
शैवे सनत्कुमारीये[ये] स्याच्चतुःसाहस्रसंख्यकाः ।
संहिता तु पुनर्व्यासप्रणीता तावती स्मृता ॥
ततः × दशसाहस्रा वायुना समुदीरिता । (?)
चतुर्विंशतिसाहस्रं पुराणं शैवमुच्यते ॥
श्रीशिवदुर्गे अपराध × × ×

विषयः । इति श्रीशिवपुराणे पूर्व्वखण्डे १माध्यायः । इति द्वितीयाध्यायः । इति द्वीपवर्णनो नाम तृतीयोऽध्यायः । इति पातालवर्णने ।४। इति ऊर्द्धलोकवर्णने ।५। इति ब्रह्मगीतोपाख्याने ।६।७।८।९। इति पुरवर्णनो नाम ।१०।११। इति शिवमाहात्म्ये। १२। इति विभीषणसम्वादो नाम ।१३। इति नामकीर्त्तनो नाम ।१४। इति स्थानमाहात्म्यं नाम। १५। इति १६ । इति महेश्वरदर्शनो नाम ।१७। लिङ्गोद्भवो नाम । १८ । इति पुष्पादिदानमाहात्म्यं नाम।१९। इति दानधर्म्मविधिर्नाम ।२०। इति व्रतवर्णने । २१। इति नियमोपदेशो नाम। २२। इति चन्द्रचूड़जन्म × × × २३। इति भूतिकीर्त्तने । २४। इति शिवलिङ्गार्च्चनफलं नाम ।२५ । इति अष्टषष्टितीर्थनामकथने । २६ । इति नन्दीकेश्वरोक्तयोगोपाख्याने ।२७। २८। इति योगोपनिषत्सु ।२९। ३०। इति दुर्वासःशिवसम्वादे योगोपनिषदि । ३१ । ३२। इति नाड़ीसञ्चरयोगोनाम । ३३। इति अविमुक्तमाहात्म्ये । ३४। इति दण्डपाणिवरप्रदो नाम ।३५ । ॐकारेश्वरवर्णनं नाम ।३६। इति अविमुक्तमाहात्म्ये पञ्चायतनकीर्त्तने । ३७। इति ३८। इति नन्द्युपाख्याने ।३९। ४० । इति नन्द्यु-

पाख्याने यमेश्वरमाहात्म्यं नाम । ४१ । इति नन्द्युपाख्यानं । ४२ । इति नन्द्यभिषेको नाम । ४३ । ४४ । इति कार्त्तिकेयचरिते । ४५ । इति त्रिपुरोपाख्याने । ४६ । ४७ । इति कैलासगमनं नाम । ४८ । इति ब्राह्मणमाहात्म्यं नाम । ४९ । इति योगविधौ । ५० । इति ब्रह्मचारो नाम । ५१ । इति । ५२ ।

No. 299. शिवपुराणं (उत्तरखण्डः)। Substance, palm-leaf, 16 × 1½ inches. Character, Uriā. Date ? Place of deposit, Mahimprakāśa Brahmacāri-Maṭha. Appearance, old. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः शिवाय ।

वागीशो दक्षिणाङ्गादजनि मधुरिपुर्व्वामतो यस्य देवा
वाचा यो वै मुनीन्द्रैरजगतहृदयैर्गीयते सामगानैः ।
गीर्व्वाणाः शक्रमुख्यादितिसुतसहिता यं विदुर्नो स्वरूपात्
यः कर्त्ता पाति भोक्ता सकलजगदिदं शम्भवेऽस्मै नमोऽस्तु ।
पुण्यपापविनिर्मुक्ताः नैमिषारण्यवासिनः ।
मुनयः शिवसंकल्पाः सूतं पप्रच्छुरादरात् ॥

मुनय ऊचुः ।

अस्माभिः शिवमाहात्म्यं पुनः × × श्रुतं बहु ।
इदानीं गुणकर्म्माणि पुनर्ब्रूहि विशेषतः ॥ इत्यादि ।

End. शिवपादौ शिवो मध्ये शिवधान्ते प्रकीर्त्त्यते ।
शीघ्राख्यानस्वपाठाच्च शिवं भवतु सर्व्वदा ॥
स्वस्ति गोभ्यो द्विजेभ्यस्तु स्वस्ति राजभ्य एव च ।
स्वस्ति प्रजाभ्यः सर्व्वाभ्यो भवत्वाशु शिवाज्ञया ॥

Colophon. इति श्रीशिवपुराणोत्तरखण्डे पञ्चचत्वारिंशत्तमोऽध्यायः । समाप्तश्चायं शिवपुराणोत्तरखण्डः ।

× × × × ×

इदं पुस्तकं वामदेवानन्देन लिखितं ॥

विषयः । इति श्रीशिवपुराणोत्तरखण्डे भगवादित्यासमस्वादे । १ । इति नन्दिवामदेवसम्वादे लिङ्गोत्पत्तिर्नाम । २ । इति नन्दिवामदेवसम्वादे लिङ्गमाहात्म्यं । ३ । इति

द्वादशज्योतिर्लिङ्गचरिते । ४ । इति त्रिपुरवधे ब्रह्मादीनां हिमवद्गमनं नाम । ५ । ६ । इति त्रिपुराध्यायो नाम । ७ । ८ । इति । ९ । १० । ११ । इति ब्रह्मस्वगवधो नाम । १२ । इति १३ । इति कन्दर्पवधो नाम । १४ । इति रतिवरदानं नाम । १५ इति उमावर-प्रदानं नाम । १६ । इति गौरीविवाहो नाम । १७ । इति तारकवधो नाम । १८ । इति गणेशोत्पत्तिर्नाम । १९ । इति स्कन्दतीर्थयात्रायां । २० । इति नन्दीकेश्वरोत्पत्तिर्नाम । २१ । इति मणिकर्णिकामाहात्म्ये गङ्गोत्पत्तिर्नाम । २२ । इति वाराणसीमाहात्म्ये । २३ । इति...२४ । इति पञ्चक्रोशीयात्रायां महाकालगणोत्पत्तिर्नाम । २५ । इति कीर्त्तिवासा-सुरवधो नाम । २६ । इति विन्दुह्रदोत्पत्तिर्नाम । २७ । इति रासक्रीड़ायां । २८ । इति भुवनेश्वराष्टोत्तरनामशतकं नाम । २९ । इति । ३० । इति वरदाप्रसादो नाम । ३१ । इति मार्कण्डेयप्रसादे मृत्युञ्जयो नाम । ३२ । इति शिवरात्रिमाहात्म्ये निषाद-मुक्तिर्नाम । ३४ । इति । ३५ । ३६ । इति मर्य्यादादानं (?) नाम । ३७ । इति रावण-तपस्विवैद्यनाथोत्पत्तिर्नाम । ३८ । इति रावणमुक्तिर्नाम । ३९ । इति तण्डिवामदेव-सम्वादे कैलासनिर्णये । ४० । इति युगधर्म्मकथनं नाम । ४१ । इति वामदेवऋषिविमुक्ति-र्नाम । ४३ । इति शिवसम्वादे कल्पभेदनिर्णयो नाम । ४५ । इति ४५ ।

No. 300. शिवार्चनचन्द्रिका By श्रीनिवास। Substance, country-made paper, 12 × 5 inches. Folia, 22. Lines, 9 on a page. Extent, 616 ślokas. Character, Nāgara. Date ? Place of deposit, District Chāprā, Sisoya, Paṇḍita Rāghava Prasāda. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।

श्रीमन्तं सिन्दुरास्यं शशिशकलधरं × × गौवाभिरामं
दानाद्भिः सिक्तगण्डस्थलकमलदले भान्त × × × × × ।
प्रत्यूहध्वान्तभानुं पृथुतरज (?) चरं ब्रह्मविष्ण्वीशवन्द्यं
वन्दे सिन्दूरपूरे गिरिवरसुतया चर्चितो × × कुम्भां ॥
\+ + + +
\+ + + +
आसीदशेषगुणरत्ननिधिः पृथिव्यां ।
श्रीश्रीनिकेतन इति प्र(ति)थितोऽध्वरीन्द्रः ॥

तत्सूनुः श्रीनिवासः सकलनिगमवित् सर्व्वशास्त्रार्थवेत्ता
श्रौतस्मार्त्तेषु कर्म्मस्वतिशयनिपुणः सत्कविः स्वोपदेशात् ।
पीठं जालन्धराख्यं प्रकटितविभवं प्राप्य यात्राप्रसङ्गात्
तत्र श्रीसुन्दराख्यं सकलगुणनिधिं प्राप्य सद्देशिकेन्द्रं ॥
तत्पादपङ्कजयुगं परिचर्य्य तस्मात्, प्राप्याभिषेकमखिलागममप्यधीत्य ।
तस्याज्ञया समधिगम्य पुरीं स काशीं, तत्राकरोद्वसतिमात्मविदां वरिष्ठः ॥
तत्र स्थितः सकलतन्त्ररहस्यवेत्ता, शिष्यैः शिवार्च्चनपरैः श्रितशैवदीक्षैः ।
अभ्यर्थितो वितनुते सकलागमार्थसारोदयं भुवि शिवार्च्चनचन्द्रिकां सः ॥
तत्र दीक्षाविधिं वक्तुं आदौ श्रीगुरुलक्षणं इत्यादि ।

End. अन्ते अपूरितः ॥

विषयः । गुरुलक्षणकथनं । सद्सच्छिष्यलक्षणकथनं । गुरुशिष्ययोः परीक्षाकथनं । दीक्षाकालादिनिरूपणं । दीक्षाधिकारकथनं ॥ ब्रह्मक्षत्रादीनां मन्त्रभेदकथनं । वर्णसङ्कराणां अधिकारविचारकथनं । मन्त्राणां लिङ्गादिनिरूपणं ।

No. 301. शुद्धिचन्द्रिका By कालिदास । Substance, palm-leaf, 15 × 1½ inches. Folia, 5. Lines, 3 on a page. Extent, 60 ślokās. Character, Uriā. Date ? Place of deposit, Purī, Parganā Rāhān, Grāma Śāsanadāmodarapura, Paṇḍita Sadāśiva Kāvyakaṇṭha. Appearance, tolerable. Verse. Correct.

Beginning. विप्रक्षत्रिययोः सपिण्डजनने शुद्धिर्दशद्वादशा-
होराभिरथ पञ्चकोपरि विशः शूद्रस्य मासात्परं ।
पुत्रीमज्जननेऽथ सर्व्वजननीस्वर्गे दशाहाच्छुचिः
कर्म्मार्हो द्विदशाहतः पुरुषस्त्रर्मासात्परं स्त्रीप्रसूः ॥ इत्यादि ।

End. स्वं वर्णञ्च वदेद् वदेदनुगतः स्पृष्ट्वा शवात्मा वदन्
स्नात्वान्यं यदि तत्समस्त्रिदिवसैर्दग्धेऽस्थिपार्थेनरे ।
चन्योर्निर्हरति अथात्र इवसद्मन्यवासोऽन्नभुक्
तुल्यैः शवसंस्थितिश्च विधिना कृत्वा क्रियां स्याच्छुचिः ॥

विषयः । अशौचनिरूपणानन्तरं तच्छुद्धिनिरूपणं ।

No. 302. शुद्धिचन्द्रिकाटीका By धनञ्जय। Substance, palm-leaf, $15 \times 1\frac{1}{2}$ inches. Folia, 9. Lines, 6 on a page. Extent, 216 ślokās. Character, Uriā. Date ? Place of deposit, Purī, Parganā Rāhān, Grāma, Śāsanadāmodarapura, Paṇḍita Sadāśiva Kāvyakaṇṭha. Appearance, old. Prose and verse. Correct.

Beginning. विप्रो धनञ्जयो नाम स्मृतिमार्गानुसारिणीं ।
करोति केवलां शुद्धिचन्द्रिकापदयोजनां ॥
विप्रक्षत्रिययोरिति । इत्यादि ।

End. तदन्नभुक् चेत् तर्हि तत्तुल्यः ।
अङ्गिराः
अन्तर्दशाहे भुक्तान्नं सूतके मृतकेपि वा
असंस्पृश्यो भवेत्तावत् यावन्न व्रतमाचरेत् ॥ शव इति । ... ...
... ... वस्त्रधावनस्नानादिकं कृत्वा शुद्धिः स्यात् । इति श्रीकालिदास-
चैनेयविरचितशुद्धिचन्द्रिका[टीका] समाप्ता ।

विषयः । शुद्धिचन्द्रिकाव्याख्या ।

No. 303. शुद्धिचन्द्रिकाटीका । Substance, palm-leaf, $15 \times 1\frac{1}{4}$ inches. Folia, 60. Lines, 4 on a page. Extent, 96 ślokās. Character, Uriā. Date ? Place of deposit, Purī, Parganā Rāhān, Grāma, Śāsanadāmodarapura, Paṇḍita Sadāśiva Kāvyakaṇṭha. Appearance tolerable. Prose. Incorrect.

Beginning. अथ कायमनोभ्यामिष्टदेवतानमस्कारपुरःसरं वस्तुनिर्देशमुखेन प्रयोजनाभिधेयं कथयति । सुधीसिन्धुविवर्द्धी कालिदासाख्यः धीरचन्द्रः शुद्धिचन्द्रिकेति ग्रन्थनाम तां तेने इति सम्बन्धः सर्व्वतः सारतया परममाधुर्य्यादिगुणयोगेन मन्वादिधर्म्मशास्त्राण्येव अमृतमिव अमृतं तत्समुद्रस्य आश्रयः अतएव चन्द्रत्वेन निरूपणं । गाम्भीर्य्यादिगुणयोगेन सुधिय एव सिन्धवस्तद्विवर्द्धनशीलः तेषां बुद्धिबोधवृद्धिहेतुत्वात् अज्ञानहेतुत्वेन अशौचमेव ध्वान्तमिव तेन अन्धा ये लोकास्तेषामीक्षणाय दर्शनाय शुद्धिरेव चन्द्रिकेव चन्द्रिका दर्शनहेतुतया शुद्धेश्चन्द्रिकात्वेन निरूपणं ।

तत्र अनियतकालाशौचविधाने तन्नियमार्थं मङ्गलत्वादादौ चतुर्णामपि वर्णानां वर्णक्रमेण जननाशौचस्य शौचलक्षणां शुद्धिं पूर्व्वार्द्धेन निरूपयति विप्रक्षत्रिययोरिति। इत्यादि।

End. ततृततृस्मृतिपुराणेभ्योप्येवमुद्धृतसारवाक्यतोयं संक्षिप्तः तत्त्वाभिधायकोपि शुद्धिविधानग्रन्थः शुद्धिचन्द्रिकाख्यः सज्ज[ना]नां विदुषां परमुपादेय-मित्यर्थः।

Colophon. इति दाक्षवयनवाजपेयिकृतशुद्धिचन्द्रिकाटीका समाप्ता।

विषयः। शुद्धिचन्द्रिकाव्याख्यानम्।

No. 304. शैवकल्पद्रुमः By लक्ष्मीधर। Substance, palm-leaf, 14½ × 1 inches. Folia, 109. Lines, 5 on a page. Extent, 3270 ślokās. Character, Uriā. Date ? Place of deposit, Puri, Śāṅkara Maṭha. Appearance, old. Generally verse. Generally incorrect.

Beginning. श्रीशिवाय नमः। अविघ्नमस्तु।

एकदन्तमुमापुत्रं गजवक्त्रं त्रिलोचनं।
चन्द्रार्द्धधारिणं वन्दे सर्व्वविघ्नविघातये ॥
वन्दे शर्व्वं त्रिभुवनगुरुं सर्व्वलोकाधिवासं।
ब्रह्मोपेन्द्रार्च्चितपदयुगं सोमसूर्य्याग्निनेत्रं ॥
कर्म्म ब्रह्मेश्वर इति सतां सर्गमोक्षस्य लोकान्।
दातारं गोद्विजहितकरं ब्रह्मविष्ण्वादिरूपैः ॥
श्रुतिस्मृतिपुराणानां भारतागमधर्म्मिणां।
भूयात् सुवाक्यवीजाच्च शिवकल्पद्रुमोदयः ॥
गुरुवचनप्रवर्द्धमानो जपनवपल्लवमर्चनप्रसूनं।
फलममृतमयं दधान चाम्य सुखयतु विज्ञखगाहत × यं। (?)
पापपुण्यपथश्रान्ता जनाः सर्व्वे निराकुलाः।
शैवकल्पद्रुमं प्राप्य गतश्रान्ता भवन्तु च ॥
कस्माज्जगत् समुत्पन्नं कारणान्यत्र कानि च।
केषां पूज्यतमं किञ्चिदाद्यावेतन्निरूप्यते ॥ इत्यादि।

End.

शिवधर्म्मोत्तरे ।
यावदक्षरसंख्यानं शिवशास्त्रेषु पुस्तकं ।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥
एवं पालय निर्म्माणलिङ्गस्थापनकादिकं ।
कथितं सर्व्वलोकानां हिताय परमार्थतः ॥
कल्पद्रुमोऽष्टकाण्डोयं विद्वद्भिः परिकल्प्यतां ।
वचनाम्बासनजड़ैर्मूर्खवादवनाश्रितः ॥ (?)
एकाम्रे भुवनेश्वरप्रियकरं चक्रे धरं यः पुरा ।
स्यालाद्वाःस्थसुकुन्दकारणपतिः कुल्यान्वयेऽर्द्धेन्दुकः । (?)
प्रद्युम्नाङ्कय एष शङ्करतनुः साक्षादिति x x x
पादौ यस्य विलोक्य भालनयनं श्रीमान् नृसिंहो नृपः ॥ (?)
तत्पुत्रो मधुसूदनाग्रज x x श्रीतोग्निहोत्री शिवः
ध्यानानन्दविकाशयत्सरसिजश्रीरामलक्ष्माभिधः ।
तस्माद् भूरनयोऽम्बिकापतिमतिर्लक्ष्मीधरो मन्दधी-
स्तेनायं रचितः सतां सुखकरः श्रीशैवकल्पकद्रुमः ॥

Colophon. इति श्रीमदेकाम्रविपिनविदितस्वर्णकूटाचलवीरशिखरकन्दरोदरविनोदिशम्भुवरत्रिभुवनेश्वरपदद्वन्द्वारविन्दमकरन्दपाननिर्भरमत्तमधुकरलक्ष्मीधरविरचिते श्रीशैवकल्पद्रुमेऽष्टमः काण्डः । समाप्तश्चायंग्रन्थः ।

विषयः । आदौ जगत्कारणादिनिरूपणं । इति श्रीशैवकल्पद्रुमे प्रथमः काण्डः । दीक्षानिरूपणं । जपलक्षणकथनं । मण्डपलक्षणकथनं । इति श्रीशैवकल्पद्रुमे द्वितीयः काण्डः । गार्हस्थ्यविधिकथनं । प्रातःकृत्यनिरूपणं । द्रव्यशुद्ध्यादिनिरूपणं । न्यासादिविधिकथनं । इति श्रीशैवकल्पद्रुमे तृतीयकाण्डः । पूजादिनिरूपणं । इति श्रीशैवकल्पद्रुमे चतुर्थकाण्डः पूजाप्रकरणं । पार्थिवलिङ्गार्चनविधानकथनं । भस्मस्नाननिरूपणं । इति श्रीशैवकल्पद्रुमे पञ्चमः काण्डः । व्रतविधिकथनं । इति श्रीशैवकल्पद्रुमे षष्ठः काण्डः । शिवस्तोत्रादिकथनं । इति श्रीशैवकल्पद्रुमे सप्तमः पटलः । शिवमाहात्म्यकीर्त्तनं । इति श्रीशैवकल्पद्रुमे अष्टमः पटलः ।

No. 305. श्यामार्चनतरङ्गिणी By विश्वनाथ । Substance, palm-leaf. Folia, 64. Lines, 5 on a page. Extent, 2176 ślokās. Character, Uriā. Date ? Place of deposit, District Purī, Pargaṇā Rāhān, Grāma Jagannātha-Vidyādharapura, Paṇḍita Rāmacandra Miśra. Appearance, old. Prose and verse. Generally incorrect.

Beginning. × × × ×

निर्मिता विश्वनाथेन श्यामार्चनतरङ्गिणी ।
सर्वतन्त्राम्बुधेः सारभागमाहृत्य शम्भुना ।
× × × शाम्भवी दृष्टिर्निश्चितातीवनिर्म्मला ।
तस्या विविधकर्म्माणि विविक्तानि यथाक्रमं ।
कथ्यन्ते तान्यहोरात्रविहितानि गुरोः कृपात् । (?)
तत्रादौ ब्राह्मे मुहूर्त्ते चोत्थाय गुरवे नमः इति नत्वा इडानाड़ीपदमुत्थाय
यत्नतः बहिर्गत्वा दिशो नत्वा कुलवृक्षान् प्रणम्य च, कुलवृक्षा यथा,
अशोकः केशरः कर्णिकारः चूततिलकस्तथा ।
नमेरुश्च पियालश्च सिन्धुवारकदम्बकौ ।
मरुवकचम्पकाख्यः पिप्पलो वट एव च ।
रम्भा तुलसिका जम्बुः कुलवृक्षा इति स्मृताः । इत्यादि ।

End. प्राणादिमुद्रां प्रदर्श्य × × × आचमनं करशुद्धिं मुखवासञ्च निवेद्य गन्धादिनाभ्यर्च्य शान्तोपचारनैवेद्यं निवेदयेदिति पञ्चप्रोक्षणविधिः ।

Colophon. इत्यद्वैतपथिपथिकेन विश्वेश्वरसोमयाजिना विरचितायां श्यामार्चनतरङ्गिण्यां बलिदानावर्त्ते पञ्चप्रोक्षणविधिः समाप्तः ।

विषयः । ब्राह्मे मुहूर्त्ते प्रथमा वीचिः । प्रातःस्नानविधिविवेचनी द्वितीया वीचिः । स्नानशुद्धानन्तरद्वारपालार्चनक्रमविवेचनी तृतीया वीचिः । आपरोक्षसंहारारोहरूपिणी भूतशुद्धिप्राणायामविवेचनी चतुर्थी वीचिः । अन्तर्यजनावर्त्ते पञ्चमी वीचिः मधुदानविधि-निषेधबाधबाधकविवेचनावर्त्ते षष्ठी वीचिः । घटस्थापनावर्त्ते द्रव्यशुद्धिविवेचनी सप्तमी वीचिः । उपचारविवेचनी अष्टमी वीचिः । पूजाक्रमविवेचनी नवमी वीचिः । होमावर्त्ते कुण्डस्य षड्‌दशसंस्कारविवेचनी दशमी वीचिः । होमावर्त्ते होमप्रकारविवेचनी एकादशी वीचिः । पञ्चप्रोक्षणविधिः । (मध्यतोऽतः परं खण्डितं) ।

No. 306. श्राद्धदीपः By दिव्यसिंहमहापात्र। Substance, palm-leaf, 16×1 inches. Folia, 44. Lines, 5 on a page. Extent, 710 ślokas. Character, Uriā. Date ? Place of deposit, District Purī, Parganā Rāhān, Grāma Śāsanadāmodarapura, Pandita Sadāśiva Kavyakantha. Appearance, fresh. Prose and verse. Generally correct.

Beginning. प्रणम्य देवं श्रीकृष्णं भवानीशङ्करावपि ।
तन्यते श्राद्धदीपोयं दिव्यसिंहेन धीमता ॥
श्राद्धं नाम पितृनुद्दिश्य द्रव्यत्यागः अत्र ब्राह्मणभोजनं पिण्डदानञ्चोभयं प्रधानमिति बहवः । अतएव ।
अग्नौ हुतेन देवस्थाः पितृस्था द्विजतर्पणैः ।
नरकस्थाश्च तृप्यन्ति पिण्डैर्दत्तैस्त्रिभिर्भुवि ॥
इति पिण्डदानब्राह्मणभोजनयोः समकक्षतया फलश्रवणं ॥ इत्यादि ।

End. मन्वन्तराद्यश्चैता मुनिभिः परिकीर्त्तिताः ॥
सिता पञ्चदशी पौर्णमासी वृश्चिके कार्त्तिके मकरे पुष्ये कुम्भे माघे मेषे चैत्रे आषाढ़े पूर्णिमा द्वादशी च ।

Colophon. इति श्रीदिव्यसिंहमहापात्रविरचितः श्राद्धदीपः समाप्तः ॥
वत्सगोत्रसमुत्पन्नो दिव्यसिंहाभिधः सुधीः ।
श्राद्धदीपाभिधं ग्रन्थं कृतवान् कृतिनां मुदे ॥

विषयः । श्राद्धाशौचादिविवेचनं ॥

No. 307. श्रुतप्रकाशिका । (खण्डितान्ता) Substance, country-made paper, 12×5½ inches. Folia, 188. Lines, 12 on a page. Extent, 6770 ślokas. Character, Nāgara. Date ? Place of deposit, Purī, Revasā. Maṭha, Paṇḍita Rāmādhīna Rāmānuja Dāsa. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीमते रामानुजाय नमः ।
वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिं ।
शरण्यं शरणं यामि प्रणतार्त्तिहरं हरिं ॥
बहिरन्तस्तमश्छेदि ज्योतिर्वन्दे सुदर्शनं ।
येनाव्याहतसंकल्पं वस्तु लक्ष्मीधरं विदुः ॥

सम्यङ्न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥
नमो रामानुजाचार्य्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥
वन्देहं वरदाचार्य्यं वत्साभिजनभूषणं ।
भाष्यामृतप्रदानाद् यः सञ्जीवयति मामपि ॥
प्रपद्ये प्रणवाकारं भाष्यं रङ्गमिवापरं ।
परस्य ब्रह्मणो यत्र शेषित्वं स्फुटमिष्यते ॥
स्मृत्यन्तेषु श्रुतं भाष्ये मम ध्वान्तं ह्रदम्बुजे ।
लक्ष्मीपतिं प्रपद्येहं दृष्टं श्रीरङ्गधामनि ॥
गुरुभ्योऽर्थः श्रुतः शब्दैस्तत्प्रयुक्तैश्च योजितः ।
सौकर्य्याय बुभुत्सूनां संकलय्य प्रकाश्यते ॥

... ...

एवं प्रारिप्सितग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थं स्मृत्याचारसिद्धमिष्टदेवतोपासनरूपं मङ्गलं शौनमाचरति अखिलेत्यादिना श्लोकेन । इत्यादि ।

End. कथममतः सञ्जायत इति कथं निराश्रयावस्थासम्भव इत्यर्थः तदैक्षतेति सर्व्वज्ञत्वं बहुजतेति निमित्तत्वं बहु स्यामित्युपादानत्वं तदुभयानुगुणं सर्व्वशक्तित्वं सत्यसंकल्पत्वं चानेन जीवेनात्मनानुप्रविश्येति सर्व्वान्तरत्वं चोक्तं भवति जीवेनात्मना जीवशरीरकेण × × त्यर्थः। (अतः परं खण्डितं ।)

विषयः । श्रीभाष्यव्याख्यानं ।

No. 308. षट्कर्म्मोल्लासः By पूर्णानन्द । Substance, country-made paper, 14 × 5 inches. Folia, 14. Lines, 6 on a page. Extent, 252 slokas. Character, Bengali. Date ? Place of deposit, Madanapura, *viâ* Pingari *viâ* Koṭālipāṛā, Paṇḍita Śrikṛṣṇa Caudhuri. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

षट्कर्मदेवता नत्वा पूर्णानन्देन यत्नतः ।
नानातन्त्रानुसारेण षट्कर्म्मोल्लास उच्यते ॥

विद्वेषः प्रथमे ज्ञेयो द्वितीये भ्रमणं तथा ।
वश्यं तृतीये वक्ष्यामि चतुर्थे स्तम्भनं तथा ॥
पञ्चमे मारणं वक्ष्ये षष्ठे मोहनमीरितं ।
सप्तमे तिथिवारादि नक्षत्राणां विशेषतः ॥
नियमः कथ्यते तद्वदासनानान्तु निर्णयः ।
अष्टमे नवमे मालानियमः कुण्डनिर्णयः ॥
दशमे नायिकासिद्धिर्वीरसाधनमुत्तमं ।
ज्ञानाज्ञानकृतानान्तु पूर्व्वोक्तानाञ्च कर्म्मणां ॥
तेषामेकादशे शान्तिं विधास्ये परमां क्रमात् ।
द्वादशे दक्षिणा ज्ञेया षट्क्रियाणां पृथक् पृथक् ॥
द्वादशैः पाटलैरेतैः षट्कर्म्मोल्लास उच्यते ।
अतिगुह्यतरं वक्ष्ये लोकानां हितकाम्यया ॥

निबन्धे देव्युवाच ।

देवदेव महादेव सर्व्वशास्त्रार्थपारग ।
अधुना श्रोतुमिच्छामि गुह्याद्गुह्यतरं प्रभो ॥
षट्कर्म्म कथितं देव नानातन्त्रे पृथक् पृथक् ।
शीघ्रं वद महादेव समासेन तु तत्क्रमं ॥ इत्यादि ।

End. क्षमस्वेति अग्निं विसृज्य शान्तिकुम्भतोयेनाभिषेकं कृत्वा भस्मतिलकादिकं कृत्वा दक्षिणाच्छिद्रावधारणादिकं कुर्य्यात् ।

Colophon. इति पूर्णानन्दविरचिते षट्कर्म्मोल्लासे कुण्डादिनियमो नवमः पटलः ॥

विषयः । इति पूर्णानन्दविरचिते षट्कर्म्मोल्लासे विद्वेषणाभिधेयः प्रथमः पटलः । इति उच्चाटनाभिधेयः ।२। इति वश्याभिधेयः । ३ । इति । ४ । इति मारणाभिधेयः । ५ । सम्मोहनाभिधेयः । ६ । इति तिथ्यादिनियमः । ७ । इति आसनादिनियमः । ८ । इति कुण्डादिनियमः । ९ ।

No. 309. षट्कर्म्मदीपिका By श्रीकृष्णविद्यावागीश । Substance, country-made paper, 14×4 inches. Folia, 40. Lines, 10 on a page. Extent, 1000 ślokas. Character, Bengali. Date ? Place of deposit, Rājaguru's Maṭha, Gaṇeśamahallā, Benares City. Appearance, new. Verse. Correct.

Beginning. ॐ नमः शिवाय ।

कृत्यादेवीं नमस्कृत्य महात्रिपुरसुन्दरीं ।

भद्रकालीञ्च देवेशीं तथा षट् कर्म्मदेवताः ॥

श्रीकृष्णविद्यावागीशभट्टाचार्य्येण धीमता ।

क्रियते विदुषां प्रीत्यै कृत्यापञ्च (+) दीपिका ।

क्रोधाज्ज्वलन्तीं ज्वलनं वमन्तीं दृष्टिं दहन्तीं दितिजं ग्रसन्तीं

भीमं नदन्तीं प्रणमामि कृत्यां रोषयमाणां तुभयोग्रकालीं ।

End. गवां सुवर्णनिष्काणां भूमिं वा शस्यशालिनीं ।

सर्व्वशान्तिमवाप्नोति सर्व्वरक्षाकृतं भवेत् ॥ (?)

Colophon. इति श्रीकृष्णभट्टाचार्य्यविरचितायां षट्कर्म्मदीपिकायां नवमोपदेशः समाप्तः ।

विषयः । मारणोच्चाटनाद्याभिचारिककर्मोपायकथनम् ।

No. 310. षट्पदीमञ्जरी By शङ्करानन्दतीर्थ । Substance, country-made paper, 10 × 4 inches. Folia, 13. Lines, 11. Extent, 450 ślokas. Character, Bengali. Date S.K. 1646. Place of deposit, Puri, Śāṅkara Matha, Madhusūdana Tirthasvāmi. Appearance, old. Prose. Generally correct.

Beginning. श्रीरामाय नमः ।

निर्व्वेदमप्युदारकल्पकल्पभूतदाकृतिं

दुरन्तविघ्नवारिदप्रभञ्जनं निरञ्जनम् ।

मदीयचित्तमारमप्रबोधभास्करं परं

समानमूलवासिनं भजामि विघ्ननायकं ॥ (?)

श्रीनन्दनन्दनममन्दसुरेन्द्रवृन्द-

सान्द्रानुरागपरिभावितपादपद्मं ।

गंभीरवाग्रतविमोचितगोपगोपी-

सन्दोहमिन्दुमुखमच्युतमाश्रितोऽस्मि ॥

... ...

इह सच्चिदानन्दात्मकमद्वितीयं ब्रह्मैव विमलमलप्रधानमायोपाधिक × ×

सदीश्वरभावमुपगताम । जीवेशाभावेन करोतीत्यादि श्रुतेः । स च

मायाप्रतिविम्बित ईश्वर इति संक्षेपकृतप्रकटार्थकारविद्यारण्यमतानुसारिणः। विम्बभूत इति विवरणाद्यनुसारिणः। जीवनिष्ठाज्ञानाभिन्नमायाविषय इति वाचस्पतिमतानुसारिणः। सर्व्वथापि प्रतिविम्बादयः मायाप्रयुक्तप्रतिविम्बत्वादियोगिनः शुद्धचिदपेक्षया आभासा एवेति जीवेशावभासेन करोतीति श्रुतिरुपपद्यते। इत्यादि।

End. श्रीभाष्यकृद्वदनपङ्कजसंप्रसूतं सद्भक्तिबोधसुनिदानवचोऽनवद्यम् (मवन्द्यं)। आस्वाद्य माद्यतितरां मम मानसालिः सीम × × निजभूमपदं हि लब्ध्वा ॥ (?)

षट्पदीनौकया सर्व्वानुद्दधार नतोऽस्म्यहं।
संसारसागरे मग्नान् यस्तं शङ्करदेशिकं॥
भगवद्भक्तिगन्धाढ्यैः कुसुमैर्वाङ्मयैः कृता।
षट्पदीमञ्जरी सम्यक् योजिता कृष्णपादयोः॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीशिवनारायणानन्दतीर्थगुरुचरणसेवकश्रीशङ्करानन्दतीर्थविरचिता षट्पदीमञ्जरी सम्पूर्णा॥ + + + शकाब्दाः १६४६।

विषयः। षट्पदीनामकभक्तिग्रन्थस्य व्याख्यानं॥

No. 311. षष्ठिशतप्रकरणम्। Substance, country-made paper, 12 × 4 inches. Folia, 13. Lines, 12 on a page. Extent, 234 ślokas. Character, Nāgara. Date ? Place of deposit, Dinmaṇḍalācārya Mahārāja Bālacandra Sūri, Benares City. Appearance, old. Prose. Correct.

Beginning. अरहं देवो सुगुरुसुद्धं धम्मं + + + नवकायोधन्नाण कयत्थाणं निरन्तरं वसइ हिययम्मि जंदण कुणसि तव चरणं ण पयसिण गुणेसि देसिणः दाणं ताइत्ति यन्न सक्कसि जं देवो इक्क अहन्ते।

End. एवं भ (...) रियनेमि वन्दर इयाविक इविगाहाउ।
विहिमग्गरयाभव्वः परं तुजाणं तुजन्तु सिवम॥

Colophon. इति षष्ठिशतप्रकरणम्।

विषयः। धर्मोपदेशः.

No. 312. षष्ठिशतप्रकरणटिप्पनी । Substance, country-made paper, 12 × 4 inches. Folia, 13. Lines, 14 on a page. Extent, 738 slokas. Character, Nāgara. Date ? Place of deposit, Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri, Benares City. Appearance, old. Prose. Incorrect.

Beginning. नमः सर्व्वविघ्नभि(वि)दे सर्व्वविदे श्रीपार्श्वनाथाय ।

इह प्राप्तसकलमानुष्यादिसामग्रीकेन पुंसा श्रावक + + + + + धारभूते श्रीसम्यक्त्व एव प्राक् प्रयतितव्यमित्याकलय्य नेमिचन्द्रनामा श्रावकस्तदुपदिष्ट-गीतार्थं संविग्नगुरुं परीक्षन् चिरस्य परिभ्रम्य तत्कालवर्त्ति संविग्नगीतार्थ मुनिजनाग्रगण्यं श्रीजिनपतिसूरिं सुगुरुं लब्धवान्, ततस्तत्पार्श्वात् शुद्धदेवादितयः(?) परांश्च देवादित्येषु दृढयन्ति इदं प्रकरणं चक्रे (?) ।

End. नानाविधमार्गरता भव्याः पठन्तु शृण्वन्तो जानन्तु अर्थपरिज्ञानेन तत्तत्त्व तत्पाठपरिज्ञानाभ्यां यान्तु । शिवं शिवशब्दोपादानं चावसानमङ्गलार्थम् .

Colophon. सम्यक्त्वबीजकमेतत् षष्ठिशतप्रकरणस्य सद्वृत्तिः ।

अलिखत् लेखकवदयं शिष्यः श्रीभवलचन्द्रगुरोः ॥

इति षष्ठिशतप्रकरणावचूरिः ।

विषयः । षष्ठिशतप्रकरणव्याख्या ।

No. 313. षोड़शी । Substance, country-made paper, 15 × 3 inches, Folia, 1. Lines, 6 on a page. Extent, 24 slokas. Character, Bengali. Date ? Place of deposit, Khunveḍā grāma, Post Garvetā, Zilla Midnāpur, Babu Vaikuṇṭhnātha Cakravarti. Appearance, tolerable. Verse. Correct.

Beginning. ॐ नमः श्रीसूर्य्याय ।

अथ षोड़शी । दक्षिणस्यां दिशि निरस्तमिति मण्डलरेखाञ्च कृत्वा दक्षिणा-ग्रान् कुशान् निपात्य तत्र सतिलोदकैरावाह्य वक्ष्यमाणमन्त्रैः पिण्डान् दद्यात् । इति गोविन्दमिश्रः (भागचतुष्टयकृतानि) तत्र दक्षिणाग्रान् कुशानामौर्ध्वं आवाहनं कुर्य्यात् । यथा तिलोदकं गृहीत्वा ।

ॐ अस्मत्कुले मृता ये च गतिर्येषां न विद्यते ।

आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे तिलोदकैः ॥

ॐ मातामहकुले ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे तिलोदकैः ॥ इत्यादि ।

End. ॐ आ ब्रह्मणो ये पितृवंशजाताः
मातुस्तथा वंशभवा मदीयाः ।
कुलद्वये ये मम दासभूताः
भृत्यास्तथैवाश्रितसेवकाश्च ॥
मित्राणि सख्यः पशवश्च वृक्षा
दृष्टा ह्यदृष्टाश्च कृतोपकाराः ।
जन्मान्तरे ये मम दासभूता-
स्तेभ्यः स्वधा पिण्डमिदं ददामि ॥

Colophon. इति षोड़शी ।

विषयः । लुप्तपिण्डोदकेभ्यः पुत्रदारवर्जितेभ्यः मातापितृकुलोद्भवेभ्यः पिण्डदानं ॥

No. 314. षोड़शीपूर्त्तिकारिका । Substance, country-made paper, 8×5 inches. Folia, 8. Lines, 12 on a page. Extent, 160 slokas. Character, Nāgara. Date, Saṃvat 1890. Place of deposit, Benares City, Vāmanācāryya. Appearance, new. Prose. Correct.

Beginning. वक्ष्यते चतुरः पादानुपदध्याच्छिरोमुखे
तत्पश्चात् षोड़शीयुग्मं सविशेषसमन्वितं ।१।
उपधाय यथायोगं पद्मपादानथात्मनि ।

End. पञ्चे तु सप्तच्छन्दः स्यात् अत्रपञ्चेतु पूर्व्वतः चतस्रो राड्भृतः स्युस्ततो द्वैमेष्टकाः क्रमात् ।

No. 315. सिद्धानां स्वरूपम् । Substance, country-made paper, 12×4 inches. Folia, 11. Lines, 12 on a page. Extent, 154 slokas. Character, Nāgara. Date ? Place of deposit, Dinmaṇḍalācārya Mahārāja Bālacandra Sūri, Benares City. Appearance, new. Verse. Correct.

Beginning. सिद्धं सिद्धत्थ सुखं नमिऊण्ण ऊचण पयास,
यं वीरं सिरि सिद्ध पाइड़ाओ सिद्धस्वरूवं किमवि वुत्यं.

End. एवं मध्रिकर्षद्वारं द्रव्यप्रमाणे चिन्तितं शेषेषु द्वारेषु पुनः सिद्धः प्राभृतात् भावनीयं इय सिद्धाण सरूपं लिहियं देवेन्द्रसुरीर्हि इति ।

विषयः । जैनमते मोक्षस्वरूपकथनम् ।

No. 316. संक्रान्तिचन्द्रिका By रामकृष्ण । Substance, country-made paper, 18×3 inches. Folia, 2. Lines, 7 on a page. Extent, 44 slokas. Character, Bengali. Date ? Place of deposit, Chaḍābāḍi, *viâ* Tangail, Paṇḍita Digambar Smṛtitīrtha Appearance, fresh. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।

श्रीगोपालपदाम्भोजास्वतमाध्वीकलालसः ।
श्रीरामकृष्णः संक्रान्ति-चन्द्रिकां तनुते सुधीः ॥
तत्तद्राशिविशेषतो दिनकृतो राश्यन्तरे या गतिः ।
संक्रान्तिः कथिता निषिद्धविहिते तत्क्षणे × × × ॥
श्रौतैस्तं निखनर्पयन् × × × मन्त्राच मायन्तनो
त्यान्तं स्नानमनुण्णाद्रकसलिलैः कुर्य्यात् प्रदानादिकं ॥ इत्यादि ।

End मत्राजयां(?) कश्चित् प्रोच्य गोत्रनामादिकं वदन् ।
श्रीविष्णुप्रीतिकामः सन् स्नायादी × × वारिणि ॥
इति श्रीरामकृष्णेन कथिता या क्रमस्थितिः ।
\+ \+ \+ \+ \+ \+ \+ \+ ॥
संक्रान्त्यां पवने चैव न स्नायाद् यस्तु मानवः
सप्त जन्म भवेत् कुष्ठी दरिद्रश्चोपजायते ॥

Colophon. इति संक्रान्तिचन्द्रिका समाप्ता ॥

विषयः । संक्रान्तिनिरूपणमुखेन तत्कर्तव्यकर्म्मादिनिरूपणं ।

No. 317. संक्षेपशारीरकव्याख्यानं By विश्ववेद । Substance, Tāḍi-leaf, 13×2 inches. Folia, 185. Lines, 5 on a page. Extent, 4810 slokas. Character, Maithil. Date, L.S. 398. Place of deposit, Purī Sāṅkara Maṭha. Appearance, old Prose. Generally correct.

Beginning. × × × × × × तत्वानुस्मरणलक्षणं मङ्गलमा × × × ग्रन्थारम्भं प्रतिजानीते अन्वतेति । अत्र मुरारिर्विष्णुर्जगदुपद्रव × × प्रतिविम्बितं परं ब्रह्मान्तर्याम्याख्यं तस्य परमं पदं तदेव ब्रह्म मायासम्बन्धरहितं × × × × अथवा पदं स्थानमास्पदं सोपाधिकतया × × × यथास्पदतया वर्त्तते रूपं संत्यजति ॥ इत्यादि ।

End. यासौ शम्भोश्चिन्मयी शक्तिराद्या

× × × ×

× × × ×

× × सिद्धान्तदीपः ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीमदानन्दवेदशिष्यविश्ववेदविरचितसंक्षेपशारीरकव्याख्याने सिद्धान्तदीपे चतुर्थोध्यायः समाप्तः ॥ ल सं ३९८ आश्विनशुक्लद्वितीयायां विलासपुरग्रामे लिखितमिदं पुस्तकमिति नमो नारायणाय । नमो भगवते वासुदेवाय ।

विषयः संक्षेपशारीरकस्य व्याख्यानं ।

No. 318. संक्षेपशारीरकसुबोधिनी by पुरुषोत्तममिश्र। Substance, country-made paper, 13 x 5 inches. Folia, 141. Lines, 10 on a page. Extent, 4935 slokas. Character, Bengali. Date ? Place of deposit, Rājaguru's Maṭha, Goṇesa Mahallā, Benares City. Appearance, old Prose. Correct.

Beginning. ॐ नमो भगवते वासुदेवाय ।

खेलया करनिरुद्धभूधरं हेलयादलितमत्तकुञ्जरं ।

+ + + विजितपद्मसम्भवं केशवं किमपि [शैशवं] भजे ॥

सादरेण भगवत्परायणम् मूर्त्तिमन्तमिव बादरायणम् ।

रामतीर्थमिह नौमि तं गुरुं श्रद्धयादि + + + गतं गुरुम् ॥

End. समाप्तौ भगवन्नमस्काररूपमङ्गलमाचरति, भुजङ्गसाङ्गेति,

शुभसम्प्रदाय + + + अनुसृत्य मतञ्च रामतीर्थगुरोः

एतत्प्रबन्ध + + + + + व्याकारि मया प्रयत्नेन ।

+ + संक्षेपशारीरसुखबोधनदीपिका, + + सद्भिः स्नेहेन पूर्य्यताम्

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामतीर्थमुनिशिष्याग्निचित्पुरुषोत्तममिश्रकृतौ संक्षेपशारीरकसुबोधिन्यां चतुर्थोऽध्यायः समाप्तः ।

विषयः । संक्षेपशारीरकव्याख्या ।

No. 319. सच्चरितरक्षा By वेङ्कटनाथ । Substance, country-made paper, 12 x 4 inches. Folia, 32. Lines, 9 on a page. Extent, 832 slokas. Character, Nāgara. Date ? Place of deposit, Purī, Rājagopāla Maṭha, Mohānta Śrī Raghunandana Ramānuja Dāsa. Appearance, fresh. Generally prose. Generally correct.

Beginning. श्रीमते रामानुजाय नमः ।

श्रीमद्वेङ्कटनाथाय सर्व्वशास्त्रार्थवेदिने ।
कवितार्किकसिंहाय वेदान्तगुरवे नमः ॥
चक्रादिलाञ्छनभृतः सुभगोर्द्ध्वपुण्ड्रान्
न्यस्तात्मनो भगवतश्चरणारविन्दे ।
तद्भुक्तभोगरसिकान् त्रिदिवेन्द्रवन्द्यान्
पुंसः प्रमाणचरणान् शिरसोद्वहामि ॥
यतिपतिचरणाम्भोरुहरजःप्रभावेण संनिहितरक्षाः ।
विदधाति वेङ्कटेशः स्थिरामिमां सच्चरित्ररक्षां ॥
भक्तिर्वेतेषु सततं विमतिं गता ये पत्युः समस्तजगतां परमागमेषु ।
तैरेव तान् निगमशासनिदर्शदीप्तैस्तर्कात्मना परिणतैः प्रहरामि मूर्द्धान् ॥

इह कतिचिदतिचिरसमुचितविविधदुरितावलीमलीमसमनसः परमपुरुषचरणारविन्दवैमुख्यमुषितदर्शनाः सुदर्शनादिधारणे विमन्यन्ते मन्यन्ते च ।

चोदनालक्षणोऽर्थो धर्मः सचासौ प्रत्यक्षावेद्य इति प्रत्यक्षसूत्रे स्थितं । द्रव्यादीनां स्वरूपतः प्रत्यक्षाणामपि धर्मत्वेनैव अप्रत्यक्षत्वात् चोदनैकसमधिगम्यत्वं न विरुध्यते यथाहुः ।

द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते ।
तेषामैन्द्रियकत्वेपि न तु तद्रूपेण धर्मता । इत्यादि ।

End. अतः सिद्धं ब्राह्मणादिभिः सुदर्शनादिकं अवश्यं धार्य्यं मुमुक्षुभिस्तु विशेषत इति ।
श्रीमद्वेङ्कटनाथेन सम्यगेतत् समर्थितं ।
श्रुतिस्मृतीतिहासादिसिद्धं चक्रादिधारणं ॥
अयमनघसुसूक्तैरादिभक्तैर्यथावद्-
विदितनिजसतत्वो (?) विश्वमव्यादभव्यात् ।
रथचरणनिरूढ़व्यञ्जनानां जनानां
दुरितमथनहेलाद्देहलीदेशं (?) हलीशः ॥

Colophon. श्रीमद्वेङ्कटनाथस्य कृतिषु सच्चरितरक्षायां सुदर्शनाधिकारः प्रथमः श्रीमते रामानुजाय नमः । श्रीमते निगमान्तदेशिकाय नमः । हरिः ॐ ।

विषयः । श्रुतिस्मृतिविहितसदाचारानुशीलननिरूपकानामत एव मुक्तप्रायाणां सुदर्शन-चक्रादिचिह्नानां देहादावचश्यधर्त्तव्यत्वेन निरूपणं ।

No. 320. समाविवेकटीका (शिशुबोधिनी) By माधव । Substance, country-made paper, 12 x 5 inches. Folia, 30. Lines, 11 on a page. Extent, 660 ślokas. Character, Nagāra. Date, Saṃ 1816. Place of deposit, Benares City, late Babu Hariścandra. Appearance, old. Prose. Incorrect.

Beginning. श्रीगणेशाय नमः ।
गणनायकं हृदयवाञ्छितं प्रणिपत्य + + + + माधवः
प्रकुरुते विहतिप्रमितान् + + + शरदि भावततः । ?

End. विद्वद्द्विजगणसेवितपादपद्मं गोविन्दसंज्ञसुतमाधवनिर्मितायां
श्रीवर्षतन्त्रविहतौ शिशुबोधवत्यां तत्वादिभाव + + + परिपूर्त्तिमागात् ।

Colophon. इति गोविन्दज्योतिर्वित्सूनुमाधवविरचितायां समाविवेकटीकायां शिशुबोधिन्यां तत्वादिद्वादशभावविवरणं समाप्तिमगमत् + + सवत् १८१६ ।

विषयः । समाविवेकव्याख्या ।

No. 321. **समृद्धमाधवनाटकम्** by **गोविन्दकविभूषण।** Substance, palm leaf, 13 x 1½ inches. Folia, 152. Lines, 3 on a page. Extent, 2750 slokas. Character, Uriā. Date ? Place of deposit, Calcutta, Government of India. Prose and Verse. Generally correct.

Beginning. श्रीराधाकान्तः शरणं ।

धृताभिनवतमःक्रमा प्रशमितप्रेयश्चकं रभसा
सुप्रीताश्रितकैरवा गुणविधुप्रावद्भवीभावहृत् ।
गोपालाम्बुजलोचनो भुवि लसत्तृष्णावोल्लवोक्तोविनो
पायाद्‌ गोकुलचन्द्रभद्रकरुणापीयूषवृष्टि र्जगत् ॥

अपिच ।

यस्यामन्दहसपाङ्गरिङ्गणकलासङ्गेन नीलं हरे
रङ्गं कुङ्कुमपङ्कसङ्कुलकुचश्रीहेमकुम्भार्पणात् ।
माञ्जिष्ठद्युतिमञ्जुपाणिचरणाम्भोजप्रवालप्रभं
बिम्बोष्ठाधिकनिष्ठयाधरतलं तां तत्प्रियामाश्रये ॥

\+ \+ \+ \+

नान्द्यन्ते सूत्रधारः। अलमतिविस्तरेण। विस्तारयामि रङ्गमङ्गलभक्तिपीयूषतरङ्गिणीपूरं। यदमी सामाजिकसज्जनास्तत्र मज्जनाय हृष्णाजर्जराः। तदुपचरामि चेतसैव संसारार्णवकर्णधारं भगवन्तमित्यञ्जलिं दत्त्वा।

अत्युद्दामप्रेमभूमप्रकाशी गुत्यामोदी यत्प्रसादोऽनुरूपः।
आस्तां नित्यं मानसे मामकीये श्रीमान् नित्यानन्दनामेष्टदेवः ॥

नटीमुद्दिश्य। आर्य्ये तावदित इतः।

प्रविश्य नटी। अज्ज (आर्य-) आणवेदु।

सूत्र। आर्य्ये.........नीलाचलमौलिलीलाचलजलधरमण्डलाडम्बरस्य ...... श्रीमधुसूदनस्य ...... भक्तजनानां ...... देवतामाराधयामः।

नटी। अज्ज (आर्य) यद एव्वं एत्थ किम साहणं।

सूत्र। आर्य्ये भरद्वाजवंशावतंसावतारस्य ... ... गोविन्दकविभूषणसामन्तरायस्य स्मरसि कच्चित्।

नटी। सिविनेवि ण तस्स विसुमरेमि। किं उण जाणेर।

सूत्र। आर्य्ये

तस्य कृतिः कृतिरुचिरं चिरं रसादिध्वनिप्रचुरं।

नव्यं काव्यमुदीते मधुरं हि सम्बद्दमाधवं नाम ॥
तेन प्रस्तावितेन तूर्णं लब्धवर्णविधिनाराधयामः ॥ इत्यादि ।

End. उभौ। सानुकम्पं । तथैव वोभवीतुतरां चिराय । इति निक्रान्ताः सर्व्वे ॥

Colophon. इति श्रीसम्बद्दमाधवे तथ्यमनोरथो नाम सप्तमोऽङ्कः ।

विषयः। इति श्रीसम्बद्दमाधवे गोकुलमङ्गलो नाम प्रथमोऽङ्कः ।
इति ,, निराधिक-राधिको नाम द्वितीयोऽङ्कः ।
इति ,, विप्रलब्धराधो नाम तृतीयोऽङ्कः ।
इति ,, सानन्दगोविन्दो नाम चतुर्थोऽङ्कः ।
इति ,, तथ्यमनोरथो नाम पञ्चमोऽङ्कः ।
इति ,, सर्व्वनिर्व्वाणो नाम षष्ठोऽङ्कः ।
इति ,, तथ्यमनोरथो नाम सप्तमोऽङ्कः ।

No. 322 सम्यक्त्वकौमुदी । Substance, country-made paper, 12×5 inches. Folia, 88. Lines, 9 on a page. Extent, 1408 ślokas. Character Nāgara. Date ? Place of deposit, Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri, Benares City. Appearance, old. Prose and Verse. Incorrect.

Beginning. श्रीसरस्वत्यै नमः ।
सम्यक्त्वाभ्युदये स्वस्य महानन्दानन्दर्द्धये ।
सम्यक्त्वकौमुदीमेनां कथां वक्ष्ये समासतः ॥
इहैव जम्बुद्वीपेस्मिन् भारते भूमिभूषणं ।
नानारामद्रुमैर्जुष्टं समस्तगतदूषणम् ॥

End. एवं विधायात्ममनः स्वपुरं विवे(...) महत् सेवेन उल्लासयन् पौरजनस्य श्रीसुयोधनराजा अलञ्चकार ।

Colophon. इति सम्यक्त्वकौमुदीनाम्नी कथा कोषे (...) कौमुदीमहोत्सवाख्यान-गर्व्विते सुयोधनन्टपदिग्विजयपुरप्रवेशवर्णनं नाम तृतीयसर्गः ।

विषयः। सुयोधनाख्यस्य कस्यचित् राज्ञश्चरित्रवर्णनं जैनधर्ममाहात्म्यकथनञ्च ।

No. 323. सम्वित्प्रकाश । By गोविन्दकवीश्वर । Substance, country-made paper, 13×7 inches. Folia, 16. Lines, 17 on a page. Character, Nāgara. Date, Saṃ 1873. Place of deposit, Harapurā, Post Gopālagañja, District Chāprā, Paṇḍita Gaṅgādeo. Appearance, tolerable. Prose and Verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।

श्रीमद्विष्णुमहेशशक्तिमखिलाकल्पं किरीटाङ्गद-
द्योतत्कुण्डलमुद्यदर्करुचिरं पीताम्बरं हारिणं ।
पद्मस्थं हृदयस्थकौस्तुभमणिं हस्तस्थचक्रोल्लसत्-
शङ्खाम्भोजगदं मुदं विदधतं भक्त्या भजेऽभीष्टदं ॥ इत्यादि ॥

End. प्रश्नाक्षरमात्रा अष्टगुणीकृत्य त्रिहीना वेदयुतः युता द्वादशभागशेषे राहुः । राहोः स्थानात् सप्तमे केतुर्ज्ञेयः इति नष्टजन्मपत्रे नवग्रहा-नयने चन्द्रो नोक्तः तत् विचार्य्य चन्द्र आनेयः ॥

Colophon. इति काङ्कवीश्वरनन्दनगोविन्दकवीश्वरेण विरचिते सम्वित्प्रकाशकाव्ये दशपञ्चसर्गः समाप्तः ॥ संवत १८७३ ॥

विषयः । १ सर्गे भावफलादिकथनं । २ सः धात्वादिचिन्ताकथनं । ३ सः गगनादि-चिन्ताकथनं । ४ सः शशिभावफलादिकथनं । ५ सः तनुभावादिकथनं । ६ सः गमनागमन-प्रश्नादिकथनं । ७ सः जलप्रश्नादिकथनं । ८ सः निधिप्रश्नकथनं । ९ सः युद्धफलादिकथनं । १० सः दोषज्ञानादिकथनं । ११ सः चौरप्रश्नादिकथनं । १२ सः लाभप्रश्नकथनं । १३ सः द्रव्यनिश्चयादिकथनं । १४ सः दिनचर्य्यादिकथनं । १५ सः सम्वत्सरागमादिकथनं ।

No. 324. सम्बोधसत्तरि । Substance, country-made paper, 12×5 inches. Folia, 11. Lines, 4 on a page. Extent, 88 ślokas. Character, Nāgara. Date, Saṃvat 1811. Place of deposit, Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri, Benares City. Appearance, new. Verse. Correct.

Beginning. श्रीपार्श्वनाथस्वरिजिनगुरुभ्यो नमः ।

नमिऊण तिलोयगुरुं लोयालोयपगासयं वीरं ।
सम्बोहसत्तरि सयं रएमि + द्वारगाहाहिं ।

End. सव्वेगमनो सम्बोहसत्तरि जो परिहृतव्व जित्त सिरि जयसेहरवाण, सोलहइ नश्च संदेहो ।

Colophon. इति सम्बोधसत्तरि सम्पूर्णम् संवत् ॥ १८११ ॥

विषयः । जैनधर्मोपदेशः ।

No. 325. सरोजसुन्दर । Substance, country-made paper, 12×4 inches. Folia, 18. Lines, 11 on a page. Character, Nāgara. Date, Saṃ 1849. Place of deposit, Harapurā, Post Gopālagañja, District Chāprā, Paṇḍita Gaṅgā-deo. Appearance, tolerable. Generally incorrect.

Beginning. श्रीगणेशाय नमः ।

शिवायनो दीनदयापरायणे सति प्रधाने शितया हतचतिः ।
शिवार्च्चितोग्रप्रकटीकृतव्रतोदयाम्बुधिः सर्व्वजनिर्भवलजः ॥ (?)
सरोजसुन्दरं नाम स्मृतिसारमिदं बुधाः ।
सेवयन्तु सदा शान्ताः सर्व्वसन्देहशान्तये ।
चौरं तैलं जलं चोष्णं आमिषं निशि भोजनं ।
रतिः स्नानं च मध्याह्ने रवौ सप्त विवर्जयेत् ॥ इत्यादि ।

End. प्रातःस्नानं हविष्यञ्च ब्रह्मचर्य्यमिदं त्रिषु ।
आग्नेयं भस्मना स्नानं सद्भिर्वारुणमुच्यते ।
आपोहिष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतं ॥

Colophon. इति स्मृतिसारसरोजसुन्दरं समाप्तं ॥ संवत् १८४९ ॥

विषयः । रविवारे तैलादिवर्जनकथनं । जलदानादिकथनं । श्राद्धे वपनादिनिषेधकथनं । द्रव्यशुद्ध्यादिकथनं । कांस्यपात्रे नारिकेलोदकपानादिदोषकथनं । तीर्थस्नानविध्यादिकथनं । दत्तादिपुत्रकथनं । रजःस्वलाशुद्धिकथनं । नवान्नकथनं ॥

No. 326. सर्व्वप्रायश्चित्तं । Substance, country-made paper, 12×6 inches. Folia, 9. Lines, 16 in a page. Extent, 144 ślokas. Character, Nāgara. Date, Śaka 1696. Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, old. Prose. Incorrect.

Beginning. श्रीगणेशाय नमः ।

शुभदिवसे पर्षदं परिकल्प्य कृतस्नानः क्लिन्नवासा अनशनस्त्रिवारं पर्षदं प्रदक्षिणीकृत्य समस्तसम्पदिति श्लोकचतुष्टयं पठन् साष्टाङ्गं प्रणमेत् पर्षल्लक्षणमाह याज्ञवल्क्यः ।

End. ॐ भूर्भुवः स्वः स्वाहा प्रजापतय ॐ अग्नये स्विष्टकृते स्वाहा । अग्नये व्रतग्रहणं करिष्ये, कुरुष्व । प्रपायेन सर्व्वं पिवेत् एतत् पूर्व्वाङ्गं कृत्वा संकल्पानुसारेण प्रायश्चित्तमाचरेत् ।

शके १६६६ जयनामसम्वत्सरे वैशाखशुद्ध ८ तद्दिने महादेवभट्टपटवर्द्धनेन लिखितं स्वार्थं परार्थं वा ।

विषयः । सर्व्वपापानां प्रायश्चित्तविधानं ।

No. 327. सर्व्वोत्तमटीका By विट्ठलदीक्षित । Substance, country-made paper, 9 × 4 inches. Folia, 43. Lines, 9 on a page. Extent, 682 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, late Babu Hariścandra. Appearance, old. Prose. Correct.

Beginning. श्रीकृष्णाय नमः ।

नत्वा पितृपदाम्भोजे मो + कामुष्मिकार्थदं ।
तत्प्रोक्ताचार्य्यनामानि विवरिष्ये यथामति ॥
यद्यप्ययोग्य एवाहं तन्नामविवृतौ स्वतः ।
स्वीयत्वेनैव कृपया योग्यतां मयि दास्यति ।

End एतेन आचार्य्याणां शोभाकृतिहेतुलज्जानायायिमं नामाङ्कः त्रिलोकीभूषणमिति । (इतोनास्ति)

विषयः । सर्व्वोत्तमनामकग्रन्थव्याख्या । 88 ślo.

No. 328. सहृदयानन्दकाव्यटीका बुधनन्दिनीनाम्नी By रामचन्द्रमिश्र Substance palm-leaf, 14 × 1½ inches. Folia, 238. Lines, 4 on a page. Extent, 3810 ślokas. Character, Uriā. Date ? Place of deposit, Puri, Mahīprakāśa Brahmacāri Maṭha, Paṇḍita Valadevaprakāśa Brahmacāri. Appearance, old. Prose Generally correct.

Beginning of the ṭikā.

पूर्व्वसर्गान्ते मणिविहङ्गानुसरणं दृष्ट्वेति विस्मृत्य विष्वक् नयनद्वयं व्यापार्य्य भैमीदिदृक्षुः नलः समीपे भैमीमनवेक्षमाणश्चिन्तानिमग्नोऽभूदित्युक्तं इह उभयोरुभयदिदृक्षापूर्व्वकविरहदुःखमुभयोर्वर्णयति इति सर्गयोः सुसन्धित्वं ।

Beginning of the text.

अथ सा पथि खेदनिःसहा

दमयन्ती चलितुं न चक्षमे ।

प्रियमीक्षितुमिच्छती परं

प्रजिघायाशु दृशं दिशो दश ॥ इत्यादि ।

End of the text.

इत्थं निस्तीर्य्य कृत्स्नां विपदमुपगतं स्वं पुरं वैरसेनीं

सार्द्धं हृद्यैरमात्यैः प्रणतपदयुगं श्रीमता पुष्करेण ।

निष्प्रत्यूहं प्रजानां मुदमुदयवतीमन्वहं निर्मिमाणं

भैमी सान्द्रानुरागोत्तरलितहृदया राजलक्ष्मीश्च भेजे ॥

... ...

लक्ष्मीर्यावदलङ्करोति हृदयं विष्णोर्यैसिंहाकृते-

र्यावत् विष्णुपदी च धूर्ज्जटिजटाजूटान्तरे क्रीड़ति ।

कृष्णानन्दकवेः कपिञ्जलकुलक्षीरोदशीतद्युते-

स्तावत् काव्यमिदं तनोतु कृतिनामन्तःप्रमोदोदयं ॥

End of the ṭikā.

हरजटाजूटस्थायिन्या गङ्गायाः क्रीड़नं यथा नित्यं तथा एतत्काव्यस्य सर्व्वदा वर्त्तमानस्य कृतिचित्तप्रमोदविस्तारकत्वं नित्यं भवतु ।

The Colophon of the text.

इति श्रीसान्धिविग्रहिकसकलकविकुलमौलिमण्डनश्रीकृष्णानन्दकृतसहृदयानन्दे महाकाव्ये नैषधेन्द्रस्य द्वितीयसाम्राज्यलाभो नाम पञ्चदशः सर्गः समाप्तः ।

The Colophon of the ṭikā.

कौत्सस्यगोत्राज्जातान्मृत्युञ्जयमिश्रमेदिनीदेवात् ।

श्रीरामचन्द्रमिश्रैर्व्याख्यातः पञ्चदशः सर्गः ॥

इति श्रीमृत्युञ्जयमिश्रसूनुविरचितायां सहृदयानन्दटीकायां बुधनन्दिन्यां पञ्चदशः सर्गः समाप्तः ।

No. 329. सांहित्युपनिषद्भाष्यं शिक्षाभाष्यम् । Substance, country-made paper, 12 × 5 inches. Folia, 92. Lines, 9 on a page. Extent, 1,656 ślokas. Character, Nāgara. Date, Saṃ 1661. Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ।१।

End. निष्पन्नेऽपि साधनानुष्ठाने कृतघ्नत्वदोषेण फलं प्रतिबध्येत तन्माभूत् इत्याध्यात्मिकादिविघ्नानां शान्तिर्निस्सन्नेत्येवं देवकृत उपकारः परामृश्यते ।

Colophon. वेदार्थस्य प्रकाशेन तमो हार्दं निरासयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीसायनाचार्य्येण विरचिते वेदार्थप्रकाशे यजुरारण्यके सांहित्यामुपनिषदि द्वादशोनुवाकः । समाप्ता सांहित्युपनिषत्, शिक्षाभाष्यं समाप्तं । संवत १६६१

विषयः । यजुरारण्यकान्तर्गतसांहित्युपनिषद्व्याख्या ।

No. 330. सादस्यतत्त्वदीप By वासुदेव । Substance, country-made paper, 12 × 6 inches. Folia, 17. Lines, 13 on a page. Extent, 510 ślokas. Character, Nāgara. Date ? Place of deposit, Benares, Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीश्रीपतिपितॄन् नत्वाग्रजश्रीमाधवान् गुरून् ।
सादस्यतत्त्वदीपोऽयं वासुदेवेन तन्यते ॥
सादस्यस्य च चार्षेयान् पुरोनूचानान्त्विजो हणीत ।

End. प्रक्षेपात् किञ्चिदुद्धारात् स्वनामलिखनादपि ।
श्रेयोर्थिभिर्न कर्त्तव्याचान्यथा कृतिरीदृशी ॥

Colophon. इति श्रीश्रीपतिसुतवासुदेवविरचितः सादस्यतत्त्वदीपः समाप्तः ।

विषयः । सादस्यप्रयोगविधिः ।

No. 331. साधारणपदार्थतत्त्वदीपनं By वासुदेव । Substance, country-made paper, 12 × 5 inches. Folia, 19. Lines, 19 on a page. Extent, 856 ślokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍita Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. द्विवेदश्रीश्रीपतिजो वासुदेवो नतः शिवौ ।
साधारणं पदार्थानां अतनोत् तत्त्वदीपनं ॥
तत्र प्रथमतः पदार्थानां ऋत्विक्प्रयोज्यत्वात् ऋत्विक्लक्षणमुच्यते ।

End. क्रियते मनसान्यासा या वाचा संक्रियते ताम्य ऋत्विजः संस्कुर्व्वन्ति ।

विषयः । श्रौतकर्मणां बह्वृचपदार्थविचारः ॥

No. 332. सामान्यप्रक्रिया By वसुप्रहराज । Substance, palm-leaf, 9 × 1½ inches. Folia, 138. Lines, 5 on a page. Extent, 2800 ślokas. Character, Uriā. Date ? Place of deposit, Purī, Paṇḍita Madhusūdana Miśra. Appearance, old. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः । अविघ्नमस्तु ।
नारायणं नमस्कृत्य करुणावरुणालयं ।
क्रियते बालबोधाय सामान्यप्रक्रिया मया ॥
अ इ उ ण ऋ ऌ क । ए ओ ञ ऐ औ च । ह य र व ट् । ल न् ।
म ञ म ङ ण न । झ ङ ञ । घ ढ् ध ष् । ष ज ब ग ड् द श् ।
ख फ छ ठ थ । च ट त व् । क प य् । श ष स र् । ह ल् ।
इति प्रत्याहारसूत्राणि । हलन्त्यं । उपदेशेऽन्त्यं हलित् स्यात् ॥ इत्यादि ।

End. एकैकमक्षरं बहुव्रीहिवद्भावेऽपि सुदत्यादिकमिष्यते एकैकस्मै देहि ।
सम्भ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगोऽन्यायसिद्धः । इति द्विरुक्तिप्रक्रिया ।
समाप्तोऽयं ग्रन्थः ।

विषयः । संज्ञासन्धिशब्ददशलकारतिङन्तकृदन्तस्त्रीप्रत्ययकारकविभक्तिसमासतद्धितद्विरुक्ति-प्रक्रियात्मकं व्याकरणं । सन्धिशब्दान्तर्गतमेव षत्वणत्वप्रकरणं । श्रूयते यदेतद्ग्रन्थप्रणेता वसुप्रहराजः वसुप्रक्रियेत्यपरनामकः गङ्गामान्तर्गतधराकोशग्रामवास्तव्य आसीदिति ।

No. 333. सामायकटीकावार्त्तिकम् । Substance, country-made paper, 15 × 7 inches. Folia, 21. Lines, 24 on a page. Extent, 1890 ślokas. Character, Nāgari. Date ? Place of deposit, Diṅmaṇḍalācārya Mahārāja Bālacandra Sūri, Benares City. Appearance, fresh. Prose. Correct.

Beginning. श्रीवीतरागाय नमः ।

अथ सामायकटीकावार्त्तिकं लिख्यते ।

परिक्कमामि भन्ते इरिया वहियाए विरहणाए अणागुत्ते अइ गमणे निगमणे ठाणगमणे चक्कमणे पाणुंगमणे विज्जुगमणे हरिदुगमणे इत्यादि ।

End. जिनेश्वरदेवका जुगुणके केवलदर्शनकेवलज्ञानम् ति किन्नारे प्राप्ति होय।

Colophon. इति श्रीशास्त्रानुसारध्यानाम्रतं भव्यानां मुक्तिदं सामायिकं सर्व्वकर्म-क्षयार्थं शास्त्रमङ्गलमस्तु ।

विषयः । जैनानां सर्व्वपापक्षयकारककर्मोपदेशः ।

No. 334. सामुद्रकं । Substance, country-made paper, 12 × 4 inches. Folia, 4. Lines, 7 on a page. Extent, 120 slokas. Character, Bengali. Date ? Place of deposit, Zilla Mayamansiṅg, Parganā Atiya, Post Jamurki, Grāma Halāliya, Paṇḍita Gurudāsa Vidyāratna. Appearance, fresh. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।

आदिदेवं प्रणम्यादौ सर्व्वज्ञं सर्व्वदर्शिनं ।

सामुद्रकं प्रवक्ष्यामि सौभाग्यं पुरुषस्त्रियोः ॥

कीदृशः पुरुषो रम्यो निन्द्यो वापि कथं भवेत् ।

कन्या वा कीदृशी रम्या गर्हिता वापि कीदृशी ॥

नारद उवाच ।

शृणु कृष्ण प्रवक्ष्यामि सामुद्रेण यथोदितं ॥ इत्यादि ।

End यथा कण्ठौ तथापादौ बाहुजङ्घे तथैव च ।

एवं सुलक्षणयुता कन्या लक्ष्मीस्वरूपिणी ॥

भाग्येनैव च लोकेस्मिन् लभते च तथाविधां ॥

उभयोर्लक्षणं प्रोक्तं नारीपुरुषयोरपि ।

शुभाशुभानि कार्य्याणि लक्षणानि तथैव च ॥

Colophon. इति सामुद्रक समाप्तं ।

विषयः । लक्षणद्वारेण स्त्रीपुरुषयोर्भाग्यनिरूपणं ।

No. 335. सायंप्रातर्होमप्रयोगः। Substance, country-made paper, 9×5 inches. Folia, 5. Lines, 8 on a page. Extent, 70 ślokas. Character, Nāgara. Date ? Place of deposit, Late Babu Hariścandra, Benares City. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः।
देशकालौ स्मृत्वा सायमग्निहोत्रं पयसा होष्यति. प्रातरग्निहोत्रमिति प्रातः गार्हपत्यं प्रज्वाल्य दक्षिणाग्निमानीय उद्धराहवनीयं. देवं त्वादेवेभ्यः श्रिया-उद्धारयामि.

End. हरिणीं त्वा सूर्य्यज्योतिषमह + + + कामुपदधे तेन पूर्व्ववत् + + + ज्ञातं अग्ने + + + इत्यादि विष्णुस्मरणान्तं समानम्.

Colophon. इति सायंप्रातर्होमप्रयोगः.

विषयः। सायं प्रातर्होमविधिकथनम्.

No. 336. सारसंग्रहः By विश्वनाथ। Substance, palm-leaf, 15×1½ inches. Folia, 169. Lines, 4 on a page. Extent, 2000 ślokas. Character, Nāgara. Date ? Place of deposit, Purī, Rājagopāla Maṭha, Mohanta Śrī Raghunandana Rāmānuja Dāsa. Appearance, fresh. Generally in verse. Incorrect.

Beginning. श्रीगणेशाय नमः।
यस्यार्कचन्द्रदहना नयनानि वातं
पित्तं कफञ्च शमयत्यवलोकनेन।
लोकत्रयीजननपाल[न]नाशहेतुः
कुर्य्याच्छुभं त्रिनयनः स सदा नराणां॥
× × × ×।
प्रयोगास्तैर्विश्वनाथः कुरुते सारसंग्रहं॥
दोषाः प्रकृतयो वह्निदुष्टाः सूत्यवनं वयः। (?)
देशकालौ तथा साम्यमाहारो भेषजानि च॥
एतानि सर्व्वदा नित्यं × × × ×॥ (?) इत्यादि।

End. गा × कफे पित्ते चूर्णं नारा च सञ्ज्ञितं। नाराचचूर्णं।
लघ्नं सुरपापीतं गुल्मो × × ×।
चौद्रं पक्कं घनीभूतं हिङ्गुसैन्धवसंयुतं॥ (अत परं खण्डितं)

विषयः। गन्धकशुद्धि-रसशुद्धि-लौहादिधातुगुणादि-कल्पतरुरस-वासाघृत-मह्वाराग-जाद्यघृत-नाराचचूर्णादिनानाविधभेषजविषयकवचनानि ।

No. 337. सारस्वतभाष्यटीका (पदचन्द्रिका) By गोविन्दाचार्य्य। Substance, country-made paper, 14 × 4 inches. Folia, 169. Lines, 5 on a page. Extent, 1700 ślokas. Character, Bengali. Date, Śaka 1707. Place of deposit, Elanga *viâ* Tangail, Babu Nilakamala Bhaṭṭāchāryya, Zemindar. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमः सरस्वत्यै ।

धातोः। धातोरित्यधिकृतं वेदितव्यं। अतऊर्द्ध्वं ये वक्ष्यन्ते ते प्रत्यया धातोः परे भवन्ति । भवति भवतः भवन्ति । कर्त्ता कर्त्तारौ कर्त्तार इति। धातोरिति प्रथमान्तानुकरणं पञ्चम्यन्तं पदं अतऊर्द्ध्वं अतः पश्चात् ये प्रत्यया वक्ष्यन्ते ते धातोः परे भवन्तीत्यर्थः । उक्तञ्च "अत ऊर्द्ध्वं स्मृते ग्रन्थे द्वादशाद्यो विधीयते" इति । इत्यादि ।

End. इङ् अध्ययने अस्य सौ परे वा गौः अध्यगीष्ट पक्षे अध्यैष्ट दिवादावटस्वरादेश्च अजगतौ अस्य वीः गुणः × × ।

Colophon. इति श्रीगोविन्दाचार्य्य-विरचितायां सारस्वतभाष्यटीकायां पदचन्द्रिकायामाख्यातेऽष्टमः पादः समाप्तः । श्रीहरिः । शकाब्दाः १७०७ ।

विषयः। सारस्वतभाष्यस्य स्फुटीकरणम् ।

No. 338. साहित्यदर्पणालोचनम्। Substance, palm-leaf, 12 × 2 inches. Folia, 143. Lines, 5 on a page. Extent, 2860 ślokas. Character, Uriā. Date ? Place of deposit, District Purī, pargana Rāhan, grāma Jagannātha Vidyādharapura, Paṇḍita Rāmcandra Miśra. Appearance, tolerable. Generally in prose. Correct.

Beginning. प्रणमामि परां देवीं मूलाधारप्रतोदयां ।
यद्विवर्त्तमिमं कृत्स्नं प्रपञ्चं परिचक्षते ॥
आसीत् कपिञ्जलकुलक्षीराकूपारचन्द्रमाः ।
विकलिङ्गाधिकधराधामधौमचिवः कृती ।
अशेषभाषारमणीभुजङ्गः साहित्यविद्यार्णवकर्णधारः ।

ध्वन्यध्वनिप्रौढ़धियां पुरोगः श्रीविश्वनाथः कविचक्रवर्त्ती ॥
स्वल्पाक्षरः सुबोधार्थः प्रध्वस्ताशेषदूषणः ।
साहित्यदर्पणो नाम ग्रन्थस्तेन विनिर्म्मितः ॥
पारं साहित्यविद्याब्धेर्गन्तुं वाञ्छन्ति ये क्षितौ ।
कृतिरेषा तरिस्तेषां विश्वनाथमहाकवेः ॥
यत्राभिनेयालङ्कारतत्वं सत्कविसम्मतं ।
यदीहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥
अस्य सत्कविवाग्गुम्फजीवातोः कृतिनां मुदे ॥
मया विधीयते टीका दुर्व्वोधार्थैविबोधिनी ॥ इत्यादि ॥

End. एतयोः कुलकादिबन्धवाङ्गल्यादीर्घसमासरचना विरुध्यते ।
इति साहित्यदर्पणलोचने नवमः परिच्छेदः ।
द्वितीया चेदतिशयोक्तिरस्तु किमलङ्कारान्तरकल्पनया
अतः परं खण्डितं ।

विषयः । साहित्यदर्पणस्य व्याख्यानं ।

No. 339. साहित्यदर्पणटीका (प्रभास्फूर्त्तिनाम्नी) By लोकनाथदीक्षित। Substance, palm-leaf, 15×1 inches. Folia, 88. Lines, 7 on a page. Extent, 1850 ślokas. Character, Uriā. Date ? Place of deposit, Dāmodarapura Śāsan, Zilla Purī, Paṇḍita Sadāsiva Kāvyakaṇṭha. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

व्रजजनवनितानां केलि कौतुहलं यो
युगपदनुबुभूषुर्निर्म्मितानेककायः ।
श्रितजनभवदुःखच्छेदनानन्ददायी
स मम भवतु भूत्यै क्षीरपाथोधिशायी ॥
श्रीगोपीनाथगुरुभिर्निर्म्मितां दर्पणप्रभां ।
आलोच्य लोकनाथेन प्रभास्फुर्त्तिर्विविच्यते ॥

ग्रन्थ इति । रचनाविशेषविशिष्टं वाक्यजातं ग्रन्थः । आरम्भः प्रथम-
प्रवृत्तिः ग्रन्थारम्भोपलक्षितः काल इत्यर्थः । इत्यादि ।

End. तत्त्वं अनारोपितं रूपं सुखं अनायासेन श्रीः लक्ष्मीः प्रथितः प्रख्यातः।
शास्त्रार्थज्ञान्निजपरकृतौ निर्विशेषा + + +
नत्वा नत्वा प्रतिदिनमयं याचते लोकनाथः
गोपीनाथप्रणिहितदिशा जायमाने मदीये
ग्रन्थे दोषोद्धरणरसिकं मानसं स्यात् शुभं वः॥

Colophon. इति श्रीलोकनाथदीक्षितकृतौ साहित्यदर्पणप्रभास्फूर्त्तौ दशमः परिच्छेदः। समाप्तोऽयं ग्रन्थः।

विषयः। साहित्यदर्पणस्य व्याख्यानं।

No. 340. साहित्यरत्नाकरटीका By कृष्णमिश्र। Substance, palm-leaf. 12×2 inches. Folia, 112. Lines, 9 on a page. Extent, 6048 slokas. Character, Uriā. Date ? Place of deposit, District Puri, pargana Râhan, grāma Jagannātha Vidyādharapura, Paṇḍita Rāmacandra Miśra. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. श्रीगणेशाय नमः। अविघ्नमस्तु।
नानाशास्त्रविशारदो द्विजवरो यो रामनामा महान्
यस्मात् कौत्सकुलावलीहिमकरः प्रादुर्भवत्युत्कले।
कृष्णस्तत्तनयात्मजः कविसुधीः साहित्यरत्नाकर-
स्यालङ्कारसुधाकराख्यममलं व्याख्यानमाख्यात्यसौ॥
विघ्नध्वंसपूर्व्वकसमाप्तित्वावच्छिन्नं प्रति विघ्नध्वंसमात्रं प्रति वा मङ्गलस्य हेतुतायाः सिद्धत्वात् ग्रन्थादौ शिष्यशिक्षार्थं तदुपनिबध्नन्नाह + + + + + आशिषेदित्यादि इत्यादि।

End एवमन्येऽपि शब्दालङ्कारा इति दिक्।

Colophon. इति श्रीकौत्सकुलतिलकमहामहोपाध्यायकृष्णमिश्रकृतायामलङ्कारसुधाकरसमाख्यायां साहित्यरत्नाकरटीकायां शब्दालङ्कारनिरूपणा षष्ठी कौमुदी

विषयः। साहित्यरत्नाकरस्य व्याख्यानं।

No. 341. प्रौढमनोरमाटीका By हरिदीक्षित। Substance, country-made paper, 10 × 4 inches. Folia, 540. Lines, 10 on a page. Extent, 16,200 slokas. Character, Nāgara. Date ? Place of deposit, Pātnā City, Sanskrit-sañjīvanī, Paṇḍita Jayanārāyaṇa Bājpeyī. Appearance, old. Prose. Incorrect.

Beginning. श्रीगणेशाय नमः।

शेषविभूषणमीड़े शेषाशेषार्थलाभाय।
दातुं सकलमभीष्टं फलमीष्टे यत्कृपादृष्टिः॥ इत्यादि।

End. एतेन इन्द्रे चेत्यस्य समुदायसर्व्वनामसंज्ञानिषेधकत्वे प्रथमानिर्द्देशेनैव उपपत्तौ सप्तमीनिर्द्देशो + + + मन्दोक्तमपास्तं॥

Colophon. इति श्रीभट्टोजिदीक्षितपौत्रेण वीरेश्वरदीक्षितस्नुना हरिदीक्षितेन कृते शब्दरत्ने सुबन्तपादः समाप्तः।

विषयः। भट्टोजिदीक्षितकृतपौढ़मनोरमायाः सिद्धान्तकौमुदीटीकाया व्याख्यानं।

No. 342. सिद्धान्तरत्नावली (खण्डित) By अग्निचिद्दलभद्रमिश्र। Substance, Teḍeṭpatra, $14\frac{1}{2} \times 1\frac{1}{2}$ inches. Folia, 53. Lines, 4 on a page. Extent, 543 slokas. Character, Bengali. Date ? Place of deposit, Purī, Sāṅkara Maṭha. Appearance, old. Prose. Generally correct.

Beginning. गणपतये नमः।

चौणीबुद्धिगतः प्रदक्षिणपथं कृत्वा स्वमातुर्मुदा
गौर्य्या मोदकभक्षणेक परतद्रत्नावलो यो दधे। (?)
+ + + + +
+ + + + +
नन्दीनन्दनतां स्वपङ्कजपदे भृङ्गो च भृङ्गायते
बालो बालसभाजनेन विधिना प्रागात् महाकालतां।
यस्यैते मदनद्विषः + + + + +
अथ्यान्नीलगलः फणीन्द्रवलयो देवो म्हड़ानीपतिः॥
यो रामो हलमस्तके निहितवान् चेवं कुरूणां प्रभु-
र्यः कृष्णो गिरिराजमन्दरगिरिं वामेन + + + +।

+ + + निधाय शिरसि प्रारब्धुमीहेऽधुना
सन्देहाङ्कुश + + मोक्षजननीं सिद्धान्तरत्नावलीं ॥

ननु प्रत्यक्चैतन्यमात्राश्रिता विद्याविषयकतादृश्या + + + + + + ऽकारणमिति ते मतं तत्र च नाविद्याजीवाश्रया + + + इति प्रतीतेः इति चेदित्यादि ।

End. तत्र श्रवणादीनां सकृदनुष्ठानमात्रेण किमर्थं फलं न सम्भवतीति न वक्तव्यं यावता फलोत्पत्तिस्तावदनुष्ठानं कर्त्तव्यं यथाग्नीषीनवहन्यादित्यत्र दृष्टफलस्य तण्डुलनिष्पत्तेः सकृदनुष्ठानेनासम्भवात् पुनः पुनरावृत्तिं क्रियते तद्वत् ।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य- ...दनुभवानन्दपूज्यपादशिष्येनाग्निचिद् बलभद्रमिश्रेण विरचितायां सि...न्तरत्नावल्यां साधननिरूपणं नाम तृतीयोऽध्यायः ।

विषयः । समन्वयनिरूपणं नाम प्रथमोऽध्यायः ।
अविरोधनिरूपणं नाम द्वितीयोऽध्यायः ।
साधननिरूपणं नाम तृतीयोऽध्यायः ।

No. 343. सुन्दरीरत्नावली or सौन्दर्य्यरत्नावली । Substance, country-made paper, 8×3 inches. Folia, 64. Lines, 6 on a page. Extent, 750 slokas. Date ? Place of deposit, Sākrāil, *viâ* Tangail, Babu Bijaya Simha Dāsagupta. Appearance, old. Verse. Generally correct.

Beginning. नमः परमदेवतायै ।

एकदा मन्त्रवर्णांश्च वटपत्रे विलिख्य च ।
त्यक्त्वा च जाह्नवीतीरे प्रयागे निजमन्दिरं ॥
ददर्श वटमूले च एकां रामां मनोहरां ।
का त्वं बाले तरोर्मूले मिलिता मम भाग्यतः
आलिङ्गनेन हृदयानन्दं जनय भाविनि ॥

देव्युवाच । तिष्ठ तिष्ठेति रे मूढ़ स्थिरचित्तं कुरुष्व ते ।
किमर्थं त्यक्तमन्त्रस्त्वं तद्वदस्व मदग्रतः ॥

शिष्युवाच। सम्यगनुष्ठितो मन्त्रः शिवोक्तविधिना मया।
पुरश्चर्य्याशतं कृत्वा न च किञ्चित्फलोदयः॥
शरीरञ्च यतो नष्टं विरक्तो ह्यन्यसाधने।
अतोऽहं त्यक्तमन्त्रोऽपि का त्वं मे वद सुन्दरि॥
इति श्रुत्वा शिशोर्वाक्यं जननी सुदयावती।
सत्यं कृत्वा शिशौ प्राह ईषद्धास्ययुता सती।
इष्टाहं तव मूढ़ात्मा बद्धाहं तव कर्म्मणा॥ इत्यादि॥

End. अहं वेद्मि समग्रेण मानवोऽपि क्वचित् क्वचित्।
अस्यसंसर्गिणः पुण्यास्तरिष्यन्ति कलौ युगे॥

Colophon. इति श्रीसुन्दरीरत्नावल्यां जगन्मातृद्रविड़शिशु-संवादे शरत्कृत्यवर्णं नाम पञ्चमः पटलः॥

विषयः। जगन्मात्रा द्रविड़शिशवे साधनस्योपदेशप्रदानं, तत्र शरदि देवीपूजनेन सिद्धिर्भविष्यतीतिकथनं, शरत्कालीनदेवीपूजनस्य विधिकथनपूर्व्वकं जपमन्त्रक्रमादिनिरूपणं।

No. 344. सुवेरप्रश्नः। Substance, country-made paper, 8½ × 4 inches. Folia, 14. Lines, 9 on a page. Extent, 196 ślokas. Character, Nāgara. Date, Saṃ. 1823. Place of deposit, Purī, Śaṅkara Maṭha, Madhusūdana Tīrthasvāmī. Appearance, old. Verse and prose. Generally correct.

Beginning. श्रीगणेशाय नमः।
अवयदेत्यादिके वर्णैश्चतुर्भिर्भाषितः पुरा।
सरस्वत्या सुवेरप्रश्नोऽभीष्टज्ञापकः सदा॥
अ व य द इत्यक्षरचतुष्टयं पाशिकापार्श्वे लिखितं सरस्वत्याः पूजनं देवतामन्त्रेण पाशकं सप्ताभिमन्त्रितं कार्य्यं चिन्तनीयं जपति मन्त्रं। ॐ त्रिपुरसि × × × × × स्वाहा। अ अ अ भोः पृच्छक शृणु तव बलमेकजगदीश्वरस्य शत्रुवत्त्वलत्वं जगदीशवलेन शत्रुक्षयो भविष्यति तव एतत्कार्य्यमपरं च सर्व्वं सिध्यति व्यापारादि सर्व्वं कार्य्यं हस्ते आगमिष्यति तत्र सन्देहो नास्ति। इत्यादि॥

End. द व च भो इच्छक शृणु। त्वया चिन्तितं कार्य्यं शत्रुवेष्टितं कष्टसाध्यं तव शत्रवः परोक्षेऽपवादं कथयन्ति मद्दनिष्टं जातं त्वं कुत्रापि गमनं वाञ्छसि तत्र गते सति किञ्चिच्छुभं किञ्चिदशुभमधुना तव महानुद्वेगो वर्त्तते इष्टदेवतायाः पूजां कुरु तेन शुभं कल्याणं भविष्यति।

Colophon इति श्रीमहादेवाज्ञापितं (?) सरस्वत्या प्रोक्तः सुवेरप्रश्नः समाप्तः॥

मार्गे चतुर्दशदिने ऽसितपक्षयुक्ते
रामद्विनागशशिवत्सर इन्दुवारे।
पुस्तं व्यलेखि प्रथमाश्रमधर्म्मधारी-
वाख्याप्रसिद्धगिरिधार्य्यहमद्भुतं वै॥

विषयः। शुभाशुभजिज्ञासोरवयदेतिवर्णचतुष्टयस्याहत्तिविशेषेण शुभाशुभविवेचनमित्यनुमीयते॥

No. 345. सूर्य्यपूजापद्धतिः। Substance, country-made paper, 13×3 inches. Folia, 4. Lines, 8 on a page. Extent, 80 ślokās. Character, Bengali. Date ? Place of deposit, Zilla Medinīpura, Post Gaḍaveta, grāma Khunveḍā, Babu Baikuṇṭhnātha Cakravarti. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमः सूर्य्याय।

अथ सूर्य्यव्रतं।

कृतनित्यक्रियो यजमानः प्राङ्मुख आचम्य विष्णुं स्मृत्वा आसनशुद्ध्यादिकं विधाय गन्धपुष्पादिना गुरुं विष्णुं नत्वा पश्चात् ब्राह्मणांश्च सम्पूज्य स्वस्तिवाचनपूर्व्वकं संकल्पं कुर्य्यात्। यथा कुशतिलफलसहितजलपूर्णताम्रादिपात्रं गृहीत्वा तत्र गन्धपुष्पादिकं दत्वा ॐ सूर्य्यः सोम इति पठित्वाॐ गङ्गेचेत्यादिना तीर्थमावाह्य ॐ तत्सदित्युच्चार्य्य अद्यामुकमास्यमुकपक्षे अमुकगोत्रः श्री अमुकदेवशर्म्मा ऐहिकारोग्यधनधान्यपारलौकिकोत्तमस्थानप्राप्तिकामः सूर्य्यव्रतमहं करिष्ये इति संकल्प्य। इत्यादि।

End. आदित्य भास्कर रवे भानो सूर्य्य दिवाकर।
प्रभाकर नमस्तेऽस्तु सर्व्वान् पापान् विमोचय॥

इति मन्त्रेणादित्यं विश्वरूपं विभाव्य पुष्पाञ्जलिं दत्वा प्रणमेत्। ततो यथाशक्ति मन्त्रं जप्त्वा अर्घोदकेन जपं समर्प्य कथां श्रुत्वा दक्षिणां दत्वा

अच्छिद्रवाचनं कृत्वा क्षमस्व इत्यनेन विसर्ज्जयेत् । निर्म्माल्यग्रहणं शिरसि न कुर्य्यात् । मदर्च्चाकृतनिर्म्माल्यं शरीरे न तु धारयेदितिवचनात् ॥

Colophon. इति सूर्य्यपूजापद्धतिः समाप्ता ॥

विषयः । सूर्य्यस्य पूजाविधिकथनं ।

No. 346. सूर्य्यव्रतं । Substance, country-made paper, 13½ × 3 inches. Folia, 11. Lines, 6 on a page. Extent, 176 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Medinīpur, Post Gaḍvetā, grāma Khunveḍā, Babu Vaikuṇṭhanātha Cakravartī. Appearance, fresh. Verse. Correct.

Beginning. ॐ सीतारामाभ्यां नमः । अथ सूर्य्यव्रतकथा ।

उदयगिरिमुपेतं भास्करं पद्महस्तं
निखिलभुवननेत्रं रत्नरत्नोपमेयं ।
तिमिरकरिमृगेन्द्रं बोधकं पद्मिनीनां
सुरवरमभिवन्दे सुन्दरं विश्वदीपं ॥

ऋषय ऊचुः ।

कथितं भवता सर्व्वं सूत तत्त्वार्थकोविद ।
धर्म्माश्च बहुधा प्रोक्ता व्रतानि बहुविस्तरं ॥
इदानीं श्रोतुमिच्छामः सूर्य्यव्रतकथां शुभां ।
कृपया परयाविष्टो यथावद्वक्तुमर्हसि ॥ इत्यादि ।

श्रीसूत उवाच ।

End. एतद्युष्माकमाख्यातमाख्यानं पुण्यदं शुभं ।
जन्ममृत्युजराव्याधि यदभ्यासान्न जायते ॥
सर्व्वं पातकिनं दृष्ट्वा यत्पापं लभते नरः ।
आख्यानश्रवणेनैव भस्मीभूतं भविष्यति ॥

Colophon. इति श्रीआदित्यसंहितायां ऋषिगणप्रपन्ने श्रीकृष्णार्ज्जुनसम्वादे सूर्य्यव्रतं सम्पूर्णं ॥ ॐ सूर्य्याय नमः ।

या केलिच्युतकेशलेशविषमां शय्यां न सेहे पुरा
या यानान्तरसंगतार्ककिरणद्योतादपि म्लायति ।

सेयं निष्ठुरकाष्ठसञ्चितचितां स्वत्यत्कराळाननां
स्नेराद्या महसा प्रियस्य भजते स्नेहस्य किं दुष्करं ॥

विषयः । श्रीकृष्णात् अर्ज्जुनस्य सूर्य्यव्रतस्य फलादिग्रवर्णं ।

No. 347. स्कन्दगीता । Substance, country-made paper, 13 x 5 inches. Folia, 35. Lines, 9 on a page. Extent, 630 slokas. Character, Nāgara. Date, Saṃvat 1905. Place of deposit, Benares City, late Babu Hariscandra. Appearance, new. Verse. Correct.

Beginning. नारद उवाच ।

कार्त्तिकेय महाबाहो शिवस्य गिरिजापतेः

पूजनस्य विधिं ब्रूहि येन शम्भुः प्रसीदति । स्कन्द उवाच ।

End. आश्वा त्वां गमिष्येऽहं नरनारायणाश्रमं

आप्नुहि त्वं सदा तात सुखं विष्णुप्रसादतः ।

Colophon. इति श्रीस्कन्दगीतासूपनिषत्सु ब्रह्मविद्यायां स्कन्दनारदसंवादे दशमोऽध्यायः समाप्तः शुभमस्तु । सम्वत् १९०५ ।

विषयः । प्रथमतः लिङ्गपूजाफलकथनं ततः ब्रह्मविद्याकथनं ।

No. 348. स्तम्भनकपार्श्वनाथचरित्रम् By अभयदेव । Substance, country-made paper, 14 x 5 inches. Folia, 7. Lines, 5 on a page. Extent, 70 slokas. Character, Nāgari. Date ? Place of deposit, Benares City, Dinmaṇḍalācārya Mahārāja Vālacandra Sūri. Appearance, new. Prose. Correct.

Beginning. जय तिहुयणवरकप्परुक्ख जय जिनधन्नन्तरी,

जय तिहुयणकल्लाणकोस दुरियक्करिकेसरि ।

तिहुयणजनअविलङ्घियाण भुवनत्तयसामिय,

कुणसुसुहाइ जिनेस पास थम्भणय पुर द्विय ॥

End. मुणिवरसिरि अभयदेव विणवइ अनिन्दिय ।

Colophon. इति श्रीस्तम्भनकपार्श्वनाथचरित्रम् ।

विषयः । अभयदेवसूरिविरचितपार्श्वनाथस्तोत्र ।

No. 349. **स्नानचन्द्रिका** By **अनन्तदेव।** Substance, country-made paper, 12×5 inches. Folia, 9. Lines, 10 on a page. Extent, 200 slokas. Character, Nāgara. Date, Saṃvat 1876. Place of deposit, Benares City, late Babu Hariscandra. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः।

यस्मिन् प्रसन्ने किलनिर्गुणोऽपि वचो विकाशं लभतेऽचिरेण।
तज्ज्ञानरूपं गिरिजार्द्धदेहं शिवं शिवायै च नमामि नित्यम्।

End. अनन्तविबुधार्य्येण श्रीमदुद्भवसूनुना।
योऽत्र श्रमः कृतस्तेन प्रीयतां गिरिजापतिः॥
इति श्रीमद्द्विवेदिउद्भवात्मज द्विवेद्यनन्तदेवविरचितायां स्नानस्त्र-पद्धतौ तृतीयकण्डिकापद्धतिः।

Colophon. इति श्रीपदवाक्यप्रमाणज्ञश्रीमद्द्विवेदि-उद्भवात्मजद्विवेदि-अनन्तदेवविर-चिता स्नानचन्द्रिकापद्धतिः समाप्ता।

विषयः। स्नानादिविचारः।

No. 350. **स्नानविधिः** By **श्रीदेव।** Substance, country-made paper, 11×6 inches. Folia, 33. Lines, 14 on a page. Extent, 858 slokas. Character, Nagāra. Date, Saṃvat 1801. Place of deposit, Benares City, late Babu Hariscandra. Appearance, new. Prose. Correct.

श्रीगणेशाय नमः।

Beginning. अथ नित्यस्नानस्येतिकर्त्तव्यता लिख्यते। तत्र + + + विभक्तस्य दिवसस्य चतुर्थे भागे मृद्गोमयकुशतिलाक्षतदूर्व्वापामार्गपुष्पवस्त्रयुग्म + + + पात्रादीनि स्नानोपकरणान्यादाय नदीदेवखाततड़ागाद्युद-काश्रयं गत्वा हस्तेन तटं प्रक्षाल्य मृद्गोमयादीनि पृथक् पृथक् स्थापयेत्।

End. तदशक्तौ तन्नामधेयं मन्त्रैर्नमस्कारान्ते पूजनं, अथवा वेदाद्यविरुद्धदीक्षानु-सारेण देवतार्च्चनं कुर्य्यात्। इति देवार्च्चनम्।

Colophon. अग्निचित्-सम्राट्-स्थपति-महायाज्ञिक-श्रीदेवकृतः स्नानविधिः। संवत् १८०१।

विषयः। वैदिकस्नानादिविधिः।

No. 351. स्वयम्भूदेवचरित्रम् । Substance, country-made paper, 9×12 inches. Folia, 15. Lines, 23 on a page. Character, Nagāra. Date, Saṃvat 1940. Place of deposit, Kailādeva Maṭha, Hātuā, District Chāprā. Appearance, new. Verse. Generally incorrect.

Beginning. श्रीमते मङ्गलमूर्त्तये नियमानन्दाय नमः ॥

श्लोऽजः सनकादिभिर्मुनिवरैर्योगस्य सूक्ष्मां गतिं
चेतस्याविशते गुणेषु च गुणाभेदः + + + + +
भिन्नाभिन्नमतं विधाय च शुभं ज्ञानं स्वभक्तेरदो
धर्म्मं भागवतं मनुं वसुशशिसंख्यश्च शिष्याः कृताः
ज्ञान नैष्ठिकसम्प्रदायानुमतं स्वात्मैकनिष्ठाभिधं
तापानां शमनात सत्वतरमनाड्ं ? सम्भजे श्रीपतिं ॥ [?]

End. श्रीधर्म्मदेवपादाब्जं स्वभूवंशाब्धिसम्भवं
संसारतापशान्त्यर्थं बुद्धौ संधारयेऽनिशं ।
धर्म्मं महान्तं श्रुतिसारगम्यं मुक्तोपदेश्यं [?] पुरुषोत्तमाख्यं
ददनृनिजेभ्यः स्वदयावशेन श्रीधर्म्मदासो जयति स्म देवः ।
वन्दे द्वादशदेशनिर्म्मितयथायोग्योर्द्ध्वपुण्ड्रस्थिति
बाह्वोर्विधृतसङ्गमप्यरिदरोद्भूतं प्रसन्नाननम् ।
वासः शुभ्रतरं वसानमनिशं संसारतापापहं
वक्षःशोभिसरोरुहाक्षतुलसीदामाभिरामं गुरुं ॥

Colophon. इति श्रीस्वयम्भूदेवचरित्रे पञ्चदशमो विश्रामः ॥ संवत् १९४० ।

विषयः । हरिभक्तिमाहात्म्यकथन । तुलसीमाहात्म्यकथन । तुलसीधारणविध्यादिकथनं ॥ स्वयम्भूत्पत्तिकथनं । कृष्णेन स्वयम्भुवो गुरूपदेशादिकथनं ॥ प्राप्तवैष्णवधर्म्मज्ञानस्वभुवो दिग्विजयादिकथनं ॥

No. 352. स्वरूपविवरणम् By आनन्दज्ञान । Substance, country-made paper, 12×4 inches. Folia, 4. Lines, 16 on a page. Extent, 240 slokas. Character, Bengali. Date ? Place of deposit, Puri. Śankara Maṭha. Appearance, old. Prose. Generally correct.

Beginning. ॐ विधूतविविधोपाधिव्याधिबोधैकमूर्त्तये ।
प्रीतये परमानन्दवपुषे ब्रह्मणे नमः ॥
स्वरूपाख्यं स्वरूपविषयं प्रकरणं प्रतिचिकीर्षुरधिकारिणो हेयोपादेयविवेकार्थमनर्थहेतुं पुरुषार्थहेतुञ्च प्रथमं गृह्णाति । अनात्मभूत इति ।
इत्यादि ।

End. तदेवमनर्थतद्धेतुजिहासता पुरुषार्थतद्धेतुजिघृक्षतानेन भवतीति प्रकरणमिदं श्रोतव्यमिति भावः ।
हेयादेयाभिधावादो यस्मिन्नर्थो न गाहते ।
तं प्रत्यञ्चं परानन्दपुरुषोत्तममाश्रये ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीशुद्धानन्दपूज्यपादशिष्य-श्रीभगवदानन्दज्ञानविरचितं स्वरूपविवरणं समाप्तम् ॥

विषयः । अविद्याजनितसंसारस्य स्वरूपनिरूपकग्रन्थस्य व्याख्यानम् ।

No. 353. हंसदूतटीका By पुरुषोत्तममिश्र । Substance, palm-leaf, 12×2 inches. Folia, 121. Lines, 7 on a page. Extent, 3872 ślokās. Character, Uriā. Date ? Place of deposit, District Purī, pargana Rāhan, grāma Jāgannātha Vidyādharapura, Paṇḍita Rāmacandra Miśra. Appearance, old. Prose. Generally correct.

श्रीकृष्णाय नमः ।

Beginning. कोऽपि पुरुषः मे मम हृदि मनसि स्फुरतु प्रकाशीभवतु इत्यन्वयः कोपीत्यनिर्द्देशत्वेन विशिष्टाशक्यनिर्वचनता सूचिता किंविशिष्टः दुकूलं बिभ्राणः दधत् दुकूलं किंविशिष्टं दलितं पिष्टं यद्धरितालं पीतवर्णवस्तु गैरिकनिर्द्देशः तस्य या द्युतिः तां हरति अनुकरोति जयति तथोक्तं हरितालं धातुभेदे स्त्रीदूर्व्वाव्योमरेखयोः इति मेदिनी ।
इत्यादि ।

End. प्रहर्षो मदो हर्षः प्रमदः, मदो रेतसि कस्तूर्य्यां गर्व्वे हर्षेभदानयोरिति विश्वः ।
येषां दोषविदां विदूषणविधनैसर्गिकोऽज्ञानिनां
ये वातीर्णपदार्णवैरतिकृते रङ्गीकृतं दूषणं ।

क्लेषां स सते+ +निजगुरुव्याख्यानवैतसृतेः
येऽन्येषां गुणविहषपि परां प्रीतिं ययौ नौमि तान् ॥ (?)
शके श्रीनरसिंहभूपतिलकस्याम्भोधिसंख्ये मया
कालेनापि कृता यथायथमिति टीका सतां प्रीतये (?) ।
अस्यां यद्यदलेखि विभ्रमवशाद् वा सम्भ्रमाद् वा भ्रमात्
शोध्यं तत्तदमेध्यमेव निपुणैर्याचे नतः साञ्जलिः ॥

Colophon. इति श्रीपुरुषोत्तममिश्रविरचिता हंसदूतटीका समाप्ता ।

विषयः । हंसदूतव्याख्या ।

No. 354. हनूमत्कवचं। Substance, country-made paper, 15 × 3 inches. Folia, 2. Lines, 5 on a page. Extent, 30 slokas. Character, Bengali. Date ? Place of deposit, Zilla Medinīpura, Post Gaḍvetā, grāma Khunveḍā, Babu Vaikunṭhanātha Cakravartī. Appearance, fresh. Verse. Correct

Beginning. ॐ हनूमते नमः । ब्रह्मोवाच ।
अस्य श्रीहनूमत्कवचस्य ब्रह्मऋषिरनुष्टुप्छन्दो हनूमान
परमात्मा देवता मारुतात्मज इतिबीजं अञ्जनासूनुरितिशक्तिरात्मनः सक-
लार्थसिद्धये विनियोगः ।
ध्यायेद्बालदिवाकरद्युतिनिभं देवारिदर्पापहं
देवेन्द्रप्रतिमं प्रशस्तयशसं देदीप्यमानं रुचा ।
सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं
संरक्तारुणलोचनं पवनजं पीताम्बरालङ्कृत ॥
ॐ हनूमान् पूर्व्वतः पातु दक्षिणे पवनात्मजः ।
पातु प्रतीच्यामक्षघ्नः पातु सागरपारगः ॥ इत्यादि ।

End. यो वारां निधिमल्पपल्वलमिवोल्लङ्घ्य प्रतापान्वितो
वैदेहीघनशोकतापहरणो वैकुण्ठभक्तप्रियः ।
अक्षाद्यूर्ज्जितराक्षसेश्वरमहादर्पापहारी रणे
सोऽयं वानरपुङ्गवोऽवतु सदा चास्मान् समीरात्मजः ॥

Colophon. इति ब्रह्माण्डपुराणे हनूमत्कवचं समाप्तम् ॥

विषयः । हनूमतःकवचकथनं

No. 355. हस्तसञ्जीवनी By मेघविजयगणक। Substance, country-made paper, 11 × 5 inches. Folia, 24. Lines, 13 on a page. Character, Nāgara. Date, Saṃvat 1874. Place of deposit, District Chāprā, P.O. Gopālgañja, Harapura, Jagadeo Paṇḍita. Appearance, tolerable. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

श्रीमच्छङ्खेश्वरपार्श्वप्रणमन् ध्यायं स्तमेव जिनवृषभं ।
हस्तप्रशस्तलक्षणयाचणे, लक्षतां, वक्ष्ये ॥
श्रीनाभेयः प्रभुर्जियात् सर्व्वतो जगदीश्वरः ।
येन लाक्षणिका विद्या निर्द्दिष्टा भुवनत्रये ॥ इत्यादि ।

End. अनुष्टुप्भासपदाभ्यां ज्ञेया पद्मशती ध्रुवं
ग्रन्थे सतां प्रसादाच्च श्रेयः श्रीरस्तु शाश्वती ।

Colophon. इति श्रीहस्तसञ्जीवने सिद्धिज्ञाने महोपाध्याय-श्रीमेघविजयगणक विरचितं सम्पूर्णम् । सम्वत् १८७४ ।

विषयः । हस्तलक्षणादिनिरूपणम् ।

No. 356. ऋताशन्युपहासस्तूत्रभाष्यम् । Substance, country-made paper, 11 × 4 inches. Folia, 8. Lines, 11 on a page. Extent, 240 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, new. Prose. Incorrect.

Beginning. संभोगाय प्रार्थितोभाव ...... राजा स्वभार्य्यां रामशां अप्रौढ़ां मत्वा परिहसन् अनुष्टुभाह ॥
आगधिता परिगधिता या कशीकेय जङ्कहे । ददाति मह्यं या दुरौ या ग्रूनां भोज्याशता ॥
भोज्या भोगयोग्या एषा, आगधिता आसमन्तात्गृहीता स्वीकृता इत्यादि ।

End. किमर्थमहमेवं प्रपद्ये इत्युच्यते श्वेतं वर्णतः पक्वबदरसमं रोहितं तथा अदत्कं दन्तरहितमपि अदत्कं भक्षयित्व स्त्रीव्यञ्जनं तत्संविनां तेजोबल-वीर्यविज्ञानधर्माणामपहन्तृ विनाशयित्व इत्येतत् तदेवं लक्षणं श्वेतं इति ।

Colophon. श्रीमद्गोपालकृष्णाय नमः ।

विषयः । कृताग्न्युपस्थानसूक्तव्याख्या । "अमम्पूर्वोऽयम्" ।

No. 357. हैमलघुव्याकरणढुण्ढिका By उदयशीलगणि । Substance, country-made paper, 12 × 4 inches. Folia, 128. Lines, 19 on a page. Extent, 9960 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Diṅmaṇḍalācārya Mahārāja Vālacandra Sūri. Appearance, old. Prose. Correct.

Beginning. श्रीशारदां नमस्कृत्य + + + परस्मृति हेतवे
हैमव्याकरणस्येयं लिख्यते ढुण्ढिका यथा
अर्हौं प्रणम्येति ।

End. आकारान्तवर्जितेभ्यो विकल्पं केचिदिच्छन्ति, तन्मते दुःशासः दुर्योधः ।
दुर्दर्शः दुर्धर्षः दुर्मर्षः इत्याद्यपि + + + भवति ।

Colophon. श्रीखरतरगच्छे श्रीजिनवर्द्धनसूरिपटे श्रीजिनचन्द्रसूरिपट्टोदयालङ्कार + + + श्रीजिनसागरसूरिभिः उदयशीलगणिनामापदेश परोपकारार्थं शिष्यजनसुबोधार्थं च कृतायां श्रीहैमलघुव्याकरणढुण्ढिकायां पञ्चमस्याध्यायस्य तृतीयः पादः समाप्तः ।

विषयः । जैनव्याकरणम् ।

No. 358. होमपद्धतिः By लम्बोदर । Substance, country-made paper, 9 × 5 inches. Folia, 21. Lines, 12 on a page. Extent, 1000 slokas. Character, Nāgara. Date ? Place of deposit, Purī, Śankara Maṭha. Appearance, bad. Prose and verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।

अथ होमपद्धतिः ।

सुस्नातः प्राङ्मुखो भूत्वा यजमानः कृताह्निकः ।
आहूय ब्राह्मणान् कुर्य्यात् प्रतिज्ञां विधिवत् तथा ॥
ईशान्यां मण्डलं कृत्वा घटानां स्थापनं ततः ।
वर्धनं स्वस्तिपुण्याहवाचनं कहण तथा ॥

ज्वलनं स्थापनं कृत्वा समाप्य कुशकण्डिकां ।
वेदमन्त्रैः प्रतिष्ठाप्य कुम्भस्यावाहयेत् सुरान् ॥
पुष्पमाल्यादिभिः सर्व्वान् पूजयेत् भक्तिसंयुतः ।
गुड़ौदनादिनैवेद्यं सर्व्वेभ्योऽग्रे निवेदयेत् ॥ इत्यादि ।

End. कृतस्यैतस्य × × × नातिरिक्तं यत् कृतं तत् सुकृतमस्तु यन्नकृतं तद् विष्णोः प्रसादाद् ब्राह्मणवचनात् सर्व्वं × × परिपूर्णमस्तु । ततो ब्राह्मणैः कुटुम्बजनैः परिवृतो भोजनं कुर्य्यात् ।
दिवि भुव्यन्तरीक्षेषु उत्पातेषु जातेषु उद्वेगात् भूतादिषु च शान्त्यर्थं कर्त्तव्यं ।
अनेन विधिना यस्तु ग्रहपूजां समाचरेत् ।
सर्व्वान् कामानवाप्नोति स्वर्गलोके महीयते ॥

Colophon. इति श्रीलम्बोदरविरचिता होमपद्धतिः समाप्ताः ॥

विषयः । ग्रहाणां होमविधानकथनम् ।

No. 359. होरासुधानिधिः । By Nārāyaṇa. Substance, country-made paper, 12×4 inches. Folia, 93. Lines, 11 on a page. Extent, 2790 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, late Babu Hariścandra. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
श्रीशाद्यैः सहितं गजेन्द्रवदनं श्रीशारदा + + + कृतं
पात्रं मोदकपूर्णमाद्यकलशं मालाक्षसूत्रं भुजैः,
बिभ्राणं शुचिनागसम्भवलसत्कायं सहस्रार्कभं
वन्दे मूषकवाहणं गणपतिं त्रैलोक्यचिन्तामणिम् ।

End. यदंशगटहगश्चन्द्रः सकेन्द्रस्थशुभैर्युतः,
शय्यादानात्मकं कर्म दोलालीलाप्रदायकं ।

Colophon. इति सामुद्रिकोपनामकमाधवात्मजनारायणविरचिते होरासारसुधानिधौ राजयोगाध्यायः ।

विषयः । होराणां विवरणम् ।